ओ३म्

काशिकागत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च

(काशिकावृत्तिगत विशिष्ट उदाहरणों का अर्थ और प्रयोग)

P15, Cx1, 1
N5

लेखक :

श्री शिवचन्द-सुतः डा. विजयपाल शास्त्री

साहित्य-व्याकरणाचार्यः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

P15, Cx1, 1 5144
N5
Vijaypal sastri.
Kasikagata-vishisto-
daharananam.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

P15, Cx1, 1
N5

5144

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ३म्

काशिकागत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च

(काशिकावृत्तिगत विशिष्ट उदाहरणों का अर्थ और प्रयोग)

लेखक :

श्री शिवचन्द-सुतः डा. विजयपाल शास्त्री

साहित्य-व्याकरणाचार्यः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीयावृत्ति :, 500.

जून, 1995.

P15, Cx1, 1
N5

© सर्वाधिकारः प्रकाशकाधीनः

प्रकाशक :
डा० विजयपाल शास्त्री
50, वर्धमान नगर बी, हीरापुरा,
अजमेर रोड़, जयपुर–302011

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ....5144........

मूल्यम् 280/–

मुद्रक–चन्द्रोदय प्रिन्टर्स रामगंज, जयपुर
इण्डो–बर्मा प्रिन्टर्स आदर्श नगर जयपुर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ

समर्पणम्

पूजनीयः पिता श्री शिवचन्द आर्यः

यस्य प्रेरणया तथातिकृपया लक्ष्याध्वनि प्राभवम्
यस्योदात्तशुभाशिषा च सततं श्रेयःपथं प्राप्नवम् ।
यश्चाशेषशुभागमे मम गुरुः सौभाग्यमूलञ्च, स्यात्
तातस्यार्च्यपदारविदयुगले ग्रथार्पणं प्रीतये ।।

विजयपालः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ३म्

विषय-सूची

विषयाः	पृष्ठ-संख्या
प्राक्कथनम्	
कृतज्ञता-ज्ञापनम्	
शब्द-सङ्क्षेप-सूची	
प्रथमोऽध्यायः	**1 - 8**
पाणिनीयव्याकरण-परम्परा, त्रिमुनिपरिचयः	1 - 4
काशिकावृत्तेः वृत्तिकारस्य च परिचयः, काशिकावृत्तेर्वैशिष्ट्यम्	4 - 8
द्वितीयोऽध्यायः	**9 - 48**
जिह्वाकात्यः, जैह्वाकाताः, हरितकात्यः, हरितकाताः	9 - 11
अनुक्रीडते	12 - 14
सङ्क्रीडते	14 - 17
परिक्रीडते	17 - 18
आक्रीडते	18 - 19
आगमयस्व तावन्माणवक !	19 - 22
आनुते	22 - 27
आपृच्छते	27 - 29
अन्तर्हत्य, अन्तर्हतम्, यदन्तर्हन्ति	30 - 32
कणेहत्य पयः पिबति, मनोहत्य पयः पिबति	33 - 35
अच्छगत्य, अच्छगतम्, यदच्छगच्छति, अच्छोद्य, अच्छोदितम्, यदच्छवदति	36 - 37
हस्तेकृत्य, पाणौकृत्य	38 - 43
जीविकाकृत्य, उपनिषकृत्य	44 - 48
तृतीयोऽध्यायः	**49 - 82**
उपकुम्भम्, उपमणिकम्	49 - 50

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इतिपाणिनि, तत्पाणिनि	50 - 53
सकिखि	53 - 56
अक्षपरि, शलाकापरि, एकपरि, द्विपरि, त्रिपरि, चतुष्परि	57 - 58
सप्तगङ्गम्, द्वियमुनम्, पञ्चनदम्, सप्तगोदावरम्	59 - 63
गिरिकाणः (किरिकाणः)	64 - 69
पादहारकः, गलेचोपकः	70 - 71
कल्पनापोढः	72 - 73
साङ्काश्यसिद्धः, काम्पिल्यसिद्धः	74 - 76
शस्त्रीश्यामा, कुमुदश्येनी	77 - 79
हंसगद्गदा, न्यग्रोधपरिमण्डला	79 - 81
श्वनिशम् - श्वनिशा	81 - 82
चतुर्थोऽध्यायः	**83 - 132**
ओजायते	83 - 86
अवगल्भते, अवगल्भायते, क्लीबते, क्लीबायते, होडते, होडायते	86 - 88
सुदिनायते, दुर्दिनायते, नीहारायते	89 - 90
अष्टायते, अट्टायते, शीकायते, कोटायते, पोटायते, सोटायते, मोटायते, प्रुष्टायते, प्लुष्टायते	90 - 94
उत्पुच्छयते, परिपुच्छयते, विपुच्छयते	95 - 97
सम्भाण्डयते, सञ्चीवरयते भिक्षुः	97 - 102
विपूयः, विनीयः, जित्यः	102 - 109
दिग्धसहशयः	110
कारकरः, आदिकरः, नान्दीकरः, कर्तृकरः, क्षेत्रकरः, जङ्घाकरः, धनुष्करः	111 - 127
फलेग्रहिः	127 - 129
वर्हंलिहो गौः	129 - 130
अपमित्य याचते, अपमित्य हरति	131 - 132

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चमोऽध्यायः	**133 - 144**
जानपदी वृत्तिः	133
संहितोरूः, शफोरूः, लक्षणोरूः, वामोरूः, संहितोरूः, सहोरूः	134 - 137
ग्रामता, जनता, बन्धुता, सहायता	138
आस्तेयम्	138 - 139
माशब्दिकः, प्राभूतिकः पार्याप्तिकः	139 - 141
सौस्नातिकः, सौखरात्रिकः, सौख्शायनिकः	142
पारदारिकः, गौरुतल्पिकः	142 - 143
बाहुकः	143
औरसः	144
षष्ठोऽध्यायः	**145 - 174**
मातृभोगीणः, पितृभोगीणः, आचार्यभोगीनः, पञ्चजनीनः	145 - 147
पौरुषेयम्	147 - 149
माणवीनम्, चारकीणम्	149 - 150
शीर्षच्छेद्यः	150
स्थालीबिलीयास्तण्डुलाः	151
कार्णवेष्टकिकं मुखम्, वास्त्रयुगिकं शरीरम्	152 - 153
कर्मण्य शरीरं, वेष्यो नटः	153 - 156
यथामुखीनः, सम्मुखीनः	156 - 161
आप्रपदीनः पटः	161 - 163
सर्वान्नीनो भिक्षुः	164 - 165
साप्तपदीनं सख्यम्	165 - 168
निबिडम्, निबिरीसम्	168 - 171
कार्मणम्	171 - 173
सत्याकरोति वणिग् भाण्डम्	173 - 174
सप्तमोऽध्यायः	**175 - 216**
उष्ट्रसादिः, उष्ट्रसादी, उष्ट्रवामी	175 - 180
गोसादः, गोसादिः, गोसादी, गोसारथिः	180 - 182
मनसाज्ञायी	183

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कण्ठेकालः, उरसिलोमा, उदेरमणिः	184 - 185
प्रावृषिजः, शरदिजः, कालेजः, दिविजः	186 - 188
वर्षेजः, क्षरेजः, शरेजः, वरेजः	188 - 190
पद्धिमम्, पत्काषी, पद्धतिः	191 - 192
पद्घोषः, पादघोषः, पन्मिश्रः,	
पादमिश्रः, पन्निष्कः, पादनिष्कः	193 - 195
उदपेषं पिनष्टि, उदवासः, उदवाहनः, उदधिः	195 - 197
उदमन्थः, उदौदनः, उदसक्तुः, उदबिन्दुः, उदवज्रः	
उदभारः, उदहारः, उदवीवधः, उदगाहः	198 - 203
कत्त्रयः	204
कद्रथः, कद्वदः	205
अष्टावक्रः, अष्टाबन्धुरः, अष्टापदम्	206 - 208
विकपितः, विलगितः	208 - 210
रजयति मृगान्	210 - 212
अवोदः, एधः, ओद्म, प्रश्रथः, हिमश्रथः	213 - 216
अष्टमोऽध्यायः	**217 - 220**
अश्वस्यति वडवा, क्षीरस्यति माणवकः,	
वृषस्यति गौः, लवणस्यति उष्ट्री	217 - 220
नवमोऽध्यायः	**221 - 224**
काष्ठाध्यापकः, दारुणाध्यापकः	221
अधस्पदम्, शिरस्पदम्	222
भीरुष्ठानम्	223
गविष्ठिरः	223 - 224
प्रतिष्णिका	224
उपसंहारः	225 - 228
सन्दर्भग्रन्थसूची	229 - 239
शोधप्रबन्धे विवेचितानाम् उदाहरणानाम्	
अकारादिक्रमेण अनुक्रमणिका	240 - 247

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ३म्

प्राक्कथनम्

व्याकरणं नाम शब्दानामनुशासकं शास्त्रम्। इह शब्दानां पदानां वा व्याक्रिया निर्दिश्यते प्राधान्येन। वाक्यमिह अनुषङ्गभूतं तिष्ठति। अत एव व्याकरणस्य कृते पदशब्दस्य प्रयोगः सङ्गतो भवति। "पदवाक्यप्रमाणज्ञः", "पदवाक्यप्रमाणपारावारीणः", "योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन" इत्यादिषु स्थलेषु पदम् इति व्याकरणस्य वाचकम् अस्ति। प्रकृति-प्रत्यय-विभागपरिकल्पनया सामान्यविशेषवता लक्षणेन च व्याकृतस्य पदस्य अर्थज्ञानं ततश्च तस्य साधुप्रयोग इति व्याकरणस्य मुख्यं फलम्।

परं व्याकृतस्य पदस्य कोऽर्थः कथं वास्य वाक्ये प्रयोग इत्येतदर्वाचीनवैय्याकरणानाम् अध्ययनाध्यापन-परम्परायां प्रायेणोपेक्षित गुणीभूत वा जातम्। पुरा तु त्रिमुनिव्याकरणस्यास्य प्रणयन-काले प्रणेतृणामाचार्याणां समक्षम् उदाहरणानामर्थः प्रयोगश्च स्पष्ट आसीत्, यतः भाषायां शब्दप्रयोगं दृष्ट्वैव तत्साधुत्वानुशासनं क्रियते इत्याचार्याणां शैली। तथापि मुनित्रयस्य कालादनन्तरं यथा यथा संस्कृतभाषाया व्यवहारो विरलतां गतः तथा तथा शब्दसिद्धिप्रक्रियायामविच्छिन्नायाम् सत्यामपि सूत्रैः व्याकृतानां बहूनामुदाहरणपदानाम् अर्थः प्रयोगश्च सन्दिग्धतामस्पष्टतां वा गतः। यतो हि तदा वैय्याकरणानां पठन-पाठन परम्परायां पदसिद्धिकरणमेव प्रधानं जातम्,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदाहृतपदस्य अर्थज्ञानं वाक्ये प्रयोगश्च गौणतामभजत्। आचार्यचरुदेवेनापि वैयाकरणानाम् इयं स्थितिः सुस्पष्टं निर्दिष्टा।[1]

अथास्मिन् विषये काचिद् जनश्रुतिरित्थं प्रसरति— कदाचिद् भगवान् पाणिनिराचार्य आरण्यकेन पथा गच्छति स्म। मध्येमार्गं केनचिदुक्तम्— भगवन्! नानेन पथा गन्तव्यम्, अग्रे व्याघ्रो निवसतीति। तच्छ्रुत्वा आचार्यो व्यचारयत्— विशेषेण आसमन्ताद् जिघ्रतीति व्याघ्रः, काऽनेन मे क्षतिः स्यात्। इत्थं विचिन्त्याग्रे गतः, व्याघ्रेण च निहतः। अस्याः काल्पनिक-जनश्रुतेराधारभूतं—"सिंहो व्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिनेः"[2] इति वचनं श्रूयते। अस्या जनश्रुतेनेदं तात्पर्यं यद् व्याघ्रशब्दस्यार्थ आचार्यस्याविदित आसीदिति, परन्तु परवर्तिकाले येषां वैयाकरणानां पदसिद्धिमात्रमेव लक्ष्यं जातं, सिद्धस्य पदस्यार्थज्ञानं प्रयोगश्च गौणोऽभवत्, तेषामाक्षेपाय इयं जनश्रुतिः कल्पिता इति गम्यते।

व्याकृतस्य पदस्यार्थज्ञानाभावे वाक्ये तत्प्रयोगोऽसम्भव एवास्ति। एवं च सति व्याकरणस्य प्रयोजनवत्तैव न निष्पद्यते, यतः व्याकृतानां साधुशब्दानाम् अर्थज्ञानपुरस्सरं यथावत् प्रयोग एव व्याकरणस्य मुख्यं फलम्। तथा चोक्तं महाभाष्ये—

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥[3]
यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥[4]

---

1. पढ़ते-पढ़ाते समय अन्वाख्येय पदों का अर्थ न पूछा जता है और न बताया जाता है। ऐसा आज ही नहीं, सैकड़ों वर्षों से यही पद्धति चल रही है। यही कारण है कि कई पदों के अर्थ न्यासकार व पदमञ्जरीकार को भी स्पष्ट नहीं हैं। "इतिपाणिनि" शब्दप्रादुर्भाव में अव्ययीभावसमास है। इसका क्या अर्थ है और वाक्य में इसका कैसे प्रयोग होता है इसे कोई विरला ही जानता होगा।
द्रष्टव्यः - व्या० चन्द्रो०, प्रथमखण्डः, किञ्चिद् वक्तव्य - पृ० 8,
2. पञ्चतन्त्रम् (मूलमात्रम्) पृ० 86, चौखम्बा।
3. म० भा०, प्रथमभागः, पृ० 2, (पूना)
4. म० भाग, प्रथमभागः, पृ० 2, (पूना)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"तस्मादनर्थकं माध्यगीष्महीत्यध्येयं व्याकरणम्"[1] इति ।अन्यत्र चाप्युच्यते—

व्याकरणत् पदज्ञानं पदज्ञानादर्थनिर्णयो भवति ।
अर्थात् तत्त्वज्ञानं तत्त्वज्ञानात् परं, श्रेयः[2] ॥

अयमेवार्थः पाणिनीयशिक्षायामतीव स्फुटतया निर्दिश्यते—

तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्यगुशन्ति विप्राः ।
स श्रेयसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति ॥[3]

साम्प्रतिकः खलु वैयाकरणसम्प्रदायः प्रायेण लक्षणैकचक्षुष्को लक्ष्यते । तेनाद्यत्वे प्रक्रियापुरस्सरं पदसिद्धिं कृत्वापि असौ उदाहृतपदानामर्थं प्रयोगविधिं च विशदतया न मीमांसते । तस्माद् उदाहृतपदानाम् अर्थज्ञानस्य प्रयोगविधेश्च वैशद्यं न ज्ञायते । एतस्मात् काशिका-कौमुद्यादिग्रन्थानाम् अध्ययनाध्यापन-प्रसङ्गे पद-व्याक्रियायां कृतायामपि बहूनामुदाहृतपदानां सम्यगर्थज्ञानाभावात् तत्प्रयोगे चेतो मुह्यति । एवं सति व्याकरणस्याध्ययनम् अध्यापनञ्चापूर्णमेव तिष्ठति । यतः "लक्ष्यलक्षणे व्याकरणम्" इति पस्पशायाम् आचार्यकात्यायनवचनम् । लक्ष्यम्=उदाहरणम् लक्षणम्=सूत्रम् । "लक्ष्यं लक्षणं चैतत् समुदितं व्याकरणं भवति" इति तत्र भगवत्पतञ्जलिमुनि-व्याख्यानम् । अतो व्याकरणज्ञानस्य कात्स्न्यर्मापदयितु लक्षणैः सह लक्ष्याणा वैशद्येनाध्ययनं परमावश्यकमस्ति ।

साम्प्रतिके वैयाकरणसम्प्रदाये बहूनामुदाहरणानामर्थः प्रयोगश्चास्पष्टः सन्दिग्धो वास्ति । अतोऽस्मिन् क्षेत्रे शोधकार्यस्य महत्यावश्यकतानुभूयते । मयाप्यध्ययनकाले बहुत्र उदाहरणार्थस्य स्पष्टप्रतिपत्त्यभावे काठिन्यम् अनुभूतम् । ततः प्रभृत्येवास्मिन् विषये शोधकार्यं कर्त्तुं सङ्कल्पबीजं प्रादूरभूत् । तच्च गुरुजनानां गरीयस्या कृपया प्रेरणया निर्देशेन चैवं शोधग्रन्थरूपेण परिणतम् । इह मया काशिकागतलक्ष्यविशेषाणाम् अर्थं प्रयोगं च विशदयितुं यथासामर्थ्यं प्रयासः कृतः ।

---

1. म० भाग, प्रथमभागः पृ० 2, (पूना)
2. विश्रुता अभियुक्तोक्तिः।
3. पाणिनीयशिक्षाया आदितो द्वितीयश्लोकः। द्र०- "वर्णोच्चारण शिक्षा" स्वामी दयानन्द, वैदिक यन्त्रालय, अजमेर।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदाहरणानाम् साक्षादर्थं प्रयोगं चोद्दिश्य किञ्चित् शोधकार्यं जातं स्याद् इति न ज्ञायते, परम्परयैत्सम्बद्धानि शोधकार्याणि तु दृश्यन्ते। तद्यथा वासुदेवशरण-अग्रवालमहोदयेन पाणिनिकालीन भारत-वर्ष इत्याख्ये शोधग्रन्थे पाणिनिकालिकसमाजस्य संस्कृतेश्च वर्णनप्रसङ्गेन बाहुल्येनोदाहरणार्थस्य विवरणं प्रस्तूयते। एतादृशमेव वर्णनं प्रभुदयाल-अग्निहोत्रिकृते "पतञ्जलिकालीन भारतवर्ष" इत्याख्ये ग्रन्थे दृश्यते।

आचार्यराधारमणपाण्डेयमहाभागेन अर्थप्रकाशिकायां सिद्धान्त-कौमुदीगत-उदाहरणानामर्थनिर्देशः संक्षेपतः कृतः। आचार्यचारुदेवेन व्याकरणचन्द्रोदये यथासम्भवम् उदाहरणानां वाक्ये प्रयोगः प्रदर्शितः। एतेषां महानुभावानां ग्रन्थैः मे बहु साहाय्यं कृतमस्मिन् शोधकर्मणि। इत्थमेव व्याकरणस्य सम्प्रत्युलब्धेभ्यः प्राचीनग्रन्थेभ्योऽपि मया भूयस्तरं साहाय्यं लब्धम्, इत्थमेतेषां सर्वेषां प्राचामर्वाचां च ग्रन्थकाराणामहमधमर्णोऽस्मि।

शोधप्रबन्धोऽयं नवसु अध्यायेषु विभक्तिस्तिष्ठति। इह प्रथमेऽध्याये काशिकावृत्तेः तत्कर्त्तुश्च परिचयः, उदाहरणार्थस्य विवेचनीयता च निर्दिश्यते। ततोऽग्रे च अष्टस्वध्यायेषु काशिकाया अध्यायक्रमेण निर्धारितानां विशिष्टानामुदाहरणानां अर्थप्रयोगयोर्विमर्शः प्रस्तूयते।

इह शोधप्रबन्धे विवेचनार्थं निर्धारितानाम् एषाम् विशिष्टानाम् उदाहरणानां पूर्वम् अर्थविवरणं प्रस्तूयते। अत्र च महाभाष्य-काशिका-न्यासपदमञ्जरी-प्रदीप-उद्योतप्रभृतीनां प्राच्यव्याकरणग्रन्थानां प्रक्रियाकौमुदी-वैय्याकरणसिद्धान्तकौमुदी-बालमनोरमातत्वबोधिनी-बृहच्छब्देन्दुशेखरप्रभृतीनां नव्यव्याकरणग्रन्थानां चान्द्रव्याकरणवृत्ति-जैनेन्द्रव्याकरण-महावृत्ति-शाकटायनव्याकरण-चिन्तामणिवृत्ति-अमोघावृत्ति-सिद्धहेमशब्दानुशासनवृत्तिप्रभृतीनां पाणिनीयेतरव्याकरणपरम्पराग्रन्थानां प्रामाण्येन च निर्दिष्टो लक्ष्यार्थो विव्रियते समुपोद्बल्यते च। यदि क्वचिद् ग्रन्थान्तरेषु उदाहरणार्थे वैमत्यं प्राप्यते चेत् तस्य निर्देशपुरस्सरं समीक्षणपि क्रियते। इत्थं प्रतिपादितार्थस्योदाहरणस्य काव्यनाटकादिभ्यः साहित्यिकग्रन्थेभ्यः प्रयोगा अन्विष्यान्विष्य प्रस्तूयन्ते। बहुत्र तूदाहरणार्थः प्रयोगान् अवलम्ब्यैव विवेचितः। यत्र च प्रयोगे मतभदो दृश्यते तस्य निर्देशपुरस्सरं समीक्षा विधीयते। क्वचित् पाठान्तरमाश्रित्य लक्ष्यार्थो निर्दिश्यते, क्वचित्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शोधितपाठाश्रयेण च। क्वचिच्च ज्ञातार्थम् उदाहरणं प्रयोगोपस्थापनेन भूयोऽपि विशदतामानीयते। क्वचिद् उदाहरणार्थं प्रमाणपुरस्सरं प्रतिपाद्य प्राक्तनसाहित्यिकप्रयोगानुप्रलम्भात् स्वयमपि प्रयोगाः कल्पयित्वा प्रदर्श्यन्ते। इत्थं यथामति यथासाधनं च काशिकागतविशिष्टोदाहरणानाम् अर्थप्रयोगयोर्विवेचनेनायं शोधप्रबन्धः समाप्यते। इत्थम् अयमत्र विवेचनप्रकारः—

सन्दिग्धार्थविनिर्णयः क्वचिदपि व्याख्यातृहेतूक्तिभिः,
मीमांसा क्वचिदर्थभेदविषये ग्रन्थान्तरालम्बनात्।
अज्ञातार्थगवेषणाय कुहचित् सम्भावनोद्भावना,
ज्ञातेऽर्थे च कविप्रयोगसहितं वैशद्यसम्पादनम्॥

निवेदकः
विजयपालशास्त्री

सूचना

"काशिकागतलक्ष्यविशेषणाम् अर्थः प्रयोगश्च" इति शोध-प्रबन्धः 24.11.1986 दिनाङ्के मया दिल्ली-विश्वविद्यालय-संस्कृत-विभागे पी-एच० डी० (विद्यावाचस्पति-) इत्युपाधये प्रस्तुतः, प्रबन्धस्य परीक्षानन्तरं च उपाधिः प्राप्तः। स एवायं शोध-प्रबन्धः परिष्कृत-परिवर्धित-रूपेण "काशिकागतविशिष्टोदाहरणानाम् अर्थः प्रयोगश्च" इति नाम्ना प्रकाश्यते।

मकरसङ्क्रान्तिः, 14.1.1994 ई०

विजयपालः शास्त्री

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ३म्

कृतज्ञता - ज्ञापनम्

लक्ष्यं लक्षणं चैतत् समुदितं व्याकरणं मन्यते। अनया दृष्ट्या लक्षणैः सह लक्ष्याणाम् अध्ययनम् अपि अपरिहार्यं महत्त्वपूर्णं चास्ति। लक्ष्याणामध्ययने पूर्वत एव मे रुचिरासीत्। गुरुजनानां गरीयस्या कृपया प्रेरणया मार्गनिर्देशनेन चाहं काशिकागतलक्ष्यविशेषणामर्थः प्रयोगश्चेति विषयमवलम्ब्य शोधकर्मणि प्रवृत्तोऽभवम्। अनवरतं गुरुजनकृपया तत्कृतपथप्रदर्शनेनैवाहम् इदं शोधकार्यं कर्तुमपारयम्।

सर्वप्रथमं संस्कृतजगति लब्धख्यातीनां पूजार्हाणां श्रीमद्ब्रजमोहन-चतुर्वेद महाभागानां नितरां कृतज्ञोऽस्मि येषां संस्कृत-विभागाध्यक्षत्वे (दिल्ली विश्वविद्यालये) इदं शोधकार्यं सम्पन्नम्। तत्रभवद्भिः काले कालेऽमूल्यनिर्देशप्रदानेन मे पथिप्रदर्शनमपि कृतमिति तदीयमहोपकारः सर्वथा अविस्मरणीयोऽस्ति।

अस्य शोध-प्रबन्धस्य निर्देशकानां मान्यवराणां डा० सूर्यकान्तबालीमहाभागानां निर्देशनमवलम्ब्याहमनवरतं तत्कृपाकटाक्षेणानुगृहीतः सन् शोधकार्यमेतत् सम्पन्नकरवम् इति तत्रभवतां श्रीमतामत्यर्थं कृतज्ञोऽस्मि। यदिदं किञ्चित् शोधकार्यम् अहं कर्त्तुमशक्नवं तत् तत्रभवतां प्रेरणायाः प्रभाविमार्गनिर्देशनस्य सर्वविधस्य साहाय्यस्य च फलमस्ति। अतोऽहं मान्यवरान् निर्देशकमहोदयान् प्रति हार्दिकीमधमर्णतां श्रद्धां च प्रकटयामि।

अस्मिन् शोधकर्मणि आचार्यवर्य्यैः श्रीचारुदेवमहाभागैः पण्डितप्रवरैः श्रीयुधिष्ठिरमीमांसकमहाभागैः बहालगढ़स्थपाणिनिमहाविद्यालयस्याचार्यवर्य्यैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीविजयपालविद्यावारिधिमहोदयैश्च समये समये प्रेरणया सत्परामर्शप्रदानैश्च मे बहुसाहाय्यं कृतम्, इत्येतेषां महानुभावानाम् अतीव कृतज्ञोऽस्मि।

अस्मिन् शोधकार्ये पुरातनग्रन्थकाराणां भाष्यकाराणां टीकाकाराणाञ्च ग्रन्थेभ्यो मया यत्साहाय्यलम्भि तदर्थमहं तेषां समेषां कृतज्ञोऽधमर्णश्चास्मि।

दिल्ली विश्वविद्यालयसंस्कृतविभागस्य सर्वेषां गुरुजनानामहमतीव कृतज्ञोऽस्मि येषां बहुविधं साहाय्यं मया सदैव प्राप्तम्।

दिल्लीविश्वविद्यालयस्थपुस्तकालयस्याधिकारिभिः कर्मचारिभिश्च समये समये उपयोगिपुस्तकप्रदानसाहाय्येन यद् उपकृतं तदर्थमहं तान् प्रति कृतज्ञतां प्रकटयामि।

झज्जरस्थगुरुकुलस्य प्रधानाचार्यैः श्री विजयपाल-योगार्थि-महाभागैरस्य शोधकार्यस्य सम्पन्नतायामतीव सहृदयतया बहुविधं विपुलं साहाय्यं कृतमिति तान् प्रति हार्दिकीं कृतज्ञतां प्रकटयामि।

अन्ते च परमपूजनीयं पितरं श्रीशिवचन्द-आर्यं प्रति श्रद्धया नतोऽस्मि यदीयशुभप्रेरणया एवाहमेतत् शोधकार्यं कर्त्तुं प्रवृत्तः पारं च प्राप्तः। सर्वविधपुण्यप्रेरणोद्गमं पूज्यं पितृदेवं प्रति कृतज्ञताज्ञापनम् उपचार एव स्यात्। वस्तुतस्त्वेत् सर्वं तत्कृपयैव फलितम्।

शोधप्रबन्धस्यास्य मुद्रणावसरे संशोधनकर्मणि विविधविद्यानिष्णातानां परमोदारचेतसां श्रीयुत-मुकुन्दलाठ-महाभागानां मार्गदर्शनं सहयोगश्च चिरस्मरणीयोऽस्ति। श्रीलाठमहाशयैः जयपुरीय-श्यामनगरस्थिते स्वीय-लाठसर्वोदयट्रस्ट-पुस्तकालये अध्ययन-सौविध्यं दत्वापि सुतरामुपकृतोऽस्मि। अतः श्री मुकुन्दलाठ-महोदयानां सौजन्यं प्रति प्रणतोऽस्मि कृतज्ञतया।

विनीतः

विजयपालशास्त्री

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शब्दसङ्क्षेपसूची

अथर्व०	:	अथर्ववेदः
अनर्घ०	:	अनर्घराघवम्
अनेकार्थ०	:	अनेकार्थसङ्ग्रहकोषः
अभि०	:	अभिधानचिन्तामणिकोषः
अमर०	:	अमरकोशः
अर्थप्र०	:	अर्थप्रकाशिका
अर्जुन०	:	अर्जुनरावणीयम्
अष्टा०	:	अष्टाध्यायी
अष्टा० प्रका०	:	अष्टाध्यायीप्रकाशिका
अष्टा० प्रथ०	:	अष्टाध्यायीप्रथमावृत्तिः
अष्टा० भा०	:	अष्टाध्यायीभाष्यम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आख्या०	:	आख्यातचन्द्रिका
आर्या०	:	आर्यासप्तशती
उणादि०	:	उणादिकोषः
उत्तर०	:	उत्तररामचरितम्
ऋग्०	:	ऋग्वेदः
किरा०	:	किरातार्जुनीयम्
कुमार०	:	कुमारसम्भवम्
कौ०अर्थ०अधि०अ०	:	कौटलीयार्थशास्त्रम्, अधिकरणम्, अध्यायः
कौ०कथा०	:	कौमुदीकथाकल्लोलिनी
गण० म०	:	गणरत्नमहोदधिः
चम्पू०	:	चम्पूभारतम्
चरक०	:	चरकसंहिता
चान्द्र०	:	चान्द्रव्याकरणम्
जैने० महा०	:	जैनेन्द्रव्याकरणमहावृत्तिः
त्रिकाण्ड०	:	त्रिकाण्डशेषकोषः
द्व्या०	:	द्व्याश्रयकाव्यम्
धा० पा०	:	धातुपाठः
निरु०	:	निरुक्तम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैष०	:	नैषधीयचरितम्
पद०	:	पदमञ्जरी
पा० मिता०	:	पाणिनीयमिताक्षरा
पाणि० भार०	:	पाणिनिकालीन भारतवर्ष
पा० सूत्र०	:	पाणिनिसूत्रव्याख्या
पार०गृ०	:	पारस्करगृह्यसूत्रम्
प्र०कौ०	:	प्रक्रियाकौमुदी
प्र० सर्व०	:	प्रक्रियासर्वस्वम्
प्रयोग० व्या०	:	प्रयोगरत्नमालाव्याकरणम्
बृहच्छब्दे०	:	बृहच्छब्देन्दुशेखरः
बौधा०	:	बौधायनधर्मसूत्रम्
भट्टि०	:	भट्टिकाव्यम्
भा० प्र०	:	भाष्यप्रदीपः
भाषा०	:	भाषावृत्तिः
मङ्ख०	:	मङ्खकोशः
मनु०	:	मनुस्मृतिः
म० भा० प्र० व्या०	:	महाभाष्यप्रदीपव्याख्यानानि
म० भा०	:	महाभाष्यम्
म० भार०	:	महाभारतम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मा० धातु०	:	माधवीया धातुवृत्तिः
मेघ०	:	मेघदूतम्
मेदि०	:	मेदिनीकोशः
यजु:०	:	यजुर्वेदः
वाच०	:	वाचस्पत्यम्
वासु०	:	वासुदेवविजयम्
वैज०	:	वैजयन्तीकोशः
व्या० चन्द्रो०	:	व्याकरणचन्द्रोदयः
व्या दी०	:	व्याकरणदीपिका
व्या० सि० सु०	:	व्याकरणसिद्धान्तसुधानिधिः
रघु०	:	रघुवंशम्
रा० नि०	:	राजनिघण्टुः
रामा०	:	रामायणम्
श०कल्प०	:	शब्दकल्पद्रुमकोषः
श० कौ०	:	शब्दकौस्तुभः
शाक० चिन्ता०	:	शाकटायनव्याकरणचिन्तामणिवृत्तिः
शिशु०	:	शिशुपालवधम्
शृङ्गार०	:	शृङ्गारप्रकाशः
श्रीभिक्षु०	:	श्रीभिक्षुशब्दानुशासनम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर०	:	सरस्वतीकाण्ठाभरणम्
सि०कौ०	:	सिद्धान्तकौमुदी
सि० कौ० बाल०	:	सिद्धान्तकौमुदी बालमनोरमा
सिद्ध० शब्दा०	:	सिद्धहेमशब्दानुशासनम्
सिद्ध० सर०	:	सिद्धहेमसरस्वतीवृत्तिः
सुदर्शन०	:	सुदर्शनशतकम्
सुभद्रा०	:	सुभद्राहरणम्
स्वर० चं०	:	स्वरसिद्धान्तचन्द्रिका
हरि० व्या०	:	हरिनामामृतव्याकरणम्
हर्ष०	:	हर्षचरितम्
हला०	:	हलायुधकोशः
हिन्दी०	:	हिन्दीशब्दसागर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रथमोऽध्यायः

पाणिनीयव्याकरणपरम्परा—

इह खलु लोकव्यवहारनिर्वहणाय भाषेव जुषते प्रधानभावम्। यथोक्तं दण्डिना—

> **इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
> **वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥**
> **इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्[1]।**
> **यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**

भाषायाः स्वरूपं सततं परिवर्तते। भाषा हि कठिन्यं जहाति सारल्यं च गृह्णाति। यदा भाषा लोकप्रिया सुसम्पन्ना च भवति तदा भाषाविदो भाषागतशब्दानामपभ्रंशेभ्यो रक्षणाय तेषां यथार्थस्वरूपपरिज्ञानाय च भाषाया व्याकरणमुपनिबध्नन्ति। इदमेव व्याकरणस्य प्रधानं प्रवृत्ति-निमित्तम् अस्ति। अस्मादेव हेतोः व्याकरणं शब्दानुशासनम् इत्युच्यते। तथा हि "अथ शब्दानुशासनम्"[2] इत्युक्तम्। अनुशिष्यन्ते साधुशब्देभ्यो विविच्य पृथग् ज्ञाप्यन्तेऽनेन[3] इति भावोऽस्तीति नागेशेन व्याख्यायते।

इत्थं शब्दानामनुशासनाय वैयाकरणैर्मनीषिभिः काले काले शब्दा-नुशासनानि प्राणीयन्त। तानि च देवभाषाव्याकरणानि वैदिकलौकिको-भयविधशब्दसाधुत्वप्रतिपादकानि परम्परया निबध्यन्ते स्म। प्राचीनकाले खलु यावन्ति शब्दशास्त्राणि निर्मितानि तेषु केवलं पाणिनीयमेवेदानीं साङ्गोपाङ्गमुपलभ्यते। व्याकरणमिदं संस्कृत-वाङ्मयस्यानुपमो निधिरिति स्वीक्रियते सर्वैः। सूत्रात्मकमिदं पाणिनीयं शब्दानुशासनम्। तच्चाष्टसु अध्यायेषु विभक्तम्, अत एव अष्टाध्यायी अष्टकम् इति वा कथ्यते। धातु-गण-उणादि-लिङ्गानुशासनानि अस्यैव सूत्रात्मकस्याष्टकस्य खिलभागत्वेन वर्त्तन्ते, अत इदं कृत्स्नं पञ्चाङ्गं व्याकरणमित्युच्यते।

---

1. काव्यादर्शः 1. 3–4,
2. म० भा० (कीलहार्नसंस्करणम्) भागः 1, पृ० 1,
3. उद्योतः (व्या० म० भा० भागः 1, गुरुकुल इज्जर संस्करणम् (1962) पृ०–3,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पाणिनिप्रणीतस्यास्य व्याकरणस्य रचनासौष्ठवं विशदतां विशालतां क्रमबद्धतां सूक्ष्मेक्षिकां च दृष्ट्वा पौरस्त्यैः पाश्चात्यैश्च विद्वद्भिरस्य गौरवं मुहुर्मुहुर्गीतम् । पाणिनीयव्याकरणस्य अनतिसाधारणरचनासौष्ठवात् तत्कालानुगुणत्वाच्च पूर्ववर्तीन्यन्यानि आपिशलादिव्याकरणानि कथामात्रावशिष्टानि बभूवुः[1] ।

पाणिनेः कालः—

गोल्डस्टुकरमहोदयः पाणिनेः समयं ख्रिष्टाब्दतः पूर्वं सप्तम-शताब्द्यां स्वीकरोति[2] । रामकृष्णगोपालभाण्डारकरमहोदयस्यापीदमेवाभिमतम्[3] । बहूनां विदुषां मतानि पर्यालोचयता डा० बेलवल्करमहाभागेनापि ई० पू० सप्तमशताब्दी एव पाणिनेः समयो[4] निर्णीतः । ग्रियर्सनमहाशयः 400 ई० पू० पाणिनेः समयममन्यत[5] । 500 ई० पूर्वतः परः पाणिनेः समयो नैव मन्तुं शक्यत इति मैकडानलमहोदयस्याशयः[6] । परम्परागतां भारतीयामनुश्रुतिं पाश्चात्यमतं च सम्यगालोच्य डा० वासुदेवशरण अग्रवालमहोदयेन पाणिनेः कालः 500 ख्रिष्टाब्दपूर्वः निर्धारितः । एतन्मतम् अग्रवालमहाशयेन परमतानि साधकबाधकयुक्तिपुरस्सरं खण्डयित्वा विवेचितम्[7] । अद्यत्वे विद्वांसः प्रायश एतन्मतमेवाङ्गीकुर्वन्ति ।

---

1. युधिष्ठिरमीमांसकः, सं० व्या० शा० इति० भागः 1, पृ० 7, 62–78,

2. टी. गोल्डस्टुकर, पाणिनि, पृ० 108,

3. द्र. प्रक्रियाकौमुदीविमर्शः, प्रथमोऽध्यायः पृ० 2,

4. द्र. तत्रैव ।

5. द्र. तत्रैव ।

6. द्र. तत्रैव ।

7. पाणिनिकालीन भारतवर्ष पृ० 468,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पाणिनिकाले संस्कृतं लोक-भाषा आसीत्। सा परिर्वात्तिनी जीवन्ती चावर्त्तत। पाणिनिना प्राग्भवानि व्याकरणान्याश्रित्य कालक्रमेण लब्ध-प्रसरान् नूतनान् शब्दान् प्रयोगांश्च यथाशक्ति सङ्गृह्य नवं व्याकरणं प्रणीतम्। पाणिन्युत्तरकालेऽपि भाषा परिर्वात्तिनी आसीत्। सा चोत्तरोत्तरं स्फीता बभूव। तदित्थं प्रचलितं पाणिनीयं व्याकरणमसम्पूर्णमिव मन्यमानो भगवान् कात्यायन उक्तानुक्तदुरुक्तचिन्तनात्मकं वार्त्तिकं विरचय्य तत् सम्पूर्णं समृद्धं चाकरोत्। वार्त्तिकानां सन्निवेशेनेदं शास्त्रं भूयोऽपि गौरवा-स्पदं समृद्धं चाभूत्। कात्यायनप्रणीतं वार्त्तिकजातं पाणिनीय-व्याकरणस्या-तीव महनीयमङ्गं मन्यते। वार्त्तिकरहितमस्य व्याकरणस्याध्ययनं नैव पूर्णतामर्हति। अतः कात्यायनवार्तिकोपबृंहितं विवरणादिभिश्च समुद्दी-पितं पाणिनीयतन्त्रं सर्वत्र लब्धप्रचारमभवत्।

डा० एस० के० वेलवलकरमहोदयेन कात्यायनस्य समयः ख्रिष्टाब्दतः पूर्वम्–350–500 पर्यन्तं निर्धारितः[1]। श्रीशचन्द्रचक्रवर्त्तिमहोदयोऽपि 350 ख्रिष्टाब्दपूर्ववर्त्ती कात्यायन इति निर्धारितवान्[2]। एतद्विषये इदमेव मतं प्रायः सर्वैरैतिहासिकैरङ्गीक्रियते। केचन तु कथासरित्सागरमधिकृत्य पाणिनि-कात्यायनयोः समकालिकत्वं कल्पयन्ति। तत्तु ऐतिहासिकदृष्ट्या पोषक-प्रमाणाभावाच्च न सम्यक् प्रतिभाति। तस्मात् सारासारविवेचनेन ज्ञायते यत् कात्यायनः ख्रिष्टाब्दात् पूर्वं 350 तः नातिदूरवर्ती।

कालान्तरे नैकैर्वैयाकरणैः सवार्त्तिकमिदं पाणिनीयाष्टकं व्याख्या-तम्। परं यदा तत् कालक्रमेण दुर्गममभवत्तदा कात्यायानवार्त्तिकानामेका प्रौढा व्याख्या भगवता पतञ्जलिना विरचिता या सम्प्रति महाभाष्यनाम्ना विश्रुता वर्तते। इत्थं पाणिनेः शब्दानुशासनं सवार्त्तिकं सभाष्यं टीको-पटीकाभिः समुपबृंहितं पाणिनीयतन्त्रं पाणिनीयव्याकरणम् इति वा प्रथितं बभूव। पाणिनिकात्यायनपतञ्जलीतिमुनित्रयप्रतिभाप्रसूतं व्याकरणम् उत्तरोत्तरं समृद्धं सद् लोके प्रसारमवाप्तवत्।

---

1 एस० के० वेलवलकर, स्टडी श्राफ संस्कृत ग्रामर, पृ०–29,

2 न्यासः (श्रीशचन्द्रचक्रवर्तिसम्पादितः) भागः–1, प्रस्तावना पृ०–6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पतञ्जलेः कालविषये इतिहासविदां वैमत्यं नास्ति "इह पुष्यमित्रं याजयामः"[1] इत्यादिभाष्यगतान्युदाहरणान्याश्रित्य पुष्यमित्रसमकालिकोऽयम् इति मन्यते। पुष्यमित्रस्य कालश्च ई० पू० द्वितीयशताब्द्याम् इति सुविदितमेव। अतः ख्रिष्टाब्दतः पूर्वं द्वितीयशतके पतञ्जलेः समय इति गम्यते।

काशिकावृत्तिः :

पाणिनीयसूत्राणां सम्प्रति काशिकैवैका प्राचीनतमा वृत्तिरुपलभ्यते। महाभाष्यादनन्तरं काशिकावृत्तिरेव सर्वाधिकं महत्त्वपूर्णं ग्रन्थरत्नं विद्यते। इयं वृत्तिः पाणिनीयव्याकरणपरम्परां सविशेषमात्मसात् करोति। पाणिनिसूत्रजालमारभ्य महाभाष्यपर्यन्तमविच्छिन्नतया प्रसृता व्याकरणपरम्परा अस्यां वृत्तौ साररूपेण समाविष्टाऽस्ति।

काशिकावृत्तेः प्रणेतारौ

वामनजयादित्यौ काशिकायाः प्रणेतारौ इति विद्वत्सम्प्रदायोऽभिमन्यते। यद्यपि एतादृशानि प्रमाणान्यपि लभ्यन्ते यैर्ज्ञायते द्वाभ्यामप्याभ्यां विद्वद्भ्यां पाणिनीयसूत्राणां द्वे पृथक्-पृथक् वृत्ती रचिते आस्ताम्[2], किन्तु सम्प्रत्युपलभ्यमाना काशिका-वृत्तिः द्वयोरपि विदुषोः सम्मिलिता कृतिः मन्यते। विद्वत्परम्परया काशिकाया आदिमाः पञ्च अध्यायाः जयादित्यप्रणीताः, अन्तिमास्त्रयोऽध्यायाश्च वामनप्रणीता इति मन्यते।

काशिकाकृतोरनयोः कालः ऐतिह्यविद्भिः 550–600 ई० मध्यवर्ती मन्यते। काशिकामधिकृत्य शोधकार्यं कृतवता डा० रघुवीरवेदालंकारमहोदयेन[3] च विस्तृतविवेचनपुरस्सरमयमेव कालः काशिकावृत्तेः रचनाकाल इति प्रदर्शितम्।

---

1 म० भा० 3.2.123,

2 काशिकावैयाकरणसिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्, पृ०–20,

3. काशिका का समालोचनात्मक अध्ययन, पृ०–36–48,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

काशिकाया नामकरणं रचनास्थानं च

"काश्यादिभ्यष्ठञ्ञिठौ"[1] इति सूत्रेण काशिशब्दाद् ञ्ञिठ्प्रत्यये विहिते "काशिका" इति शब्दो निष्पद्यते। सूत्रमिदं "तत्र भव" इत्यर्थे प्रत्ययविधानं करोति। सम्भवत एतदेवाश्रित्य हरदत्तमिश्रः काशिषु काशिकायाः रचनां मनुते—"काशिकेति देशतोऽभिधानम्। काशिषु भवा"[2]। हरदत्तोक्तमिदं कथनं प्रायेणान्ये विद्वांसोऽपि स्वीकुर्वन्ति डा० रघुवीरवेदालंकार महोदयस्य मतं त्वेतस्माद् भिद्यते। तन्मतेन काशिकाशब्देन ग्रन्थस्य सूत्रार्थप्रकाशनपरत्वं ध्वन्यते। भाषावृत्त्यर्थविवृतिकारेण सृष्टिधराचार्येणाप्येतदेव निर्दिश्यते—"काशयति प्रकाशयति सूत्रार्थमिति काशिका"[3]। काशिकायामादौ मङ्गलाचरणश्लोकेऽपि विवृतगूढसूत्रार्थेति विशेषणमेनमेवाभिप्रायं ग्रन्थकर्त्तुर्द्योतयति। अतः डा० रघुवीरवेदालंकारमहोदयस्य मतेन सूत्रार्थानां सुप्रकाशकत्वमेवास्याः प्रकृतनाम्नि बीजम्[4] इति।

वेदालंकारमहोदयः काशिकायाः रचना काश्मीरदेशे जाता न तु काशिषु इति सम्भावयति[5]। अस्य मतस्य पुष्ट्यर्थं तस्य तर्कोऽयमस्ति यत् काशिकायाम् इतरवैदिकग्रन्थापेक्षया यजुर्वेदस्य तच्छाखानां चोदाहरणान्यधिकानि सन्ति। विदुषां चेयं धारणाऽस्ति यद् यजुर्वेदसम्बन्धिसाहित्यस्य रचना प्रसारश्च सर्वप्रथमम् उत्तर-पश्चिमभारते बभूवेति। इत्थं वेदालंकारमहोदयस्येदं मतं विचारणीयतामापद्यते अवहेलनीयं च नास्ति, यद्यप्यत्र प्रमाणान्तरमप्यपेक्षितम् अस्ति।

---

1. अष्टा० 4.2.116,
2. द्र. श्रीशचन्द्रचक्रवर्त्तिसम्पादितभाषावृत्तेः भूमिका—पृ०—19;
3. काशिका-हिन्दीव्याख्या (रघुवीरवेदालंकार) प्रथम भागः भूमिका, पृ० 10,
4. तत्रैव।
5. तत्रैव।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

6, काशिकागतविशिष्टोदाहरणानाम् अर्थः प्रयोगश्च

काशिकावृत्तेर्वैशिष्ट्यम्–

पाणिनीयव्याकरणसम्प्रदाये महाभाष्यानन्तरं काशिकैव सविशेषं प्रमाणपदवीमवगाहते। उपलब्धासु सर्वासु वृत्तिष्वियं प्राचीनतमा प्रौढतमा च विद्यते। काशिकायां पूर्ववर्तिव्याकरणवाङ्मयस्य सारभूतोऽंशः नितरां कौशलेन सङ्गृहीतोऽस्ति। यथा हि स्वयं वृत्तिकारः ग्रन्थादावाह्––

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः॥

इष्ट्युपसङ्ख्यानवती शुद्धगणा विवृतगूढ-सूत्रार्था।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम॥

व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण॥

यदीत्थम्भूतवैशिष्ट्यान्वितेयं काशिकावृत्तिर्नाभविष्यत्तर्ह्यद्य पाणिनीयसूत्राणामर्थज्ञानम् उदाहरणप्रत्युदाहरणज्ञानं चासम्भवमभविष्यद् इति वासुदेवशरण अग्रवाल महोदयः[1]। वृत्तिरियं पाणिनीयव्याकरणशास्त्रपरम्परायां परिपूर्णःसुसमृद्धश्च भाण्डागारोऽस्ति, यत्र विपुला प्राचीनव्याकरणवाङ्मयसामग्री सुरक्षिता जाता। सत्यमेवेदं यत्पाणिनेर्दुग्धामृतं पातुं काशिकेयं कामधेनुरूपा विद्यते। यथा शास्त्रकारेण सुविहितमिदं शास्त्रं कृतं तथा वृत्ति-कारेणापि अर्थोदाहरण-प्रत्युदाहरणशङ्का–समाधान–वार्तिककारिका-विन्यास-पूर्वकं सुसज्जिता सुनिबद्धा चेयं वृत्तिर्गुम्फिता। सुविहितं पाणिनीयं तन्त्रं काशिकावृत्तिकारस्य कृपयैवेदानीन्तनानां जनानां सुलभं जातम्। काशिकातोऽर्वाचीना वृत्तिकाराः प्रक्रियाग्रन्थकारा वा काशिकाया अधमर्णाः सन्ति।

1– पाणिनिकालीन भारतवर्ष, द्वितीय संस्करण, पृ०–32

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निम्नाङ्कितश्चास्या विशेषा परिगणिता भवन्ति–

उपलब्धवृत्तिषु सर्वाभ्यः प्राचीनेयं वृत्तिः ।

अस्यां प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि शङ्कासमाधान-निर्देशपुरस्सरं लभ्यन्ते, अत्र च प्रौढतया तत्प्रतिपादनं वर्त्तते ।

सन्त्यस्यां वृत्तौ कतिपयानि स्थलानि महाभाष्य-विरुद्धानि, सत्यप्येवमस्या उपपत्तिबर्हुशोभना वर्तते ।

भाष्यानुक्तानामनेकविषयाणामत्र प्रतिपादनं दृश्यते यदन्यत्रानुपलब्ध मासीत् ।

काशिकातः प्राचीनासु वृत्तिषु कुण्यादिषु गणपाठो नासीद् अस्यां तु यथास्थानमुपलभ्यते ।

सूत्राणां व्याख्या बहुषु स्थलेषु प्राचीनवृत्तीनामाधारेण कृतास्ति, तेन तासां वृत्तीनामर्थप्रकारस्य ज्ञानमपि जायते, ऐतिहासिकदृष्ट्याप्ययं ग्रन्थोऽतीव मूल्यवान् इत्यैतिह्यविदां मतम् ।

उदाहरणानां दृष्ट्या काशिकाया महत्वम्–

उदाहरणानां क्षेत्रे पाणिनीयव्याकरणपरम्परायां काशिकाया विशिष्टं योगदानमस्ति । काशिकायामुदाहरणानि प्राचीनानि परम्पराक्रमागतान्येवोपलभ्यन्ते, तानि महाभाष्यानुसारीणि सन्ति, प्राचीनवृत्त्यनुसारीणि वा । अत एव "सकिखि" इति काशिगतोदाहरणविषये पदमञ्जरीकारो हरदत्तः "अप्रसिद्धोदाहरणं चिरन्तन-प्रयोगात्" इति निर्दिशति(1) । काशिकावृत्तेरनया शैल्या परम्परागतानां प्राचीनोदाहरणानां रक्षा जाता । अनेन ऐतिहासिकसामग्री अपि प्राचुर्येण सुरक्षिताभवत् । उत्तरवर्त्तिव्याकरणपरम्परायां प्रक्रियाक्रमाश्रितानां ग्रन्थानाम् अवलोकनेनेदं सुस्पष्टं ज्ञायते यत्काशिकागतानामुदाहरणानां मूलस्थानं महाभाष्ये, अथवा काशिकातः पूर्ववर्तिषु व्याकरणग्रन्थेषु प्रतिष्ठितमस्ति ।

1– यथा–द्र.–पद० 2·1·6–इत्यत्र "सकिखि" इत्युदाहरणव्याख्याने ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रक्रिया-क्रमावलम्बिषु ग्रन्थेषु तु कानिचिद् उदाहरणानि परम्पराप्राप्तानि कानिचिच्च नूतनानि कल्पितानि, अन्येभ्यो वाङ्मयग्रन्थेभ्यो वा गृहीतानि । नवीनोदाहरणानामियं शैली विशेषतो रामचन्द्राचार्यस्य प्रक्रिया-कौमुदी-ग्रन्थे समुपलभ्यते । ततस्तदुत्तरवर्त्तिभिस्तस्यैव मार्गोऽनुसृतः । भट्टोजिदीक्षितेन इमामेव नूतनपरम्परामाश्रित्योदहरणप्रदर्शनं कृतम् ।

लक्ष्यं लक्षणं चैतद् द्वयं समुदितं व्याकरणं मन्यते(1) । अनया दृष्ट्या लक्षणैः सह लक्ष्याणाम् अध्ययनम् अपि अपरिहार्यं महत्त्वपूर्णं चास्ति । अस्मिन् प्रकृते शोधकर्मणि एतानि कानिचिद् लक्ष्याणि एवाध्ययन-विषयाणि कृतानि । काशिकावृत्तिश्च खलु परम्परागतविपुलोदाहरणसम्भृता वर्त्तते, अत इमामेवाश्रित्यास्मिन् शोधप्रबन्धे केषाञ्चिद् विशिष्टोदाहरणानाम् अर्थ-प्रयोगयोर्विमर्शो विधीयते ।

॥ इति प्रथमोऽध्यायः ॥

1– "लक्ष्यलक्षणे व्याकरणम्" ।

म०भा० (पस्पशाह्निकम्) प्रथमखण्डः पृ०–12 (पूना)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीयोऽध्यायः

काशिकावृत्तिप्रथमाध्यायगतविशिष्टोदाहरणानाम् अर्थः प्रयोगश्च

वृद्धिर्यस्याचामादिस्तद् वृद्धम् (1. 1. 73)

इह वार्त्तिकम्—जिह्वाकात्यहरितकात्यवर्जम् ।

गोत्रान्तादसमस्तवत् प्रत्ययो भवतीत्येत् पूर्ववार्त्तिकं जिह्वाकात्य-हरितकात्यवर्जमेव प्रवर्त्तते । अनयोस्तु विषये न प्रवर्त्तते । जैह्वाकाताः, हारितकाताः । अत्रौत्सर्गिकोऽण् एव[1] ।

व्युत्पत्तिरर्थश्च—

कतस्यापत्यं कात्यः । गर्गादित्वाद् यञ्[2] । कात्यशब्दो गोत्रप्रत्ययान्तः । जैह्वाकाताः, हारितकाता इत्युदाहरणयोः प्रकृतिः - जिह्वाकात्य हरितकात्य इत्यस्ति । जिह्वाकात्य–हरितकात्य शब्दयोरर्थः काशिकायां न प्रदर्शितः । न्यासकार अत्राह—

जिह्वाचपलः कात्यः जिह्वाकात्यः । हरितभक्षः कात्यो हरित-कात्यः" इति[3] । (इह "शाकपार्थिवादीनाम्" इति समास उत्तरपद-लोपश्च) पदमञ्जरीकारोऽप्येतदेवानुवदति[4] । अन्नम्भट्टो महाभाष्यप्रदीपस्य व्याख्यानभूते उद्योतने[5] विश्वेश्वरसूरिश्च व्याकरणसिद्धान्तसुधावेनमेवार्थं समर्थयति[6] ।

---

1. प्राग्दीव्यतोऽण् । अष्टा० 4·1·83,
2. गर्गादिभ्यो यञ् । अष्टा० 4·1·105,
3. काशिका (न्यासपदमञ्जरीसहिता) प्रथमो भागः, पृ० 257, प्र० सं०, ताराप्रकाशन बनारस ।
4. काशिका (न्यासपदमंजरीसहिता) प्र० भा० 1·1·73/प्र० सं० ।
5. जिह्वाचपलो हरितभक्षकश्च कात्यः । म० भा० प्र० व्या०, तृतीयभागः, पृ०296, प्र० सं० ।
6. जिह्वाचपलः कात्यो जिह्वाकात्यः । हरितभक्षः कात्यो हरितकात्यः । व्या० सि० सु० 1·1·73,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जिह्वाकात्य इत्युच्यते । जिह्वया चपलो जिह्वाचपलः कात्यो जिह्वाकात्यः । हरितो भक्षः—भोज्यं पत्रशाकादिकं प्राधान्येन यस्य स हरितभक्षः । हरितभक्षः कात्यो हरितकात्य इति । जिह्वाकात्यस्य छात्रा जैह्वाकाताः । हरितकात्यस्य छात्रा हारितकाताः । "यस्येति च"[1] इत्यलोपः । "आपत्यस्य च तद्धितेऽनाति" इति[2] यलोपः ।

युधिष्ठिरमीमांसकेन जिह्वाचपलः कात्यो जिह्वाकात्यः इत्यस्यार्थो "बहुभाषी कात्यः इति निर्दिष्टः[3] । अस्यार्थःजिह्वालोलुपः कात्यः इत्यपि सम्भवति । हरिभक्षः कात्य इत्यपरं पठ्यते । तत्साहचर्येण जिह्वाचपलः जिह्वालोलुपो भक्ष-विषये कात्य इत्यपि तर्कयितुं शक्यते । कोऽयं कात्य इति नहि किञ्चिद् इतिवृत्तं लभ्यते । वार्त्तिके खल्विदं पठ्यते-"जिह्वाकात्य-हरितकात्यवर्जम्" इति । तेनायं वार्त्तिककारादन्य एव कात्य इति प्रतीयते ।

भट्टोजिदीक्षितकृतोऽर्थभेदः, तत्समीक्षा च

हरितभक्षः कात्य इत्यतो विपरीतम् आचार्य-दीक्षित आह शब्दकौस्तुभे[4]—"जिह्वाचपलो हरितवर्णश्च कात्यः । तस्य छात्रा इत्यर्थेऽणेव भवति" । ओरम्भट्टो व्याकरणदीपिकायाम्[5], पण्डित-रुद्रधरशर्मा च महाभाष्यनवाह्निकस्य तत्त्वा-लोकटीकायां[6] दीक्षितमेवानुसरतः ।

---

1. अष्टा० 6.4.148,
2. अष्टा० 6·4·151,
3. द्र.-म० भा० हिन्दी व्याख्या, 1.1.73, पृ० 831, प्र० सं०
4. श० कौ० 1.1.73, पृ०-296, प्र० सं०, चौखम्बा संस्कृत ग्रन्थमाला बनारस ।
5. जिह्वाचपलो हरितवर्णश्च कात्यः व्या० दी०-1.1.73.
6. हरितवर्णः कात्यो हरितकात्यः, म० भा० तत्वा०, 1.1.73, चौखम्बा संस्कत-सीरीज बनारस ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रोच्यते, नहि खलु कश्चिद् हरितवर्णो मनुष्यो लोके दृश्यते श्रूयते वा । वर्णेन गौराः, पिंगलाः, काला आश्वेताश्च जना धराया विभिन्नभागेषु सन्ति । हरितास्तु नहि खलु । अथ यदि हरितशब्दोऽत्र श्यामपर्यायो[1] मन्येत, भवन्ति च श्यामाः पुरुषा इति चेत् तदापि न युज्यते । कुतः ? उत्तरपदलोपसमासोऽत्र मन्यते[2], एवञ्च सति हरितः कात्य हरिकात्य इति विशेषणसमासेनैव सिद्धम्[3], नैवोत्तरपदलोपस्य प्रसङ्ग उपपद्यते । तद्यथा नीलम् उत्पलम् नीलोत्पलम्, कृष्णः पुरुषः कृष्णपुरुषः, श्वेतोऽश्वः श्वेताश्व इति । अतो हरितभक्षः कात्यो हरितकात्य इति यत्कैय्यटादिभिः प्रतिपादितं तदेव युक्ततरं प्रतीयते ।

---

1. हरितशब्दोऽयं श्यामपर्यायः साहित्ये प्रयुज्यमानो दृश्यते । तथा चामरकोषे- "पलाशो हरितो हरित्" (1·5·14) । मेघदूते च "पत्रश्यामा दिनकरहय-स्पर्धिनो यत्र वाहाः" । अत्राह मल्लिनाथः—"यत्र विशालायां वाहा हया दिनकर-हयस्पर्धिनो वर्णतो वेगतश्च सूर्याश्वकल्पाः" (पूर्वमेघः, श्लोकसङ्ख्या 31 ग, संजीवनीटीका, पृ० 71.72, विश्वविद्यालय प्रकाशन वाराणसी, 1981) । सूर्यस्य च हरिदश्व इति नामान्तरमपि—

   हरिदश्वो जगत्कर्मसाक्षी भास्वान् विभावसुः ।
   त्रयीतनुर्जगच्चक्षुस्तपनोऽरुणसारथिः ।। अभिधानचिन्तामणिः 2·12,

अन्यच्चापि दृश्यते—

   सब्रह्मचारी नवमेघरुच्याः सोदर्यदेश्यो हरिदश्मभासाम् ।
   तमालकान्तेः सदृगाननन्दत् प्रभोद्गमः कश्चन जम्पती तौ ।।

वसुदेवसुतस्य कृष्णस्य कायकान्तिमधिकृत्य वासुदेवविजयाख्ये काव्ये (3·8) इति ।

2. "समानाधिकरणे शाकपार्थिवादीनामुत्तरपदलोपश्च" इति वार्तिकविधानात् (काशिका 2·1·60)

3. विशेषणं विशेष्येण बहुलम् (अष्टा० 2.1.56)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रीडोऽनुसम्परिभ्यश्च [1. 3, 21]

क्रीडृ विहारे एतस्माद् अनु-सम्-परि-इत्येवम्पूर्वाद् आङ्पूर्वाच्चात्मेनेपदं भवति। अनुक्रीडते। सङ्क्रीडते। परिक्रीडते। आङः खल्वपि—आक्रीडते[1]।

अथैतेषामुदाहरणानामर्थः प्रयोगश्च मीमांस्यते--

अनुक्रीडते-

"क्रीडोऽनुसम्परिभ्यश्च" इत्यत्र समा साहचर्यादन्वादिरुपसर्गो गृह्यते[2]। "अनु" इत्युपसर्गश्च पश्चात्सादृश्ययोरर्थयोः प्रयुज्यते(3)। "अनुक्रीडते" इत्यस्य पश्चात्क्रीडति इत्यर्थः। अनुक्रमेण क्रीडति इति वार्थः अनुक्रमः= पश्चात्क्रमः। पूर्वं क्रीडतः पश्चात् क्रीडन्-अनुक्रीडतेऽयम् इत्युच्यते।

---

1. काशिका 1·3·21·

2· काशिका 1·3·21·

3· पश्चात्सादृश्ययोरनु, अमर० 3·3·248,
अनुरिति तृतीयार्थे =(सहार्थे) हीनेऽर्थे लक्षणेत्थम्भूताख्यानभागवीप्सासु चार्थेषु प्रयुज्यमानस्तु कर्मप्रवचनीयसंज्ञो भवति,तृतीयार्थे (अष्टा० 1·4.84) हीने (अष्टा० 1·4·85) लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः (अष्टा० 1.4.89) इति विधानात्। एष्वर्थेषु अनोः कर्मप्रवचनीयत्वाद् उपसर्गसंज्ञा न भवति। कुतः ? एकसंज्ञाधिकारत्। तस्मादेतेष्वर्थेषु कर्मप्रवचनीयस्यानोर्योगे क्रीड्धातोरात्मनेपदस्य प्रवृत्तिर्न भवति। तेन माणवकमनुक्रीडति(तेन सहेत्यर्थः)इत्यादिष्वात्मनेपदाभावः। आत्मनेपदविधाने हि समा साहचर्यात् अन्वादिरुपसर्गो गृह्यत इति व्याख्यानम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वं क्रीडतोऽनुक्रीडनं प्रायेण तत्सदृशमेव भवतीति सादृश्यार्थोऽप्यत्रान्तर्भुक्तो भवति। प्राधान्येन पश्चात् क्रीडति इत्येवार्थः। अयमेव चार्थः प्रदर्श्यमानैः प्रयोगैरपि स्फुटमभिव्यज्यते। तद्यथा अर्जुनरावणीये महाकाव्ये भूमभट्टः प्रयुङ्क्ते[1]—

ध्वनन्मृदंगं प्लुतिलम्बितासनं नृपेऽधिरूढे विधृतोष्णवारणे।
क्ष्मोपपीडं चलचारुचामरो हरिः समक्रीडत वल्गुवल्गितैः॥

दृष्ट्वा क्रीडन्तं वल्गुवल्गा नृपाणामन्वक्रीडन्त क्रान्तपृथ्वीविभागाः।
चित्रं मन्येऽहं भानवीया यदश्वाः पर्यक्रीडन्त व्योमतो वावतीर्य[2]॥

नर्मदाविहाराय राज्ञः कार्तवीर्यस्य माहिष्मतीपुर्याः प्रस्थानोपक्रम इति प्रसंगः।नृपेऽर्जुनेऽश्वमधिरूढे स हरिः अश्वो वल्गुवल्गितैः समक्रीडत। तं क्रीडन्तं दृष्ट्वा नृपाणां अश्वा अन्वक्रीडन्त पश्चादक्रीडन्नित्यर्थः। अत्र पश्चात्क्रीडने प्रयोगः।

भट्टिकाव्ये चापि–

फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु।
साध्वनुक्रीडमानानि पश्य वृन्दानि पक्षिणाम्[3]॥

साधु अनुक्रीडमानानि अनुक्रमेण क्रीडन्ति, पूर्वमेकः क्रीडति, तत्पश्चादपर इत्येवं परस्परमनुक्रीडमानानि पक्षिणां वृन्दानि पश्येत्यर्थः[4]। अत्रानुक्रमेण पश्चात्क्रमेण क्रीडनेऽयमात्मनेपदप्रयोगः।

---

1. अर्जुनरावणीयं नाम महाकाव्यं पाणिनीयव्याकरणोदाहरणसमापनीयं काश्मीरक-कवि-भूमभट्टविरचितं लभ्यते। इदं रावणार्जुनीयम् इत्यपरनाम्नापि व्यवहृते। काव्यमिदं पण्डितशिवदत्तकाशिनाथाभ्यां सम्पादितम्। निर्णयसागर-मुद्रणालयाध्यक्षेण च 1900 तमे ख्रिष्टाब्दे प्रकाशितम्। मुद्रितग्रन्थो मध्ये-मध्ये खण्डितोऽप्यस्ति।
2. अर्जुनरावणीयम्, सर्गः 2. श्लोकः 11–12,
3. भट्टिकाव्यम् 8. 12;
4. यद्यप्यत्र मल्लिनाथ-जयमंगलमप्रभृतिभिर्व्याख्याकारैः "अनुक्रमेण क्रीडनं पश्चात् क्रीडनं वा" इत्ययमर्थो न निर्दिष्टः तथापि उपसर्गस्य धात्वर्थोपकारकत्वाद् अत्रास्यार्थस्याभ्युपगमने न कापि विप्रतिपत्तिः स्यात्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्व्याश्रयकाव्ये हेमचन्द्राचार्योऽपि अस्मिन्नेवार्थेऽनुपूर्वात् क्रीड्धातो-रात्मनेपदं प्रयुङ्क्ते–

अननुक्रीडमानायाक्रीडमानाः कृतक्रुधे ।

राजन्या अशपन्तास्मै नाथन्ते स्म यतोऽस्य ते[1] ॥

आक्रीडमाना राजन्याः = राजकुमारा आसन्, दुर्लभराजाख्यो राजकुमारस्तान् राजन्यान् क्रीडतो नानुक्रडते, इत्यननुक्रीडमानाय कृतक्रुधे ते राजन्या अशपन्त इत्यन्वयः। अत्रापि पश्चात्क्रीडनेऽनुक्रमेण वा क्रीडनेऽर्थे आत्मनेपद-प्रयोग इति स्पष्टम्।

उपसर्गार्थचन्द्रिकायाम् आचार्यचारुदेवोऽस्मिन्नेवार्थेऽनुक्रीडतेः प्रयोगं प्रदर्शयति– 'अनुक्रीडन्ते कुमाराः सम्बाधेऽस्मिन् गृहांगने। अनुक्रमेण क्रीडन्तीत्यर्थः[2]।

सङ्क्रीडते—

सम्यक् क्रीडतीत्यर्थः। अस्मिन्नेवार्थे चास्य प्रयोगोऽर्जुनरावणीये दृश्यते—

"क्ष्मोपपीडं चलचारुचामरो हरिः समक्रीडत वल्गुवल्गितैः" ।[3]

हरिरश्वो वल्गुवल्गितैः समक्रीडत सम्यगक्रीडद् इत्यर्थः। क्रीडोत्कर्षः खल्वत्र व्यज्यते ।

"सङ्क्रीडन्ते" इति प्रयोगममुं प्रयुङ्क्ते मेघदूते कालिदासः—

"सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः" ।[4]

---

1. द्व्या० 7. 18,
2. उपसर्गार्थचन्द्रिका, द्वितीयखण्डः, पृ० 223,
3. अर्जुन० 2. 11,
4. मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिः
मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ उत्तरमेघः 4,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतत्पद्यं व्याचक्षाणो मेघदूतस्य संजीवनीटीकायामाह मल्लिनाथः– "सङ्क्रीडन्ते गुप्तमणिसञ्ज्ञया दैशिकक्रीडया सम्यक् क्रीडन्तीत्यर्थः"[1]। अत्रापि क्रीडनोत्कर्षो द्योत्यते। एवं मल्लिनाथमतेनात्र सम्पूर्वस्य क्रीडतेः सम्यक् क्रीडनेऽर्थेऽयमात्मनेपदप्रयोगः।

आचार्यहेमचन्द्रोऽप्यस्मिन्नेवार्थे द्याश्रयकाव्य एतत् प्रयुङ्क्ते–

सङ्क्रीडच्छकटारूढाः समक्रीडन्त बदन्काः।
सद्यो मुक्ताः परिक्रीडमानैर्मिलित-बन्धुभिः ।।[2]

बन्दकाः = गुप्तौ क्षिप्ता नराः सद्योमुक्ता राजकुमारस्य जन्मसमकालमेव मुक्ताः परिक्रीडमानैर्मिलित-बन्धुभिः समक्रीडन्त सम्यगक्रीडन्, सम्यग् रेमिरे इत्यर्थः।

अष्टाध्यायीलक्ष्यपरिसमापनीये वासुदेवविजयाख्ये काव्ये वासुदेवकविः प्रयुङ्क्ते–

उत्तिष्ठसे कर्मणि किं जुगुप्सिते संविद्य धर्मे त्वयि तिष्ठते जनः।
सङ्क्रीडतां कीर्तिरदूषितैव ते का वा त्वरैषा ह्यवतिष्ठते वशे ।।[3]

देवकीवधायोद्यतं कंसं निवारयति वसुदेव इति प्रसङ्गः। हे कंस ! ते कीर्त्तिरदूषितैव सङ्क्रीताम् = सम्यक्क्रीडतात् प्रचरत्विति भावः। अत्रापि स एवार्थः। कीर्त्तेः सम्यक् क्रीडनमित्युत्कर्षो द्योत्यते।

ब्रह्मदत्तसूनुनारायणकविविरचिते सुभद्राहरणाख्ये व्याकरणोदाहरणकाव्येऽपि सङ्क्रीडतेः प्रयोगो दृश्यते। सुभद्राद्वितीयोऽर्जुन इन्द्रप्रस्थं गन्तुमनुज्ञामिच्छन् देवकीवसुदेवौ प्राह—

आगत्य च पुरीमेतां पुनः सङ्क्रीडितास्वहे।
देयाऽनुज्ञा तदावाभ्यां युवाभ्यां वत्सलौ गुरू ।।[4]

---

1. उत्तरमेघः, चतुर्थश्लोकस्य संजीवनीटीका, पृ० 145,
2. द्या० 7. 17,
3. वासु० 1. 45,
4. सुभद्रा० 15. 58,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तावूचतुः—

वत्सौ वां युक्तमेवेदमेतास्वो यन्निजं गृहम् ।
यच्च सङ्.क्रीडितासाथे तत्र मित्रादिभिस्सह ।।[1]

अत्रापि सम्यक् क्रीडनमित्यर्थो लभ्यते ।

कौमुदीकथाकल्लोलिन्यां रामशरणशास्त्रिकृतायाम् अयं प्रयोगो लभ्यते—"पुरुषस्तु योषिदनुपातेन स्वल्पमेव सन्मार्गमुच्चरते । कुलीनो हि स शैशवे स्वभावत एव सच्छिचशिषु सङ्.क्रीडते[2] ।" अत्रापि प्रसङ्.गानुरोधात् सम्यक् क्रीडति इत्यस्मिन्नेवार्थे ग्रन्थकारस्यायं प्रयोग इति गम्यते ।

सङ्क्रीडते इत्यस्य सङ्गतः क्रीडति सम्बद्धो वा क्रीडति इत्यपि अर्थः सम्भवति । कुतः ? सम् इत्युपसर्गस्य सङ्गतार्थे सम्बद्धार्थे वा प्रयोगोपलम्भात् तद्यथा—सम्बद्धा गतिः सङ्गतिः, सम्बद्धो वासः संवासः इत्यादि । एवं सङ्गतः क्रीडति सम्बद्धो वा क्रीडति=सङ्क्रीडते इति युक्तं प्रयोक्तुम् । यथा च प्रयुङ्.क्ते व्याकरणचन्द्रोदये शाब्दिकश्चारु देवाचार्यः—

"पश्य, अध्ययनादुपरताश्छात्राः सोत्साहं सङ्.क्रीडन्ते (एक साथ खेलते हैं) ।"[3]

आचार्यराधारमणपाण्डेयः अर्थप्रकाशिकाख्ये सिद्धान्तकौमुदीगतोदाहरणार्थप्रदर्शनपरके ग्रन्थ एतदेवाह—"सङ्.क्रीडते-वह एक साथ खेलता है ।"[4]

अथ पुरातन-प्रयोगश्चायं दृश्यते यत्रायमर्थो निर्बाधं सङ्.घटते—

पुरा राम कृतोद्वाहः शितिकण्ठो महतपाः ।
दृष्ट्वा च भगवान् देवीं मैथुनायोपचक्रमे ।।
तया सङ्.क्रीडमानस्य महादेवस्य धीमतः ।
शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ।।[5]

---

1. सुभद्रा० 15.60,
2. कौ० कथा०, पश्चार्धः, नवमः कल्लोलः, पृ० 267,
3. व्या० चन्द्रो०, तृतीयः खण्डः, पृ० 151,
4. अर्थप्रकाशिका, आत्मनेपदप्रकरणम्, पृ० 451,
5. रामायणम्, 1.36.5–6, गीताप्रेस संस्करण,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र सङ्.क्रीडमानस्य देव्या सह रममाणस्येत्यर्थः प्रसंगात् सम्यग् लभ्यते। एतेन "सङ्.क्रीडते" इत्यस्य सङ्.गतः क्रीडति सम्बद्धो वा क्रीडति इत्यर्थोऽपि युक्तः।

यद्यप्यत्र सङ्.क्रीडमानस्य सम्यग् रममाणस्य इत्यर्थोऽपि शक्यः प्रतिपादयितुम्, तथापि सहार्थोऽप्यत्र प्रसंगानुकूलत्वाल्लब्धावकाश इति स्वीकर्त्तव्यः। युगपदुभावप्यर्थौ वा प्रतिपत्तव्यौ, अविरोधित्वाद्, अभिधेयस्योत्कर्षाधानत्वाच्च।

तथा चापरोऽप्ययं रामायणप्रयोगो लभ्यते, यत्रोभावपीमावर्थौ सङ्.घटेते। महाराजदशरथप्रयुक्ताभिर्गणिकाभिर्ऋष्यशृंगस्य प्रलोभनमिति प्रसंगः–

चित्रं सङ्.क्रीडमानास्ताः क्रीडनैर्विविधैस्तथा।
कन्दुकैश्चापि गायन्त्यः क्रीडन्त्यः प्लुतवल्गितैः॥[1]

इत्थमत्र प्रदर्शितेषूदाहरणेषु अतोऽन्यत्रोपलभ्यमानेषु चोदाहरणेषु यद्येवंविधिना द्वावपीमावर्थौ प्रसंगागतमौचित्यमनतिक्रम्य घटेते तर्हि तदंगीकारे न कापि विप्रतिप्रत्तिः स्यात्।

परिक्रीडते–

परितः सर्वतः क्रीडतीत्यर्थः। अथ प्रयोगाः, अर्जुनरावणीये–

"चित्रं मन्येऽहं भानवीया यदश्वाः पर्यक्रीडन्त व्योमतो वावतीर्य।"[2]

चित्रं मन्येऽहं यद् भानवीया[3] अश्वा व्योमतो वावतीर्य पर्यक्रीडन्त=परितः सर्वतोऽक्रीडन्नित्यर्थः।

भट्टिकाव्ये–

फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु।[4]

परितः सर्वतः क्रीडेत्यर्थः।

---

1. रामा०, 1.9.14, गीताप्रेस संस्करणम्.
2. अर्जुन० 2.12,
3. मुद्रितेऽर्जुनरावणीयेऽत्र, "भानवीयाः" इत्यस्य स्थाने "भावनीया" इति अपपाठोऽस्ति।
4. भट्टि० 8.10,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनर्घराघवे—

निर्मज्जच्चक्षुरन्तभ्र मदतिकपिशक्रूरतारा नरास्थि-
ग्रन्थिं दन्तान्तरालग्रथितमविरतं जिह्वया घट्टयन्ती ।
ध्वान्तेऽपि व्यात्तवक्त्रज्वलदनलशिखाजर्जरैर्व्यक्तकर्मा
निर्मान्ती गृध्ररौद्रीं दिवमुपरि परिक्रीडते ताटकेयम् ।।[1]

दिवमुपरि परिक्रीडते- परितः सर्वतः क्रीडति विहरतीत्यर्थः । भयङ्करमप्येतद् वृत्तं राक्षस्या आत्मानुरूपं क्रीडनम् ।

द्व्याश्रयकाव्ये—

सङ्क्रीडच्छकटारूढाः समक्रीडन्त बन्दकाः ।
सद्योमुक्ताः परिक्रीडमानैर्मिलितबन्धुभिः ।।[2]

सद्योमुक्ता बन्धनागाराद् बन्दकाः परिक्रीडमानैः=परितः सर्वतो विहरद्भिर्मिलितबन्धुभिः सह समक्रीडन्त इत्यन्वयः । अत्रापि परितः क्रीडनमित्यर्थः सम्यग् अभिव्यज्यते ।

आक्रीडते—

आसमन्तात् क्रीडतीत्यर्थः । अथ प्रयोगाः;

द्व्याश्रकाव्ये—

अननुक्रीडमानायाक्रीडमानाः कृतक्रुधे ।
राजन्या अशपन्तास्मै नाथन्ते स्म यतोऽस्य ते ।।[3]

आक्रीडमानाः=आसमन्तात् क्रीडन्त इति स्फुटमर्थोऽत्र लभ्यते ।

---

1. अनर्घ० 2·54

2. द्व्या० 7.17,

3. द्व्या० 7.18, श्लोकोऽयं "सङ्क्रीडते" इत्यस्यार्थविवरणप्रकरणे पूर्वं 14 तमे पृष्ठे सप्रसंगार्थमुद्धतः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वासुदेवविजये—

सुधाभुजोऽपि ण्यजिघृक्षदोजसा यः कालनेमिः स हि कंसतामयन् ।
जिगीषया सङ्कुटितापथा तिसृष्वाक्रीडते सम्प्रति लोकसीमसु ।।[1]

स हि कालनेमीतिनामासुरः सम्प्रति कंसतामयन् जिगीषया तिसृषु लोकसीमसु आक्रीडते—आसमन्तात् क्रीडति, सर्वत्र स्वैरं विहरतीत्यर्थः। अत्र हि आसमन्तात् क्रीडनमित्यर्थः खलु स्फुटतरः। अथैनमेवार्थमुद्दिश्य व्याकरणचन्द्रोदय आचार्य चारुदेवः प्रयुङ्क्ते—"आक्रीडन्ते लोका अत्रेत्याक्रीड उद्यानम्[2]।"

अर्थप्रकाशिकायाम् आचार्यराधारमणपाण्डेयः "सङ्क्रीडते" इत्यस्य त्वर्थविशेषमाह—"एक साथ खेलता है" इति, परम् अनुक्रीडते, परिक्रीडते, आक्रीडते—इत्येतेषामुदाहरणानां "क्रीडति" (खेलता है) इत्येतन्मात्रमर्थं प्रदर्शयति[3]। सङ्क्रीडते इतिवदत्रापि उपसर्गकृतो धात्वर्थोपकारोऽस्ति इत्युपसर्गकृतो विशेषः प्रतिपादयितव्यः।

अथ "क्रीडोऽनुसम्परिभ्यश्च" इत्यत्र "आगमेः क्षमायामात्मनेपदं वक्तव्यम्" इति वार्त्तिकं पठ्यते। अस्य च "आगमयस्व तावन्माणवकम्" इत्युदाहरणं लभ्यते काशिकायाम्[4]। इदम् उदाहरणवाक्यम् अपपाठयुक्तं प्रतीयते। अथास्य समीक्षणं क्रियते।

---

1. वासु० 1. 6,

2. व्या० चन्द्रो०, चतुर्थः खण्डः, पृ० 451,

3. अर्थप्र०, आत्मनेपदप्रकरणम्, पृ०—151,

4. काशिका 1. 3. 21,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अद्यत्वे मुद्रितकाशिकापुस्तकेषु प्रकृतोदाहरणवाक्ये "माणवकम्" इति पाठो लभ्यते[1]। अत्र हि "माणवक" इति सम्बुद्ध्यन्तेन पाठेन भाव्यम्। सोऽयं पाठो भूयसा कालेन स्वरूपात् प्रच्युतो नूनमपपाठतां गत इति प्रतीयते। अथेदं विशदय्य प्रकाश्यते प्रमाणपुरस्सरम्।

शोधिते खलु पाठे—इदमुदाहरणवाक्यं भवति—आगमयस्व तावन्माणवक इति। कश्चिद् भोजनाद्यर्थे त्वरमाणं बालकमाह· माणवक ! आगमयस्व तावत्, प्रतीक्षस्व तावत् कञ्चित् कालम्, मा त्वरिष्ठा इति। यथा प्रासंगिकोऽर्थः खल्वनेन वाक्येन द्योत्यते न तथा—"आगमयस्व तावन्माणवकम्" इत्यनेन। लोके च प्रायश त्वरमाणान् चपलबालानेवं सान्त्वयन्ति पितरः--"आगमयस्व तावन्माणक !" इति। न च मातापित्रा-दिभिर्बालकस्य प्रतीक्षा क्रियते प्रायेण लोके[2]। येनेदं स्याद् "आगमयस्व तावन्माणवकम्" इति। अतः "आगमयस्व तावन्माणवक !" इत्येव पाठ औचित्यमञ्चतितराम्।

---

1. काशिकावृत्तिः, अनन्तशास्त्रिसम्पादिता, चौखम्बा संस्कृत ग्रन्थमाला बनारस 1931.

   काशिकावृत्तिः, शोभितमिश्रसम्पादिता, तृतीयं संस्करणम्, चौखम्बा संस्कृत ग्रन्थमाला बनारस 1952.

   काशिकावृत्तिः, नारायणमिश्रसम्पादिता, चतुर्थसंस्करणम्, चौखम्बा संस्कृत ग्रन्थमाला, बनारस 1969.

   काशिकावृत्तिः, न्यासपदमञ्जरीयुता, स्वामिद्वारिकादासशास्त्रिकालिका-प्रसादशुक्लाभ्यां सम्पादिता, प्राच्यभारती प्रकाशन, वाराणसी 1965.

   काशिकावृत्तिः, आर्येन्द्रशर्मादिसम्पादिता, संस्कृतपरिषद्, उस्मानिया विश्वविद्यालय हैदराबाद 1969.

2. प्रायोवचनाद् यदि कदाचिद् बालकस्य प्रतीक्षा क्रियते चेत्तदापीदमुदाहरणं नातितरां युज्यते। कुतः ? प्रसिद्धतमस्य—(प्रचुरप्रयोगविषयस्य) एवो-दाहरणत्वेन समाहृतत्वात्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महाभाष्येऽपि खलु मूलपाठः "आगमयस्व तावन्माणवक !" इत्येवासीदिति कैय्यटनागेशयोर्व्याख्यानात् स्फुटं ज्ञायते । एतदुदाहरणं व्यावृण्वान उपाध्यायकैयट आह—"आगमयस्वेति । सहस्व कञ्चित्कालं मा त्वरिष्ठा इति[1] । एतदेव च विशदयन् नागेशभट्ट आह - "मा त्वरिष्ठा इति । अध्ययनाद्यर्थं कञ्चित् कालं क्षमस्व । मा त्वरां कुर्वित्यर्थः ।

अत्र स्फुटं प्रतीयते यदाचार्ययोरियं वाक्य-योजना "माणवक" इति सम्बुद्ध्यन्तं पदमपेक्षते । तद् दृष्ट्वैव वाक्य-योजना ताभ्यां कृताऽस्ति । सम्बुद्ध्यन्तं पदं विना च नेयं संगच्छते । एतेन सिद्ध्यति यत् कैय्यटनागेशाभ्यामयमेव पाठो दृष्टो व्याख्यातश्च ।

महाभाष्यसम्पादने कील्होर्न् महाशयेन अयमेव पाठः स्वीकृतः । सत्यपि "माणवकम्" इति पाठ-भेदे तेन महाशयेन सम्बुद्ध्यन्तस्यैव पाठस्याधिकासु मातृकासूपलम्भात् कैय्यटननागेशयोर्व्याख्यानप्रामाण्याद् अर्थौचित्यसम्पादकत्वाच्च ग्रहणं कृतम्[2] । एतेनेदं प्रतीयते यद् भाष्यस्य मूलपाठः "आगमयस्व तावन्माणवक !" इत्येवास्ति । वृत्तिकारस्य खलूदाहरणविन्यासप्रसंगे भाष्यानुगामिता च सुविदितास्ति वैय्याकरण-सम्प्रदाये । एतेनेदं सम्यगवगम्यते यत् काशिकायाम् अपि "आगमयस्व तावन्माणक" इत्येव पाठ आसीत् । काशिकावृत्तेर्व्याख्याता हरदत्तमिश्रोऽपि एतदेव समर्थयति । यद्यप्यत्र स पूर्णमुदाहरणवाक्यं नोपस्थापयति, तथापि तस्य व्याख्यानेन शोधितपाठ एव सुतरां व्यज्यते । स आह—"आगमयस्व तावदिति, सहस्व कञ्चित् कालं मा त्वरिष्ठा इत्यर्थः[3] । कैय्यटनागेशयोरिव हरदत्तस्येदं व्याख्यानमपि सम्बुद्ध्यन्तमेव पाठं सकेतयति ।

---

1. भा० प्रदीपोद्योतः 1. 3. 21,
2. म० भाष्यम्, प्रथमखण्डः, पाठभेद 6, जी माणवकं, इ. जी. बी. माणवक आगमयस्व तावत् । पृ० 530, तृतीय संस्करणम् । भाण्डारकर अनुसन्धान संस्थान पूना ।
3. काशिका (न्यासपदमञ्जरीयुता) 1. 3. 21, पृ० 423,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भाषावृत्तिकारः पुरुषोत्तमदेवोऽपि सम्बुद्ध्यन्तमेव पाठं प्रदर्शयति—

"आगमयस्व तावन्माणवक ! मा त्वरिष्ठा इत्यर्थः[1] ।" एतेन गम्यते यदनेन भाष्ये काशिकायां च तं पाठं दृष्ट्वा तथोदाहृतम् इति । अत्र भट्टोजिदीक्षित आह शब्दकौस्तुभे —आगमयस्व तावत्सहस्व कञ्चित् कालं मा त्वरिष्ठा इत्यर्थः । सिद्धान्तकौमुद्यां चाप्याह—आगमयस्व तावत् मा त्वरिष्ठा इत्यर्थः[2] । आचार्यदीक्षितेन यद्यप्यत्र "माणवक" इति पदं नोपात्तम्, तथापि सहस्व कञ्चित्कालं मा त्वरिष्ठा इति तद्व्याख्यानं, स्फुटमेव सम्बुद्ध्यन्तं पदमपेक्षते, संकेतयति च तस्याध्याहर्त्तव्यताम् । तेन माणवक इति पदं सम्प्रदायप्राप्तोदाहरणे विद्यमानत्वादत्रोपतिष्ठते । इत्थं दीक्षितव्याख्यानेनापि माणवक इति पाठ एव समर्थ्यते । एतदुदाहरण-व्याख्यानप्रसंगे विश्वेश्वरसूरिरोरम्भट्टश्च भट्टोजिदीक्षितमनुवदतः[3] । एवं बहुभिः प्रमाणैरस्मिन्नुदाहरणे सम्बुद्ध्यन्तस्यैव पाठस्य साधुता गम्यते ।

अथ "क्रीडोऽनुसम्परिभ्यश्च" इत्यत्र अपरं वार्त्तिकं पठ्यते ।

आङि नुप्रच्छ्योरुपसंख्यानम् ।

आनुते शृगालः, आपृच्छते गुरुम् इत्युदाहरणद्वयमत्र लभ्यते । इद-मुदाहरणयुगलं महाभाष्ये काशिकायां च समानरूपमेव पठ्यते[4] । तद्वदेव चेदं माधवीयधातुवृत्तौ[5] व्याकरणसिद्धान्तसुधानिधौ[6] व्याकरणदीपिका-याम्[7] आख्यातिके[8] पाणिनीयाष्टके तत्वप्रकाशिकोपेते[9] च दृश्यते ।

---

1. भाषा० 1. 3. 21,
2. सिद्धान्त कौमुदी, आत्मनेपद-प्रक्रिया, पृ० 255,
3. व्या० सि० सुधा० 1. 3. 21,
   व्या० दी० 1. 3. 21.
4. काशिका 1. 3. 21, म० भा० 1. 3. 21,
5. मा०धातु०, आदादिगणः 30 (नु स्तुतौ), तुदादिगणः 120 (प्रच्छ ज्ञीप्सायाम्)
6. व्या० सि० सुधा० 1. 3. 21,
7. व्या० दी० 1 3. 21,
8. आख्या० 642, आत्मनेपदप्रक्रिया, पृ० 391,
9. पाणिनीयाष्टकम्, तत्वप्रकाशिकाव्याख्योपेतम्, पृ० 391,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रक्रियाकौमुद्यां[1] सिद्धान्तकौमुद्यां[2] शब्दकौस्तुभे[3] च आनुते, आपृच्छते, इत्येतावन्मात्रं पठ्यते । पाणिनीयेतर-परम्परायां जैनेन्द्रव्याकरणस्य महावृत्तौ[4] शाकटायन-व्याकरणस्य चिन्तामणिवृत्तौ[5] चापीदमुदाहरणद्वयं भाष्यकाशिकासदृशमेव पठ्यते । सिद्धहेमशब्दानुशासनस्य स्वोपज्ञलघुवृत्तौ[6] सवृत्तिके मलयगिरिशब्दानुशासने[7] श्रीभिक्षुशब्दानुशासने[8] च "आपृच्छते गुरून्" इति द्वितीयमुदाहरणं कर्मणि बहुवचननं कृत्वा पठितम, प्रथमं तु तत्सदृशमेव पठ्यते ।

आनुते—

अस्यार्थनिर्देशः काशिकायां तु न लभ्यते । न्यासकारः खल्वस्यार्थं वर्णयन्नाह "आनुते-इति णु स्तुतौ-अदादिः । अयं चात्रोत्कण्ठापूर्वकशब्दने वर्त्तते[9]" । पदमञ्जर्यां हरदत्तोऽपि एतदेवानुवदति—"आनुत इति, उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः[10] ।" भाष्यप्रदीपे कैयटोऽपि एनमेवार्थं दर्शयति "आनुत इति उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः[11] । नागेशश्च कैय्यटोक्तिमिमामुपोद्बलयन्नाह "स्तुत्यर्थकोऽपि नुराङ्पूर्वं उत्कण्ठापूर्वकशब्दमात्रे रूढ इति भावः[12] ।" शिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशेऽपि अयमेवार्थः स्वीकृतः[13] ।" माधवीयधातुवृत्तौ अयमेवार्थः

---

1. प्र० कौ०; उत्तरार्धम्, पदव्यवस्थाप्रकरणम्, आडि. नुप्रच्छोरिष्टिः पृ० 402,
2. सि० कौ०, आत्मनेपदप्रक्रिया, पृ.—255,
3. श० कौ० 1. 3. 21,
4. जैने० महावृत्तिः 1. 2. 14,
5. शाक० चिन्तामणिवृत्तिः 1. 4. 27,
6. सिद्धहेम०, स्वोपज्ञलघुवृत्तिः 3. 3. 54,
7. मलय० आख्याते द्वितीयः पादः, सूत्र-संख्या-37,
8. श्रीभिक्षु० अष्टाध्यायीवृहद्वृत्तिः, 3. 3. 26,
9. न्यासः 1. 3. 21,
10. पद० 1. 3. 21,
11. भा० प्र० 1 3. 21,
12. भा० प्रदीपोद्योतः 1. 3. 21 वृहच्छब्देन्दुशेखरस्यात्मनेपदप्रकरणेऽपि नागेशः कैय्यटप्रमाणेन एनमेवार्थं स्वीकरोति—"आनुत इति । अस्य शृगाल उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थ इति कैयटः" वृहच्छब्दे० आत्मने० पृ० 1920,
13. म०भा०सि०रत्न० 1. 3. 21,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिपादितः, न्यासकैयटपदमञ्जरीप्रमाणपुरस्सरं च समर्थितः[1]। आख्यातचन्द्रिकायां भट्टमल्लेन स्पष्टमयमेवार्थो निर्दिश्यते यत्—"उत्कण्ठाऽस्वन आनुते"[2] इति। प्रक्रियाकौमुद्याः प्रसादव्याख्यायां[3] प्रकाशव्याख्यायां[4] चाप्ययमेवार्थः स्वीकृतः। अथच शब्दकौस्तुभे[5] व्याकरण-सिद्धान्तसुधानिधौ[6] व्याकरणदीपिकायामयमेवार्थः प्रतिपाद्यते[7]। श्रीभिक्षु-शब्दानुशासने बृहद्वृत्तियुतेऽप्ययमेवार्थः स्फुटं निर्दिष्टः[8] एवं बहुभिः प्रमाणैरयमर्थः सम्यक् साध्यते।

मल्लिनाथकृतोऽर्थभेदः, तत्समीक्षा च,

भट्टिकाव्यस्य सर्वपथीनाख्यायां व्याख्यायां मल्लिनाथ आङ् पूर्वस्य नुधातोः स्तुत्यर्थमाह। अथ भट्टिश्लोकनिर्देशपुरस्सरं मल्लिनाथकृतं व्याख्यानं प्रस्तूयते—

सीतान्तिके विवृत्सन्तं वत्स्यत्सिद्धिं प्लवंगमम्।
पतत्रिणः शुभा मन्द्रमानुवानास्त्वजिह्लदन्॥[9]

---

1. आनुते शृगालः "आङि नुप्रच्छ्योरुपसंख्यानमिति तङ्। आङ् पूर्वकोऽयं स्वभावादुत्कण्ठापूर्वके शब्दने वर्त्तते। तदुक्तं न्यासे "अयं धातुरुत्कण्ठ:-पूर्वके शब्दने अङ्त्तरः प्रवर्त्तते।" कैय्यटपदमंजर्योरप्युदाहरणस्य सोत्कण्ठं शब्दं करोतीत्यर्थ उक्तः। मा० धातु० णु स्तुतौ अदादिगणः–30, पृ० 344 इदमत्रावधेयं यन्न्यासनाम्ना यदिदं वाक्यं धातुवृत्तिकारेणोद्धृतं तज्जिनेन्द्र-बुद्धिन्यासे नास्ति। एतदर्थप्रतिपादकं यद्वाक्यं न्यासे लभ्यते तदुपर्युद्धृतम्।
2. जीमूतानां स्तनयति गदयत्यपि गर्जति।
स्फूर्जत्यशनिनिर्घोष उत्कण्ठास्वन आनुते॥
आख्या० चं०, द्वितीयकाण्डम्, श्लोकः 134,
3. आनुत इति। उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः। प्र० कौ०, (उत्तरार्धम्) प्रसादटीका, पदव्यवस्थाप्रकरणे, "अपाच्चतुष्पाच्छकुनिष्वालेखने" इति सूत्रस्य व्याख्याने। पृ० 403,
4. आनुत इति उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः। प्र० कौ०, (तृतीयोभागः) प्रसादटीका, पृ० 383,
5. श० कौ० 1. 3, 21,
6. व्या० सि० सु० 1. 3. 21,
7. व्या० दी० 1. 3. 21,
8. उत्कण्ठापूर्वके संशब्दे नौतेरयं विधिर्न सर्वत्र। श्रीभिक्षु० 1. 3. 26,
9. भट्टि० 8. 67,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"सीतान्तिके विवृसन्तं वर्त्तितुमिच्छन्तं............प्लवंगमं हनुमन्तं शुभाः शुभावेदकाः पतत्रिणः पक्षिणो मन्द्रं गम्भीरम् आनुवाना धन्योऽसीति स्तुवाना इवेत्यर्थः। गम्योत्प्रेक्षा[1]।" अत्र हि—"आनुवानाः" इत्यस्य स्तुवाना इवेत्यर्थः पूर्वं प्रचुरप्रमाणपुरस्सरं प्रतिपादितादर्थाद् भिद्यते। अथ चायमर्थः काव्यकारस्यापि अभिप्रेतो नास्तीति प्रतीयते। अत्र खलु पद्यस्वारस्यादिदं ज्ञायते यद् हनुमन्तं दृष्ट्वा ते पक्षिणः सोत्कण्ठं शब्दायमानाः तमजिह्लदन् आह्लादयन् इति। अयमर्थोऽत्र सम्यक् संगच्छते। इह स्तुवाना इत्यर्थस्तु औचित्यविरुद्धम् आपद्यते। एतमेवापद्यमानं दोषं मार्जयितुं व्याख्यात्रा गम्योत्प्रेक्षेति अस्थाने कल्पना कृता। काव्यकारस्याभिप्रायेऽधिगते तु नेयं क्लिष्टकल्पनाश्रयितव्या भवति। अतोऽत्र "आनुवानाः" इत्यस्य सोत्कण्ठं शब्दायमाना इत्यर्थो युक्तः प्रतीयते। भट्टिकाव्यस्य जयमंगलाटीकायाम् "आनुवानाः" इत्यस्य "वावश्यमानाः" इत्यर्थः कृत[2]। स खलु संगच्छते। तत्र टीकाकारः "वावश्यमानाः" इत्यनेन सोत्कण्ठं शब्दायमाना इत्येव द्योतयति, यतस्तरुनिकुञ्जे संचरन्तं हनुमन्तमालोक्य चकिता इव पक्षिणः सोत्कण्ठं शब्दायमाना बभूवुः। तमेव भावं काव्यकार "आनुवानाः" इति पदेनाभिदधाति, तस्यैवार्थः "वावश्यमानाः", सोत्कण्ठं शब्दायमाना इति यावत्। महामहोपाध्यायेन परमेश्वरशर्मणापि प्रकृतपद्ये "आनुवानाः" इत्यस्य उत्कण्ठापूर्वकं शब्दायमाना इत्येवार्थः काव्यकारस्याभिप्रेत इति निर्दिष्टम्[3]। मल्लिनाथकृतः स्तुवाना इत्यर्थस्तु नातिरुचिरः प्रतिभाति।

मल्लिनाथमनुसृत्य वीरराघवाचार्येणापि प्रकृतं भट्टिपद्यं स्वप्रणीतायां पाणिनिसूत्रव्याख्यायां सोदाहरणश्लोकायामुदाहरणत्वेनोपस्थाप्य "आनु-

---

1. भट्टि० (सर्वंपथीनटीकायुतम्) 8. 67, पृ० 282,
   बाम्बे संस्कृतसीरीज 1897.
2. भट्टिकाव्यजयमंगलाटीका, 8. 67, पृ० 210,
3. आङ् पूर्वको नौतिरुत्कण्ठापूर्वके शब्दने वर्त्तते इति धातुवृत्तौ माधवः। न्यासकारोऽप्येवम्। अत एव भट्टिश्चापि "पतत्रिणः शुभा मन्द्रमानुवानास्त्वजिह्लदन्" इति। प्रयोगपल्लवः (द्वितीयपरिशिष्टम्-- प्रयोगदर्पणः काव्यपरिच्छेदः पृ० 246,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वानाः" इत्यस्य स्तुवाना इवेत्यर्थः कृतः[1]। भट्टिकाव्यस्य काव्यमर्मविमर्शिकाभिधायां टीकायां च गोपालशास्त्रिणाप्ययमेवार्थः प्रदर्शितः[2]।

भाषावृत्तौ "आनुते शिवा, आक्रोशतीत्यर्थः"[3] इत्युच्यते। "उत्कण्ठापूर्वकम्" इति विशेषणं त्वत्र नोक्तम्। असत्यप्यस्मिन विशेषणे 'आक्रोशति' इत्यनेनैव "उत्कण्ठापूर्वकं शब्दायते" इत्यर्थो गम्यते। यतो विदितं हि खल्विदं लोके यद् उत्कण्ठिता एव शृगालाः प्रायेण तथा शब्दायन्ते। अतो विशेषणं नोक्तम्। एवम्पुरुषोत्तमदेवप्रतिपादितोऽर्थोऽपि पूर्वं प्रमाणपुरस्सरं प्रतिपादितादर्थान्न भिद्यते। पुरुषोत्तमविद्यावागीशभट्टाचार्येण स्वप्रणीते प्रयोगरत्नमालाव्याकरणे "आनुते शिशुः" इत्युदाहरणं प्रस्तुतम्[4]। शिशुर्मातरं प्रत्युत्कण्ठितः सन् शब्दं करोतीत्यस्यार्थः। (आनुते शृगालः, आनुते शिवा, आनुते शिशुः, इत्यादीन्युदाहरणानि दृष्ट्वेदं प्रतीयते यद् "आनुते" इत्यत्रोत्कण्ठापूर्वकं शब्दनम् अव्यक्तवाग्विषयमेवास्तीति) अथान्य एतत्सदृशाः प्रयोगा इत्थं कर्तुं शक्यन्ते।

आनुवते मयूरा घनगर्जिते।
आनुते गौर्वत्सं प्रति, आनुते वत्सो मातरं प्रति, इति।

अथ प्रयोगाः, अर्जुनरावणीये—

पुरानुवानामिव[5] दक्षिणां शिवामचिन्तयित्वा जननीमभूषिता।
नृपेक्षणाक्षिप्तमना विलासिनी यियासुरापृच्छत नापि वल्लभम्॥[6]

सोत्कण्ठं शब्दायमानां शिवामचिन्तयित्वेत्यादिरर्थः, उत्कण्ठापूर्वके शब्दने एवात्र प्रयोगः।

---

1. पा० सूत्र०, (उत्तरार्धम्) आत्मनेपदप्रकरणम् पृ० 136,
2. भट्टि० (काव्यमर्मविमर्शिकोपेतम्) 8. 67,
3. भाषा० 1. 3. 21.
4. प्रयो० व्या० आख्यातविन्यासः 452, पृ० 29P,
5. अत्रोपलब्धमातृकाधारेण ग्रन्थे "पुनर्नुवानामिव" इति पाठो मुद्रितोऽस्ति। टिप्पण्यां पुनः सम्पादकेन "पुरानुवानामपि" इति संशोधन प्रदर्शितम्।
6. अर्जुन० 2. 19,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भट्टिकाव्ये—

सीतान्तिके विवृत्सन्तं वत्स्र्यत्सिद्धिं प्लवंगमम् ।
पतत्रिणः शुभा मन्द्रमानुवानास्त्वजिह्लदन् ।।[1]

अत्रापि गीतकण्ठं शब्दने प्रयोग इति विस्तरेण सप्रमाणं वर्णितं पूर्वम् ।

द्व्याश्रयकाव्ये—

आपृच्छतागतान् कांश्चिदानुवानमयूरवाक् ।
कांश्चिदागमयाञ्चक्रे स दत्वैकं प्रयाणकम् ।।[5]

"स वल्लभ एकं प्रयाणकं दत्वा कांश्चिद् बन्धुमित्रामात्यादीन् आगतान् अनुव्रजनायायातान् आपृच्छत वियुज्यमानः प्रयाणकविषयेऽनुज्ञापितवान् । कीदृक् सन् ? आनुवान उत्कण्ठापूर्वकं शब्दायमानो यो मयूरस्तस्येव स्निग्धा मधुरा वाग् यस्य स । तथा कांश्चिन्नृपादीन् आगमयाञ्चक्रे प्रतीक्षितवान्" इत्यत्र अभयतिलकगणिविरचिता टीका[2] ।

आपृच्छते—

अस्यार्थनिर्देशः काशिका-न्यास-पदमंजरी-प्रदीपोद्योत-शब्दकौस्तुभादिषु न लभ्यते । आख्यात-चन्द्रिकायाम् अस्यार्थं इत्थं निर्दिश्यते—

अनुयुङ्क्ते प्रश्नयति प्रश्ने ज्ञीप्सति पृच्छति ।
आपृच्छते तु यात्रार्थं विप्रश्ने राध्यतीक्षते ।।[3]

आचार्यहेमचन्द्रोऽपि स्वशब्दानुसनस्य बृहद्वृत्तावेतदेवार्थापयति—"वियुज्यमानस्य प्रश्नेऽयं विधिः[4]" इति । आचार्यचारुदेव एतदेव समर्थयन्नाह व्याकरणचन्द्रोदये—"आङ्प्रच्छ का अर्थ विदाई लेना है" इति[5] । अस्मि-

---

1. द्व्या० 7. 32,
2. द्व्या० 7. 32, पृ.० 532,
3. आख्या० चं० प्रथमकाण्डे 119 तमं पद्यम्, पृ० 11,
4. सिद्धहेमशब्दानुशासनं बृहद्वृत्तियुतम् 3. 3. 54,
   श्रीभिक्षुशब्दानुशासने बृहद्वृत्तियुते हेमाचार्यमतमेवानूद्यते—"वियुज्यमानस्य प्रश्नेऽयं विधिः"
5. व्या० चं० तृतीयखण्डः, पृ० 452,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्नेवार्थे रामायणमहाभारतयोर्भूयांसः प्रयोगा दृश्यन्ते[1]। पाणिनितोऽर्वाक्कालिके साहित्ये तु आप्रच्छतेरात्मनेपदप्रयोगोऽस्मिन्नेवार्थे नियमितो दृश्यते। तद्यथा—

मेघदूते—

आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलम्।[2]

शिशुपालवधे—

कृतगुरुतरहारच्छेदमालिंग्य पत्यौ—
परिशिथलितगात्रे गन्तुमापृच्छमाने।[3]

अर्जुनरावणीये—

नृपेक्षणाक्षिप्तमना विलासिनी यियासुरापृच्छत नापि वल्लभम्।[4]

द्व्याश्रयकाव्ये—

आपृच्छतागतान कांश्चिदानुवानमयूरवाक्।[5]

रामायणे—

1. यावन्मातरमापृच्छे सीतां चानुयाम्यहम्।
ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनन्॥ 2. 16. 51,
रामस्त्वेनन वाक्येन सुप्रीतः प्रत्युवाच तम्।
व्रजापृच्छस्व सौमित्रे सर्वमेव सुहृज्जनम्॥ 2. 28. 11,
भरतश्चापि तान् दूतानेवमुक्तोऽभ्यभाषत।
आपृच्छेऽहं महाराजं दूताः सन्त्वरयन्ति माम्॥ 2. 64. 11,
(वड़ोदासंस्करणम्)

महाभारते चापि—

अथाब्रवीन्मयः पार्थमर्जुनं जयतां वरम्।
आपृच्छे त्वां गमिष्यामि क्षिप्रमेष्यामि चाप्यहम्॥ 2. 3. 1,
आपृच्छे त्वा स्वस्ति तेऽस्तु धर्मस्त्वा परिरक्षतु। 3. 206. 28,
(पूनासंस्करणम्)

2. पूर्वमेघः—12,
3. शिशु० 11. 38,
4. अर्जुन० 2. 19,
5. द्व्या० 7. 32,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभद्राहरणे—

गन्तास्मि पितरौ श्वोऽहमाप्रष्टाहे प्रणम्य च ।
अथ ताभ्यामनुज्ञाता वक्तास्मि स्वजनं गतिम् ।।[1]

ऊर्ध्वंमुहूर्त्तादद्यैव स्वां मातरमुपेयुषी ।
आपृच्छेत सुभद्रेयम्मातृरन्याश्च वत्सलाः ।।[2]

अत्रोद्धृतेषु प्रयोगेषु वियुज्यमानस्य प्रश्ने यात्रार्थं वा प्रश्ने एव आप्रच्छतेरात्मनेपदम् इति स्फुटं लक्ष्यते । एतेनेदं गम्यते यदस्मिन्नेवार्थेऽयं प्रयोगो रूढ इति ।

□ □

1. सुभद्रा० 15. 41,
2. सुभद्रा०16. 35,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अन्तरपरिग्रहे (1–4–65)

अन्तश्शब्दो परिग्रहार्थे गतिसंज्ञो भवति। परिग्रहः स्वीकरणम्। तदभावे गतिसंज्ञा विधीयते---इति वृत्तिः।

अन्तर्हत्य, अन्तर्हतम्, यदन्तर्हन्ति, इत्युदाहरणानि। न्यासकार एतदुदाहरणार्थमित्थं व्याचष्टे "अन्तर्हत्य मध्ये हत्वेत्यर्थः"[1]। एतदेव च पदमञ्जरीकरोऽनुवदति[2]। भाषावृत्तावपि अयमेवार्थो निर्दिष्टः[3]। प्रक्रियासर्वस्वकारो नारायणभट्टोऽप्येतदेव समर्थयति, उदाहरणार्थमिमं च पद्यमुखेनेत्थं विशदयति—

अन्तर्हत्य रिपु याति मध्ये हत्वेति कथ्यते।
अन्तर्हत्वा धनं याति परिगृह्ये ति नो गतिः॥[4]

इदमत्रावधेयं यदिदं प्रकृतं सूत्रम्, अस्मादग्रिमं च "कणेमनसी श्रद्धाप्रतिघाते" इत्येतत् सूत्रं हन्तिमेव विषयीकरोति। उक्तञ्च धातुवृत्तौ—योगद्वयमिदं स्वभावाद्धन्तिविषयम्[5]।

अथास्य प्रत्युदाहरणम्—अपरिग्रह इति किम्? अन्तः-पूर्वो हन्तिः परिग्रहेऽपि वर्त्तते। यत्र तु परिग्रहे वर्त्तते तत्र अन्तरित्यस्य गतिसंज्ञा मा भूदिति। तथा च वृत्तिः—अन्तर्हत्वा मूषिकां श्येनो गतः परिगृह्य इत्यर्थः[6]।

---

1. काशिका न्या० पद० युता, 1. 4. 65, पृ० 603,
2. तत्रैव।
3. भाषा० 1. 4. 65,
4. प्र० सर्वं०, समासखण्डः, चतुर्थ भागः, पृ० 27,
5. मा० धातु० अदा० 2, हन् हिंसागत्योः, पृ० 315,
6. काशिका 1. 4. 65,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र हि "अन्तर्" इति परिग्रहं=ग्रहणं द्योतयति, अतः अन्तर्हत्वा इत्यस्य परिगृह्य इत्यर्थं उक्तो वृत्तिकृता। परिग्रहार्थत्वादेव चात्र गतिसंज्ञाया अभावः। एतेनेदं स्पष्टं यत्प्रत्युदाहरणे अन्तः-पूर्वो हन्तिः परिग्रहे वर्त्तते, न तु हनने। भाषावृत्तिकारोऽपि एतदेव मनसिकृत्य अन्तर्हत्वा इत्यस्य परिगृह्य इत्यर्थमाह[1]। चान्द्रवृत्तावपि प्रत्युदाहरणार्थविवरणप्रसंगे - "अन्तर्हत्वा मूषिकां गत गृहीत्वेत्यर्थः"[2] इत्युच्यते। नारायणभट्टोऽपि—

"अन्तर्हत्वा धनं याति परिगृह्येति नो गतिः"[3]

इति पद्येन एतदेव स्फुटयति। धातुवृत्तिकारश्चाप्याह—"परिग्रहे त्वगतित्वाद् अन्तर्हत्वा श्येनो मूषिकां गत इति भवति, परिगृह्य इत्यर्थः। अत्र न्यासोद्योते– अन्तश्शब्दो धातोः परिग्रहे वृत्तिं करोति इति। एवं चान्तरपि परिग्रहस्यैव द्योतक इत्युक्तं भवति"[4]। एतनेदं सम्यगव गम्यते यद् अन्तर्हत्वा इत्यस्य गृहीत्वा इत्येवार्थोऽस्ति, हननं त्वत्र नास्ति।

भट्टोजिदीक्षितकृतोऽर्थभेदः, तस्य च समीक्षा

परम् आचार्यदीक्षितोऽस्य हननपुरस्सरं परिग्रहमर्थं मन्यते। तद्यथा सिद्धान्तकौमुद्यामाह —"अपरिग्रह इति किम्? अन्तर्हत्वा गतः, हतं परिगृह्य गत इत्यर्थः"[5]। एतदेव च शब्दकौस्तुभे वर्णयति—"अपरिग्रह इति किम्। अन्तर्हत्वा श्येनो मूषिकां गत, परिगृह्य इत्यर्थः। अत्रेद-मवधेयम्—हत्वा गमनं द्विधा। हतं परिगृह्य त्यक्त्वा चेति। आद्यमु-दाहरणम्। द्वितीयं प्रत्युदाहरणम्"[6] इति। तदिदं दीक्षितव्याख्यानं चिन्त्यम्। पूर्वं प्रदर्शितैः प्रमाणैरिदं स्पष्टं यत्प्रत्युदाहरणे अन्तःपूर्वो हन्तिः परिग्रहे वर्त्तते। तेनात्र परिगृह्य इत्येवार्थो युक्तः, हतं परिगृह्य गत इति तु न।

---

1. भाषा० 1. 4. 65,
2. चान्द्र० 2. 2. 28, पृ० 201,
3. तत्रैव।
4. मा० धातु० अदादि० 2, हन् हिंसागत्योः, पृ० 314,
5. सि० कौ०, तत्पुरुषसमासप्रकरणम्, पृ० 72, निर्णयसागरमुद्रणालयः।
6. श० कौ० 1. 4. 65,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्येनो मूषिकाम् अन्तर्हत्वा = गृहीत्वा गत इत्युच्यते। लोके चेदं दृश्यते श्येनः काको वा मूषिकां जीवन्तीमपि पुच्छे गृहीत्वोड्डीयते। केनचिद्धतां भूमौ पतितां दृष्ट्वापि नयति, स्वयं वा पूर्वं निहत्य पश्चात्तां नयति। परन्त्वैतत्सर्वमिह नैवोच्यते, गृहीत्वा गत इत्येवोच्यते।

अथ यदि दीक्षितमतेन अन्तर्हत्वा गत इत्यस्य हत्वा परिगृह्य गत इत्यर्थो मन्येत तर्हीदं प्रत्युदाहरणं प्राणिविषयकमेव स्याद् यस्य हननं = वधः सम्भवतीति। तेन च—

अन्तर्हत्वा धनं याति परिगृह्येति नो गतिः।[1]

इति यत्प्रत्युदाहरणं नारायणभट्टेनोक्तम्, इदम् अन्यच्चैतादृशं न सिद्ध्यति। अतो भट्टोजिदीक्षितस्येदं मतं वृत्तिकाराद् भाषावृत्तिकाराद धातुवृत्तिकाराच्च विरुद्ध्यत इति चिन्त्यम्।

अत्र बृहच्छब्देन्दुशेखरे नागेशभट्टः[2], व्याकरणदीपिकायाम् ओरम्भट्टः[3], व्याकरणसिद्धान्तसुधानिधौ विश्वेश्वरसूरिश्च[4] भट्टोजिदीक्षितमेवानुसरन्ति।

□ □

---

1. प्र० सर्व० समासखण्डः, चतुर्थभागः, पृ० 27,
2. हत्वा गमनं द्विधा, हतं त्यक्त्वा परिगृह्य चेति। आद्यमुदाहरणम् अन्त्यं प्रत्युदाहरणम् बृहच्छब्दे० द्वितीय भागः, पृ० 1052.
3. अपरिग्रहे किम् ? अन्तर्हत्वा गतः। हतं परिगृह्य गत इत्यर्थः। अयं भावः। हत्वा गमनं द्विधा। हतं त्यक्त्वा परिगृह्य चेति। आद्यमुदाहरणम् द्वितीयं प्रत्युदाहरणम्। व्या० दी० 1. 4. 65, पृ० 107,
4. अपरिग्रहे किम् ? अन्तर्हत्वा मूषिकां श्यनोगतः। हतं परिगृह्य गत इत्यर्थः। हतं त्यक्त्वा गमने उदाहरणम्। परिगृह्य गमने तु प्रत्युदाहरणम। व्या० सि० सुधा० 1. 4. 65, पृ० ४76,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—करणेमनसी श्रद्धाप्रतिघाते । (1-4-66)

करणेशब्दो मनश्शब्दश्च श्रद्धाप्रतिघाते गतिसंज्ञौ भवतः । कणेहत्य पयः पिवति । मनोहत्य पयः पिबति । तावत् पिबति यावदस्याभिलाषो निवृत्तः । श्रद्धा प्रतिहतेत्यर्थः, इति वृत्तिः[1] ।

अत्र करणेशब्दः सप्तम्यन्तप्रतिरूपको निपातः । स चेहाभिलाषातिशये वर्तमानो गृह्यते । तस्य हि श्रद्धाप्रतिघात इत्युपाधिः सम्भवति । मनश्शब्दोऽपि तत्साहचर्यादभिलाषवृत्तिरेव विज्ञायते । करणेहत्य पयः पिबति । अतिशयेनाभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः । एवं मनोहत्य पयः पिबतीति । अतिशयेनाभिलष्य तन्निवृत्तिपर्यन्तं पीत्वा या तृप्तिर्भवति सा अभिलाषनिवृत्तिरूपा तृप्तिरिह "श्रद्धाप्रतिघात" इत्यनेन द्योत्यते । तृप्तिश्च अशनपानविषया एव, या हि सौहित्यम् इत्युच्यते, तामेव "श्रद्धाप्रतिघात-शब्दो द्योत्यत्वेन विषयीकरोति । न त्वन्यज्जातीयका अभिलाषनिवृत्तिरिह गृह्यते । कुत एतत् ? व्याख्यानतः । अत्र हि कणेहत्य पयः पिबति, मनोहत्य पयः 'पिबति, इतीदमुदाहरणद्वयं मूर्धाभिषिक्तम्, सर्ववृत्तिषूदाहृतत्वात् । एतच्च सौहित्य-विषयकमेव व्याख्यायते । तेनेदं गम्यते यच्छ्रद्धाप्रतिघात इत्येनन पर्याप्ताशनपानजन्या तृप्तिरेवाभिप्रेताऽस्ति । अत एव चन्द्राचार्येण "कणेमनस्तृप्तौ" इति सूत्रितभ्[2] । एतदेव मनसिकृत्य हेमचन्द्राचार्योऽपि स्वशब्दानुशासने "कणंमनस्तृप्तौ" इति सूत्रयति[3] । इत्थं तयोर्मतेनापि अशनपानाभिलाषनिवृत्तिरूपा तृप्तिरिह गृह्यते । इमानि च भूयः सौहित्या-

---

1. काशिका 1. 4. 66.
2. चान्द्र० 2. 2. 29,
3. सिद्धहेम० 3. 1. 6.,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

थन्युदाहरणानि भवन्ति---कणेहत्य रसं पिबति, कणेहत्य मिष्टान्नं भुङ्क्ते, मनोहत्याम्राणि चूषति, मनोहत्य पायसं भुङ्क्ते, मनोहत्य मोदकानि खादति, इति । दृश्यन्ते चैवंविधाः प्रयोगाः । तद्यथा विश्वेश्वर-सूरेः—

कान्ताभिस्सह तत्क्रियाविनिमयान्नक्तञ्चराः कोष्णता-
भाञ्जि व्यक्तमसृञ्जि जक्षति कणेहत्य व्रणेभ्यः क्षणात् ।[1]

द्व्याश्रयकाव्ये—

भग्नं कुन्तमसत्कृत्यालङ्कृत्यासिं च पाणिना ।
अदःकृत्यान्तर्हत्यैकः कणेहत्य पयः पपौ ।।[2]

"एकः कश्चिद्दैत्यभटः कणेहत्य पयः पपौ, शत्रुवधेनातिसन्तुष्टत्वाद्यावत्तृप्तस्तावज्जलं पीतवानित्यर्थः" । इतीयमत्र अभयतिलकगणिकृता टीका[3] ।

सिद्धहेमशब्दानुशासनस्य धुरन्धरविजयगणिप्रणीतायां पद्यबद्धायां सिद्धहेमसरस्वतीवृत्तौ "कणेमनस्तृप्तौ" इत्यस्य सूत्रस्य व्याख्यानमित्थमुच्यते—

स्यात्तृप्तौ गम्यमानायां गत्यव्ययं कणेमनः ।
द्राक्षामद्धि कणेहत्य मनोहत्वौषधं पिब ।।[4]

अत्र "कणेहत्य द्राक्षामद्धि" इत्युदाहरणम् । "मनो हत्वौषधं पिब" इत्येतच्च प्रत्युदाहरणम् । औषधस्य प्रायेण कटुत्वात्तत्पाने रोगितस्य चेतःप्रतिघातो भवति न तु श्रद्धाप्रतिघात इति प्रत्युदाहरणम्त्वम् ।

वासुदेवकवेर्भिन्नार्थकः प्रयोगः–

---

1. पद्यार्धमिद विश्वेश्वरसूरिणा व्याकरणसिद्धान्तसुधानिधौ "कणेमनसी श्रद्धाप्रतिघाते" (1. 4. 66) इति सूत्रस्य व्याख्यान-प्रसगे मदीयप्रयोग इति कृत्वा उद्धृतम् ।
   व्या० सि० सुधा० पृ० 876—77,
2. द्व्या० 5·20, पृ० 376,
3. तत्रैव ।
4. सिद्धहेमसरस्वतीवृत्ति, प्रथमः खण्डः 3.1.6., पृ० 144,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वम् उपस्थापितैः प्रमाणैः प्रयोगैश्चेदं स्फुटं लभ्यते यच्छ्रद्धाप्रतिघात इत्यनेन भोजने पाने वा प्रवृत्तस्य तदभिलाषनिवृत्त्यन्तं या तृप्तिः सा गृह्यत इति। परं वासुदेव-कविस्तु श्रद्धाप्रतिघात इत्यभिलाषमात्रस्य निवृत्तिरिति मन्यमानः प्रयुङ्क्ते वासुदेवविजयाख्ये काव्ये—

इमां मृदित्वा सुहृदां पुरस्कृतस्तेभ्यः कणेहत्य ददान ईप्सितम् ।
अनस्तमित्यार्दयितास्मि सुत्वनस्तामित्यदःकृत्य निरास सोऽश्मनि ।।[1]

कंसो वसुदेवसुतस्थानापन्नां यशोदातनयां देवकीजातां मत्वा हन्तीति प्रसंगः। अत्र काव्यकारस्य स्वोपज्ञा पदचन्द्रिकाभिधा व्याख्या—"अदःकृत्य कर्त्तव्याकर्त्तव्यं निश्चित्य तामश्मनि निरास चिक्षेप। इमां मृदित्वा सञ्चूर्ण्य। अनस्तमित्य मृतिमप्राप्य सुत्वनो यागसम्बन्धिस्नानं कृतवतो यज्वनोऽर्दयितास्मि पीडयिष्यामि। सुहृदां पुरस्कृतः पूजितः। तेभ्य ईप्सितं वस्तु कणेहत्य श्रद्धां प्रतिहत्य ददानः। कणेमनसी श्रद्धाप्रतिघाते इति गतिसंज्ञा[2]।" एवमयं प्रयोगः पूर्वप्रदर्शितप्रयोगेभ्योऽर्थतो भिद्यते।

सुभद्राहरणाख्ये व्याकरणोदाहरणकाव्ये ब्रह्मदत्तसूनुर्नारायणकविरपि वासुदेवकविरिव अशनपानविषयक-तृप्तेरन्यत्र कणेहत्य इति प्रयुङ्क्ते—

तस्मिन् कणेहत्य विभूषणार्हैं-
रंकानलङ्कृत्य पुरस्थितैः स ।
भागीरथीसैकतसन्निकाश-
पर्यंकमापाण्डरमारुरोह ।।[3]

अत्राह काव्यकारः स्वोपज्ञटीकायाम् "तस्मिन् कणेहत्य इत्यादि। कणेमनसी श्रद्धाप्रतिघाते इति कणेशब्दस्य गतिसंज्ञायां हत्वाशब्देन गतिसमासः, श्रद्धां प्रतिहत्य तृप्त्याऽलङ्कृत्य इत्यर्थः[4]।" इत्थम्भूतः प्रयोगः खलु चिन्त्यः।

□ □

1. वासु० 3. 48, पृ० 111,
2. वासु० 3.48, पृ० 111–12,
3. सुभद्रा० 0.53, पृ० 246,
4. तत्रैव।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अच्छ गत्यर्थवदेषु (1-4-69)

अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्त्तते। स गत्यर्थेषु वदतौ च गतिसंज्ञो भवति, इति वृत्तिः[1]। अत्रोदाहरणानि—अच्छगत्य, अच्छगतम्, यद्-अच्छगच्छति। अच्छोद्य, अच्छोदितम्, यदच्छवदति, इति। वृत्तिकार-मतेन अच्छशब्दोऽत्राभिमुख्ये वर्त्तते। तेन सम्मुखं गत्वा, सम्मुखमुक्त्वा इत्याद्युदाहरणार्था भवन्ति। अयमेवार्थः शब्दकौस्तुभे[2] सिद्धान्तकौमुद्यां[3] व्याकरणसिद्धान्तसुधानिधौ[4] व्याकरणदीपिकायां[5] प्रक्रियाकौमुद्याः प्रसाद-टीकायां च[6] स्वीक्रियते। परं भाषावृत्तौ "अच्छेत्यव्ययमाभीक्ष्ण्यवृत्तिरित्युक्तम्[7]। तस्माद् भाषावृत्तिकारस्य मतेन आभीक्ष्ण्येन गत्वा उक्त्वा चेत्याद्युदाहरणार्था भवन्ति। अत्र भाषावृत्तिप्रतिपादितोऽर्थोऽन्यथैवेति वक्तुं दुःशकम्, तद्बाधकप्रमाणानुपलम्भात्। प्रयोगरत्नमालाव्याकरणेऽपि भाषावृत्तेरेव मतं स्वीकृतम्[8]।

जैनेन्द्रव्याकरणस्य महावृत्तौ[9] शाकटायनव्याकरणस्य चिन्तामणि-वृत्तौ[10] च अच्छशब्द आभिमुख्यार्थो दृढार्थश्च प्रतिपाद्यते। तन्मतेन अभि-

---

1. काशिका 1.4.69,
2. श० कौ० 1.4.69,
3. सि० कौ०, तत्पुरुषसमासप्रकरणम्, पृ० 72,
4. व्या० सि० सुधा० 1.4.69,
5. व्या० दी० 1.4.69,
6. प्र० कौ० प्रसादटीका, समासप्रकरणम् (पूर्वार्धम्) पृ० 519,
7. भाषा० 1.4.69,
8. प्रयोग० व्या०, कृद्विन्यासः, कारिका 23, पृ० 331.
9. अच्छशब्दो दृढार्थे आभिमुख्ये च वर्त्तते। जैने० महा० 1.2.138,
10. अच्छेत्यव्ययम् अभिशब्दार्थे दृढार्थे च वर्त्तते। शाक० चिन्ता० 1.1.30,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुखं गत्वा, दृढतापुरस्सरं वा गत्वा इत्याद्युदाहरणार्थो भवति। पद्यबद्ध-सिद्धहेमसरस्वतीवृत्तावपीदमेव प्रतिपाद्यते

गत्यर्थवदसम्बन्धि स्यादच्छेत्यव्ययं गतिः।
अभ्यर्थं च दृढार्थं चेद् अच्छोद्य स्थापयेन्मतम् ॥[1]

द्व्याश्रयकाव्ये "अच्छ" इत्यस्य गतिसंज्ञकस्य प्रयोगो लभ्यते। स चापि अभयतिलकगणिप्रणीतायां टीकायाम् आभिमुख्यार्थो दृढार्थश्च व्याख्यायते—

यशः पिबन्मनोहृत्यारेः पुरस्कृत्य विक्रमम्।
अस्तन्नीयारिमच्छेत्याच्छोद्य कोऽप्यनमत् प्रभुम् ॥[2]

"अच्छेत्य। अच्छेत्यभ्यर्थे दृढार्थे वा। अभिमुखं दृढ वा गत्वा। तथाच्छोद्य अभिमुखं दृढं वोक्त्वा। एतेन छलपरिहार उक्तः। ततोऽरिमस्तन्नीय क्षयं नीत्वा। जित्वा हि भटाः सन्तोषोत्पादनाय प्रभुं प्रणमन्ति[3]।"

□ □

1. सिद्धहेमसरस्वती 3.1.8, पृ० 144,
2. द्व्या० 5.21, पृ०373,
3. द्व्या० 5.21. पृ० 373,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—नित्यं हस्तेपाणावुपयमने । (1-4-77)

"कृञि" इति वर्तते । "हस्ते", "पाणौ" इत्येतौ शब्दो कृञि नित्य गतिसंज्ञौ भवत उपयमने । उपयमनं दारकर्म । पाणौकृत्य । हस्तेकृत्य । दारकर्म कृत्वेत्यर्थ इति वृत्तिः[1] । अत्र "परिणीय" इत्युदाहरणार्थं इति सम्यक् स्फुटीकृतं वृत्तिकारेण । महाभाष्ये त्विदं सूत्रं न व्याख्यातम् ।

चान्द्रव्याकरणे[2] हेमचन्द्रव्याकरणे[3] च काशिकाकाराभिमत एवार्थः स्वीक्रियते । अयमेव चार्थं आख्यात-चन्द्रिकायां भट्टमल्लेन प्रतिपाद्यते[4] ।

---

1. काशिका 1.4.77,
2. चन्द्राचार्येणेत्थं सूत्रितम्—"नित्यं हस्तेपाणावुद्वाहे" चान्द्र० 2.2.58, पृ० 203,
3. हेमचन्द्रस्य सूत्रम्—"नित्यं हस्तेपाणावुद्वाहे" सिद्धहेम० लघुवृत्तियुतम् 3 1.15, पृ० 131,
4. करोति हस्तेपाणिभ्यां कुरुते चोपयच्छते ।
   विवहत्युद्वहित चोद्वाहे परिणयत्यपि ।।
   आख्या० चं० द्वितीयकाण्डे मनुष्यचेष्टावर्गः 40 तमं पद्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रक्रिया कौमुद्याः श्रीकृष्णाचार्यकृतायां प्रकाशव्याख्यायां[1] विट्ठलाचार्यकृतायां प्रसादव्याख्यायां च[2] "परिणीय" इत्येवोदाहरणार्थो मन्यते ।

परं भाषावृत्तिकारेण हस्तेकृत्य पाणौकृत्य इत्यनयोः स्वीकृत्य इत्यर्थो मन्यते । नित्यं हस्तेपाणावुपयमने इति सूत्रं व्याचक्षाण आह भाषावृत्तिकारः—"एतौ स्वीकारे कृञि नित्यं गती स्याताम् । तां हस्तेकृत्य मा श्वसीः, पाणौकृत्य भुङ्क्ते[3]" इति । भागवृत्तिकारस्याप्यतदेव मतम् इति भागवृत्तिसङ्कलने समुद्धृतेन संक्षिप्तसारटीकाया उद्धरणेन ज्ञायते[4] । रावणवधकाव्यस्य कर्तुं भट्टिस्वामिनश्चापोदमेवाभिमतमिति तत्प्रयोगैरवगम्यते ।[5]

---

1. उपयमनं विवाहः—हस्तेकृत्य परिणीयेत्यर्थः । प्र० कौ० प्रकाशव्याख्यायुता, द्वितीयभागः, समासप्रकरणम् पृ० 142,

2. उपयमने विवाहकर्मणि । हस्तेकृत्य । पाणौकृत्य । दारकर्म कृत्वेत्यर्थः । प्र० कौ० प्रसादव्याख्यायुता, पूर्वार्धम्, समासप्रकरणम्, पृ० 521,

3. भाषा० 1.4.77,

अत्र भाषावृत्तिकारेण" तां हस्तेकृत्य मा श्वसीः" इत्युदाहरणत्वेनोद्धृतं पद्यं भट्टिकाव्ये (6.16) विद्यते ।

4. उद्धरणमिदम् "उपाद्यमः स्वकरणे" इति सूत्रेण सह संकलितम्—"विवाहे वाच्य इति जयादित्यव्याख्यानेऽसन्तोषात् "हस्तेकृत्य महास्त्राणि" इति प्रमाणोपदर्शनाय भट्टिप्रयोगो दर्शितः । भागवृत्तिकृतोऽपि एतदेव मतम्" (सक्षिप्तसारटीका—कृदन्त 477) भागवृत्तिसंकलनम् पृ० 10,

इदमत्रावधेयं यत्साम्प्रतमुपलभ्यमानेषु मुद्रितभट्टिकाव्य-पुस्तकेषु "हस्तेकृत्य महास्त्राणि" इत्यस्य स्थाने "उपायंस्त महास्त्राणि" (भट्टि० 15.21) इति पाठो लभ्यते । परन्तु पदमञ्जरीकारेणापि "नित्यं हस्ते पाणावुपयमने" इत्यत्र वृत्तिव्याख्याने—"अन्ये तु स्वीकरणमात्रमिच्छन्ति हस्तेकृत्य महास्त्राणीति" इत्युक्तम् एतेनानुमीयते यत् पुरा भट्टिकाव्येऽयमपि पाठ आसीदिति । अन्यस्य वा ग्रन्थस्यायं पाठो हरदत्तेनोद्धृतः स्यात् ।

5. भाषावृत्तावुद्धृतेन "तां हस्तेकृत्य मा श्वसीः" इति भट्टिकाव्यस्य प्रयोगेणेदं स्पष्टं यद् भट्टिरत्र स्वीकारमात्रमर्थं मन्यते । अन्ये चापि भट्टिकाव्यस्य प्रयोगा अग्रे स्वीकारार्थकप्रयोगप्रदर्शनप्रसंगे उद्ध्रियन्ते, यैरिद भूयोऽपि समुपोद्बलितं भविष्यति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थमत्र व्याख्यातॄणां मतं द्वेधा विद्यते । पदमञ्जर्यां[1] शब्दकौस्तुभे[2] सिद्धान्तकौमुद्यां व्याकरणसिद्धान्तसुधानिधौ[3] व्याकरणदीपिकायां च[4] 'स्वीकारमात्रम् इत्यन्ये'[5] इति कृत्वा द्वितीयमिदं मतं प्रदर्शितम् ।

अथात्र प्रयोगा अपि द्विधा दृश्यन्ते, विवाहेऽर्थे स्वीकारे च, विवाहार्थास्तावत् प्रस्तूयन्ते ।

चम्पूभारते—

तस्यामेव वधूमिमां स रजनौ सद्योऽनुकूलां रहः
पाणीकृत्य विलोकितोत्सवभरो द्वाभ्यां हरिभ्यामपि ।
पौरेषूभयथा जनेष्ववलतां प्राप्तेषु पार्थस्तया
जाग्रत्सारथिविद्यया सह रथारूढः पुरान्निर्ययौ ।।[6]

"अनुकूलां वधूं सुभद्रां सद्यो द्रुतं रहः पाणीकृत्य परिणीय द्वाभ्यां हरिभ्याम् इन्द्रोपेन्द्राभ्यां विलोकित उत्सव-भरो विवाहोत्सवातिशयो यस्य स तथोक्तः पार्थः" इत्यस्य पद्यस्य टीकायां रामचन्द्रबुधेन्द्रः[7] ।

वासुदेवविजये—

मित्रस्य कंस जगतां परकीयमानी
मा भूर्ममोरसिकुरुष्व वचो मदीयम ।
भावत्कमीप्सितमिदं विफलं त्वया यत्
पाणीकृता बत पुरा विधवा भवन्ति ।।[8]

कंसेन शिलायां समास्फाल्य हता कृष्णस्थानापन्ना यशोदाकन्या

1. न्यासपदमञ्जरीयुता काशिका, प्रथमो भागः 1.4. 77, पृ० 609
2. श०कौ० 1.4.77,
3. सि० कौ० तत्पुरुषसमासप्रकरणम्, पृ० 72, निर्णय० 1929,
4. व्या० सि० सुधा० 1.4.77,
5. व्या० दी० 1.4.77,
6. चम्पू० 2.76, पृ० 124,
7. तत्रैव ।
8. वासु० 3.52, पृ० 113,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवीभूयंगता नभःस्था कंसमुवाच इति प्रसंगः। हे कंस ! त्वं जगतां मित्रस्य मम परकीयमानी मा भूः, मां परकीयां मा मन्यस्व। मदीयं वच उरसिकुरुष्व अंगीकुरु। भावत्कं भवदीयमीप्सितं विफलं यत् त्वया पाणौकृताः परिणीताः स्त्रियः पुरा विधवा भवन्ति, आशु विधवा भविष्यन्तीत्यर्थः। पाणौकृतेति। नित्यं हस्तेपाणावुपयमने इति गतिसंज्ञा।" इयमत्रकाव्यकारस्य पदचन्द्रिकाभिधा स्वोपज्ञा टीका[1]। द्व्याश्रयकाव्ये—

साक्षात्कृत्यासिकृत्यां स्वमभिथ्याकृत्य दोर्बलम्।
मिथ्याकृत्य खलान् कीर्तिं हस्तेकृत्यापरोऽनदत्॥[2]

"कीर्तिं जयोत्थं यशो हस्तेकृत्य भार्यां कृत्वा" इत्यत्र अभयतिलकगणिकृता टीका[3]।

पाणौकृत्य रिपोर्लक्ष्मीं प्राध्वंकृत्यापरः परम्।[4]

रिपोर्लक्ष्मीं हस्त्यश्वादिकां पाणौकृत्य भार्यां कृत्वा गृहीत्वेत्यर्थः— इति अत्र अभयतिलकगणिटीका[5]।

सुदर्शनशतके—

पाणौकृत्याहवाग्रे प्रतिभटविजयोपार्जितां वीर लक्ष्मीम्
आनीतायास्ततोऽस्याः स्वसविधमसुरद्वेषिणा पूरुषेण।[6]

कौमुदीकथाकल्लोलिन्याम्—

"महार्हालंकारैरलङ्कृत्य मगधेश्वरप्रदत्तां पद्मावतीं........। वत्सेशः पाणौकृत्यापि न तत्याज हृदयात् क्षणमपि तत्रालक्षितस्थितां वासवदत्ताम्"[7] इति।

---

1. वासु० 3.52, पृ०113,
2. द्व्या० 5 27, पृ० 276,
3. तत्रैव पृ० 276–77,
4. द्व्या० 5.28, पृ० 377,
5. द्व्या० 5.28, पृ० 377,
6. सुदर्शन० 56,
7. कौ० कथा०, पूर्वार्धम्, तृतीयकल्लोलः, पृ० 51,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ये च "नित्य हस्ते पाणावुपयमने" इत्यत्र स्वीकरणमात्रेऽपी-च्छन्ति गतिसंज्ञां तेषां प्रयोगाः प्रस्तूयन्ते ।

अर्जुनरावणीये–

ऊरीकृत्य क्ष्माभृता तस्य पातं हस्तेकृत्य व्याततज्यं च चापम् ।
विद्धः सिंहो वक्षसि क्षिप्रसारादस्तंगत्य प्राणवृत्त्या विमुक्तः ॥[1]

घ्नन्तः पुरुषास्तुरंगिणः पाणौकृत्य कशां मृगव्रजम् ।
तं वागुरया परे पुनः प्राध्वङ्कृत्य कृतार्थतां ययुः ॥[2]

अत्र काव्यकारस्य भट्टभूमकवेः स्वीकारे ग्रहणे वा प्रयोग इति स्फुटम् ।

भट्टिकाव्ये–

सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाशासते लोलां तां हस्तेकृत्य मा श्वसीः ॥[3]

अत्र स्वीकरणेऽर्थे प्रयोगः । हस्तेकृत्य स्वीकृत्य इति जयमंगलः[4] । एतदेव च वीरराघवाचार्यः पाणिनिसूत्रव्याख्यायां सोदाहरणश्लोकायाम् अर्थापयति[5] ।

भट्टिप्रयोगोऽयम् उद्वाहार्थं इत्यपि प्रतिपादयितुं शक्यते । तां श्रियं लक्ष्मीं हस्तेकृत्य परिणीयेति । मल्लिनाथश्चाप्येतत् संकेतयति—"तां श्रिय हस्तेकृत्य उपयम्येत्युपचारः, स्वीकृत्यापीत्यर्थः[6] ।" उपचारात्तु परिणीये-त्यपि स्यात् । तथा चानुपदमेव पठितेन—

---

1. अर्जुन० 3.37,
2. अर्जुन० 3. 41,
3. भट्टि० 6.16,
4. भट्टि० जयमंगलोपेतम् 5.16, पृ० 90
   निर्णय० 1912,
5. पाणि० व्या० पूर्वार्धम्, समासप्रकरणम्, पृ० 222;
6. भट्टि० सर्वपथीनव्याख्योपेतम्, 5.16, पृ०176–77,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात् ।
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते ॥[1]

इतिश्लोकानार्थेपि तत् सगच्छते । अस्त्येतत्, तथापि भट्टिकवेर्मतेन स्वीकरण एवायं प्रयागः । स्वीकरणं च तत् प्रकामं पाणिग्रहणरूपं वा स्याद् अन्यज्जातीयकं वा स्याद् इति । कुत एतद् गम्यते ? उपयमने --इत्युच्यते, उपयमनस्य चार्थं भट्टिः स्वीकरणमेव मन्यते । कथमेतज्ज्ञायते ? तत्प्रयोगैः खलु ज्ञायते । "विभाषोपयमने"[2] इत्युपयमनस्यार्थं स्वीकरण मत्वैव स प्रयुङ्क्ते—"शस्त्राण्युपायंसत जित्वराणि"[3] "उपायस्त महास्त्राणि"[4] इति । तथैव च "नित्य हस्तेपाणावुपयमने"[5] इत्यत्राप्युपयमनस्यार्थं स्वीकरण मन्यते । अस्मिन्नेवार्थे च प्रयुङ्क्ते "तां हस्तेकृत्य मा श्वसीः"[6] इति, स्वीकृत्य इत्यर्थः । स्वीकरणेऽर्थेऽयं प्रयोगोऽस्त्यत एव स्वीकारे गतिसंज्ञेति प्रतपादिकः पुरुषोत्तमदेवोऽपि भाषावृत्तौ स्वमतानुकूलमेतदुदाहरणत्वेनोद्धरति[7] । "उपाद्यमः स्वकरणे"[8] इत्यत्रापि भट्टिः स्वकरणं स्वीकरणसामान्यं मन्यते ।[9] आत्मनेपद-प्रयोग-प्रदर्शन-प्रकरणे चैतत प्रयुङ्क्ते—

"कोपात् काश्चित प्रियैः प्रत्तमुपायंसत नासवम्" ।[10]

आसवं नोपायंसत न स्वीकृतवत्य इत्यर्थः । एवमनेन विवेचनेनेद सम्यगवगम्यते यद् भट्टिः उपयमन स्वकरणं च स्वीकारमात्र मन्यते । आतश्च "हस्तेकृत्य" इति तत्प्रयोगोऽपि स्वीकरण एव ।

इत्थमत्र प्राचीनानां व्याख्यातॄणामपि वैमत्यं वर्त्तते । एतस्मिन्नति-निबिडतरं स्थिते मतद्वैधे सूत्रकारस्य भगवतः पाणिनेराचार्यस्य किमभिप्रेतमासीदितीदं खलु दुर्निणयं जातम् । ▫▫

1. भट्टि० 5.17,
2. अष्टा० 1.2.16,
3. भट्टि० 1.16,
4. भट्टि० 15,21,
5. अष्टा० 1.4.76,
6. भट्टि० 5.16,
7. भाषा० 1.4.77,
8. अष्टा० 1 3.56,
9. काशिकाकारस्तु उपाद्यमः स्वकरणे (काशिका 1.3.58) विभाषोपयमने (काशिका 1.2.16) इत्युभयत्रापि "दारकर्म" इत्यर्थं व्याख्याति ।
10. भट्टि० 8.33,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्-जीविकोपनिषदावौपम्ये ।(1-4-79)

कृञि इति वर्त्तते । "जीविका" "उपनिषद्" इत्येतौ शब्दौ औपम्ये विषये कृञि गतिसंज्ञौ भवतः[1] इति वृत्तिः ।

जीविकाकृत्य, उपनिषत्कृत्य इत्युदाहरणे । अनयोरुदाहरणयोः कोऽर्थः कथं च प्रयोग इत्यत्र मीमांस्यते ।

जीविकाकृत्य

जीविका जीवनोपायः । जीविकामिव कृत्वा जीविकाकृत्य इति हरदत्तजिनेन्द्रबुद्धी[2] । बालमनोरमायां वासुदेवदीक्षितस्त्वेतद् भूयोऽपि स्पष्टयति—"अशनपानादिजीवनोपायो जीविका । तामिव अवश्यं कृत्वेत्यर्थः[3] । एतेनेद गतम्—यथा जीविका खल्ववश्यं क्रियते न कदाचित् परिहीयते, तथा यत् कार्यं जीविकेव अवश्यं क्रियते, अपरिहार्यतयाऽनुष्ठीयते, तत्रेदं प्रयुज्यते जीविकाकृत्येति । तथा च प्रक्रियासर्वस्वे नारायणभट्ट-प्रदर्शितं वाक्यं प्रयुज्यते "जीविकाकृत्य दीव्यति"[4] इति । यथाशनपानादिजीवनोपायोऽवश्य क्रियते तथा द्यूतव्यसनप्रसक्तः पुरुषो द्यूतं जीविकाकृत्य जीविकामिव कृत्वाऽवश्यं दीव्यति, न परिहरतीति यावत् । सिद्धहेम-सरस्वतीवृत्तिकारोऽप्येतादृशमेवोदाहरणं प्रस्तौति—"धर्मो जीविकाकृत्य रक्ष्यताम्"[5] इति । यथा जीविकाऽवश्यं रक्ष्यते तथा

---

1. काशिका 1.4.79,
2. काशिका न्या० पद० युता 1.4.79, पृ० 610–11,
3. सि० कौ० बाल०, तत्पुरुषसमास-प्रकरणम्, पृ० 541,
4. प्र० सर्व०, चतुर्थभागः, समासखण्डः, पृ० 29,
5. सिद्ध० सर० 3.1.17, पृ० 145–46,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदौपम्येनावश्य रक्ष्यतां धर्मं इत्यर्थः। एतेनेदं स्पष्टं यज्जीविकाया औपम्येनात्र क्रियमाणस्य कर्मणोऽवश्यंकारिता द्योतिता भवति। सिद्धहेम-शब्दानुशासनबृहन्न्यासस्य अनुसन्धानाख्ये विवरणे मुनिविजयलावण्य-सूरिरप्येतदेव समर्थयति[1]।

इमानि च भूयः सूत्रस्यास्योदाहरणानि भवन्ति—

जीविकाकृत्य स्वाध्यायमधीते श्रोत्रियः।
जीविकाकृत्याग्निं जुहोति अग्न्याहितः।

ब्राह्मणकुले शास्त्राभ्यासो राजन्यकुले च शस्त्राभ्यासो जीविका-कृत्यानुष्ठीयते। जीविकावदवश्यमनुष्ठितो भवतीत्यर्थः।

जीविकाकरोति वेदाध्ययनम् आर्यः।

उपनिषत्कृत्य

"उपनिषद् रहस्य वेदान्तजन्य ज्ञानं वेदान्तभागो वा। उपनिषदमिव कृत्वा उपनिषत्कृत्य" इति हरदत्तः[2]। बालमनोरमायां वासुदेवदीक्षित-श्चैतद् भूयोऽपि विशदयति—उपनिषद् वेदान्तभागः तामिव रहसि ग्राह्यत्वेन कृत्वेत्यर्थः[3]।" अनेनैतद् गम्यते यद् उपनिषद् रहसि ग्राह्यते, श्रद्धधानाय परीक्षिताय योग्यशिष्याय रहस्युपदिश्यते एतच्च कठोप-निषद्गतेन यमनचिकेतसोः संवादेन विस्पष्टम्[4]। एतस्माद् उपनिषत् खलु रहस्यम् इति नामान्तरेणाप्यभिधीयते। हरदत्तमिश्रेण हि रहस्यम् इति उपनिषत्पर्यायत्वेन निर्दिष्टम्।[5]

आतश्च उपनिषद् रहस्यम्। अतो भिन्ना चापि या विद्या रहसि-ग्राह्या श्रद्धधानाय परीक्षिताय योग्यशिष्याय देया भवति सापि उपनिषद् इत्युपचर्यते। तद्यथा कौटलीयार्थशास्त्रे औपनिषदिकं चतुर्दशमधि-

---

1. सिद्ध० बृहन्न्यासानुसन्धानम् 3.1 17, पृ० 29
2. काशिका न्या० पद० युता, 1.4.79, पृ० 610–11,
3. सि० कौ० बाल० तत्पुरुषसमास-प्रकरणम्, पृ० 541,
4. कठोपनिषद्, 1, 2, वल्ली।
5. तत्रैव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करणम् इति पठ्यते ततश्च "चातुर्वर्ण्यरक्षार्थमौपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत" इत्युच्यते[1]। एतद् व्यावृण्वानो गणपतिशास्त्री श्रीमूलाभिधायां टीकायामाह—उपनिषन्नाम औषधमन्त्ररहस्यम्, रहस्यत्वं च गुरूपदेशसमधिगम्यतया गोपनीयत्वात्। उपनिषदेव औपनिषदम्, तदधिकृत्य प्रवृत्तमौपनिषदिकम्। तच्च हिंसात्मकत्वाद् अधर्मिष्ठेष्वेव प्रयोक्तव्यमित्याह चातुर्वर्ण्यरक्षार्थमौपनिषदिकम् अधर्मिष्ठेषु प्रयुञ्जीत इति[2]।

एतेन स्पष्टं यद् उपनिषद् इव यदन्यदपि रहसि ग्राह्यम्, विश्वस्ताय पात्रभूताय देयं तदपि उपनिषद् इत्युच्यते। उपनिषदमिव कृत्वा उपनिषत्कृत्य। उपनिषदमिव रहस्यमिव कृत्वा यत्किंचिद् उच्यते गृह्यते वा तत्रेदं प्रयुज्यते "उपनिषत्कृत्य" इति। तथा च "उपनिषत्कृत्य कथयति" इति भाषावृत्तौ[3] प्रदर्शितमुदाहरणं संगच्छते। प्रक्रिया-सर्वस्वेऽप्येतादृशमेवोदाहरणं प्रस्तूयते—"उपनिषत्कृत्योपदिशति" इति[4]। अत्र हि उपनिषत्समं रहस्यभूतत्वं विवक्षितं भवति। एतदेव हि बृहन्न्यासानुसन्धाने विजयलावण्यसूरिरपि समर्थयति[5]। अथैवं चास्य प्रयोगः कर्तुं शक्यः—

बहवो जनाः सिद्धौषधयोगमुपनिषत्कृत्य स्वप्रियतमाय एव जनायोपदिशन्ति। सोऽपि तमुपनिषत्कृत्यैव धारयति। तेनोपनिषत्कृतं च तं योगं नान्यो जिज्ञासुरधिगन्तुमर्हति।

अद्यत्वे ईश्वरम्मन्याः केचन पुरुषविशेषा आत्मन ईश्वरावतरत्वं मुग्धेभ्यः स्वभक्तेभ्य उपनिषत्कृत्योपदिशन्ति। ते चापि तदुपनिषत्कृत्य श्रद्दधति। अत्र उपनिषत्कृत्य श्रद्दधतीत्यस्य उपनिषदमिव रहस्यमिव

---

1. कौटलीयार्थशास्त्रम्, तृतीयसम्पुटः, औपनिषदिकं चतुर्दशमधिकरणम्, आदितः 146 तमोऽध्यायः। प्रकरणम् 177, परघात-प्रयोगः, पृ० 213,
2. तत्रैव।
3. भाषा० 1.4.79,
4. प्र० सर्व० चतुर्थभागः समासखण्डः, पृ० 29,
5. अत्रौपम्येन जीविकावदवश्यकर्त्तव्यत्वम्, उपनिषत्समं रहस्यभूततत्त्व च विवक्षितम्। सिद्ध० बृहन्न्यासानुसन्धानम् 3.1.17, पृ० 29

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृत्वा = मत्वा श्रद्धधतीत्यर्थः । "करोतिना सर्वधात्वर्थानुवादः क्रियते" इति न्यायेनायमर्थोऽत्राधं लभ्यते ।

अनयोरुदाहरणयोरर्जुनरावणीये भट्टिकाव्ये वासुदेवविजये सुभद्राहरणे च प्रयोगो नोपलभ्यते । पुरातनवाङ्मयेऽनयोः प्रयोगः खल्वन्वेष्टव्योऽस्ति ।

द्व्याश्रयकाव्ये प्रयोग :—

पाणौकृत्य रिपोर्लक्ष्मीं प्राध्वङ्कृत्यापरः परम् ।
स्वाम्याज्ञां जीविकाकृत्योपनिषत्कृत्य चाययौ ।।[1]

कौमुदीकथाकल्लोलिन्याम्—

देव्या वासवदत्तायाः शुद्धतामात्मनो निस्स्वार्थभक्तिं च प्रमाणयितुम् आचम्य प्राङ्मुखोपविष्टो यौगन्धरायण उवाच —यद्यहं राजशुभेच्छुः समुत्कृष्टबुद्धिमतो देवी वासवदत्ता च शुद्धिमती तदा हे लोकपालाः ! सर्वमितद्युष्माभिरुचेलिमम् । येन युष्माकं वाचमुपनिषकृत्य राजा सर्वथा विश्वासपरो भवेत्"[2] इति । युष्माकं वाचमुपनिषकृत्य उपनिषदमिव रहस्यमिव कृत्वा मत्वा इत्यर्थः । सः चायमर्थः करोतेः सर्वधात्वर्थानुवादकत्वाल्लभ्यत इति निर्दिष्टपूर्वम् ।

प्रयोगरत्नमालाव्याकरणेऽन्यथा प्रयोगः

पुरुषोत्तमविद्यावागीशभट्टाचार्यः प्रयोगरत्नमालाव्याकरणे—

"उपमायामुपनिषज्जीविका च समस्यते"[3]

इति विधानं कृत्वा तदुदाहरणत्वेन पद्यमेतदुपस्थापयति—

लक्ष्मीमुपनिषत्कृत्य जीविकाकृत्य पार्वतीम् ।
रराज द्रौपदी मध्येसभमर्जुनमिच्छती ।।[4]

---

1. द्व्या० 5.28, पृ० 377,
2. कौ० कथा० पूर्वार्धम्, तृतीयकल्लोलः, पृ० 63,
3. प्रयोग० व्या०, कृद्विन्यासः, पृ० 331,
4. तत्रैव ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्ष्मीमुपनिषत्कृत्य लक्ष्मीं तुलयित्वा तदौपम्यं कृत्वा तथा पार्वतीं जीविकाकृत्य पार्वतीं तुलयित्वा तदौपम्यं कृत्वा लक्ष्मीवत् पार्वतीवद् इति यावत्। अत्र ग्रन्थकारेण "उपनिषत्कृत्य जीविकाकृत्य" इत्येतौ शब्दौ उपमावाचकौ इव पर्यायत्वेन प्रयुक्तौ इति गम्यते। अन्यथा पद्यार्थानुपपत्तेः। ततश्चेयं वाक्ययोजना भवति— लक्ष्मीरिव पार्वतीव च द्रौपदी मध्येसभम् अर्जुनमिच्छती रराज इति, तदेतन्न युज्यते। "जीविकोपनिषदौ—औपम्ये" इति सूत्रम्। "औपम्ये" इति विषयसप्तमी। तेन औपम्ये विषये जीविकोपनिषदौ कृञि गतिसंज्ञौ भवत इति सूत्रकारवचनादेव सुस्पष्टम्, सर्ववृत्तिकारसम्मतं चेदम्। एवं सर्वसम्मतात् प्रसिद्धादर्थाद् विपरीतोऽर्थ इह कुतः कल्पित इत्यन्विष्यापि हेतुं नाधिगच्छामः।

□ □

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तृतीयोऽध्यायः

काशिकावृत्तिद्वितीयाध्यायगत-विशिष्टोदाहरणानाम्
अर्थः प्रयोगश्च

अव्ययीभाव-सूत्रम्

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु (2.1.6)

"सुप् सुपा इति वर्त्तते। विभक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत् समर्थेन सुबन्तेन सह समस्यते, अव्ययीभावश्च समासो भवति। वचन-ग्रहणं प्रत्येकम् अभिसम्बध्यते इति वृत्तिः[1]"। अत्र समीपवचने शब्दप्रादुर्भावे सादृश्ये च यान्युदाहरणानि तानि विव्रियन्ते।

समीपवचने—

समीपवचने "उपकुम्भम्", "उपमणिकम्" इत्युदाहरणद्वयं वृत्तौ पठ्यते[2]। तत्र प्रथमं स्फुटार्थम्। द्वितीयमत्र अर्थाप्यते। मणिक इति बृहत्कुम्भ उच्यते, तेन बृहत्कुम्भस्य समीपमित्यर्थः। तथा चामरः—"मणिकः स्यादलिञ्जरः[3] इति। अत्र रामाश्रमी टीका—द्वे महाकुम्भस्य "माट" इति

---

1. काशिका 2. 1. 6,
2. काशिका 2. 1. 6,
3. अमर० 2. 9. 31, पृ० 412,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ख्यातस्य"[1]। ऐतेन कुम्भो घटः, मणिको महाघट इति स्फुटम्। अत एव च "उपकुम्भम्', 'उपमणिकम्" इत्युदाहरणद्वयं साहचर्येण वृत्तौ पठितम्।

झुन्झुनूमण्डलान्तर्गतग्रामेषु प्रचरन्त्यां मम मातृभाषायां च महाकुम्भः "मूण" इत्यभिधीयते। एतच्च मणिकशब्दस्यापभ्रंशरूपम् इति प्रतीयते। इदमुदाहरणं काशिकातोऽन्यत्र न लभ्यते[2]।

शब्दप्रादुर्भावे—

शब्दप्रादुर्भावे "इतिपाणिनि", तत्पाणिनि" इत्युदाहरणद्वयं वृत्तौ प्रदर्शितम्। तदेतत्स्पष्टयन्नाह वृत्तिकारः—"शब्दप्रादुर्भावः प्रकाशता शब्दस्य। पाणिनिशब्दो लोके प्रकाशत इत्यर्थः"[3]। अयं भावः-पाणिनिरित्ययं शब्दो लोके प्रादुर्भवति, सर्वत्र श्रूयते, प्रकाशते प्रथते—इति यावत्। अत्र "इति" इत्यव्ययं शब्दप्रादुर्भावे वर्त्तते। "पाणिनि" इतिपदं शब्दस्वरूपपरम् अस्ति। तस्य शब्द-प्रादुर्भावेऽर्थे इति इत्यनेन समासः। पाणिनिपदेन समस्तम् "इति" इत्यव्ययं पाणिनीतिशब्दस्य प्रादुर्भावं प्रकाशतां प्रथितिं वा द्योतयति। तद्यथा 'इतिपाणिनि वर्त्तते"। लोके पाणिनीतिशब्दस्य प्रादुर्भावः प्रकाशता प्रथितिर्वा भवतीत्यर्थः।

एतादृश एवापर "इतीन्द्रम्" इति प्रयोगो लभ्यते महाभाष्यगतवार्त्तिके। "इन्द्र" इति शब्दस्य प्रादुर्भावः तदर्थः। यज्ञेषु खलु इन्द्रस्याह्वानार्थं मन्त्रस्तुतिप्रसंगेन भूयो भूयः इन्द्र इन्द्र इति शब्दः

---

1. अमर० (रामाश्रमीटीकायत:) 2. 9. 31, पृ० 412;
2. भाषावृत्तौ (2. 1. 6) समीपवचने "उपकुम्भम्" इत्येवोदाहरणं पठ्यते। रामचन्द्राचार्येण "उपकृष्णम्" (प्र० कौ० अव्ययीभावसमासप्रकरणम्) इति पठ्यते। एतदेव भट्टोजिदीक्षित–ओरम्भट्ट–विश्वेश्वरसूरिप्रभृतिभिः स्वे स्वे ग्रन्थे गृहीतम्।
3. काशिका 2. 1. 6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रादुर्भूतां भवति। एवमाहूतः पुरुहूतो यज्ञेषूपतिष्ठते-इत्यस्मिन् प्रसंगे सः प्रयोगः—

(वार्त्तिकम्) "इतीन्द्रवद्वा"।[1]

"तद्यथा एक इन्द्रोऽनेकस्मिन् क्रतुशत आहूतो युगपत् सर्वत्र भवति। एवमाकृतिरपि युगपत् सर्वत्र भविष्यति"[2] इति भाष्यम्।

अत्र "इतीन्द्रम्" इत्यतो वतिप्रत्यये कृते "इतीन्द्रवद्" इति प्रयुज्यते। तथा चात्र कैय्यट आह—"शब्दप्रादुर्भावेऽव्ययीभावे कृते वतिः प्रत्ययः[3]।

एवं "तत्पाणिनि" इत्यपि बोध्यम्। अत्र तदित्यव्ययं गृह्यते। यथा चात्र हरदत्त आह—"तच्छब्दो निपातोऽप्यस्ति" इति। स चात्र शब्दप्रादुर्भावे वर्त्तते। "पाणिनि" इति पदं शब्दस्वरूपपरम् अस्ति। तस्य शब्दप्रादुर्भावेऽर्थे तदित्यनेन समासः पाणिनिपदेन समस्तं "तद्" इत्यव्यय पाणिनीति शब्दस्य प्रादुर्भावं प्रकाशतां प्रथितिं वा द्योतयति। तद्यथा—

तत्पाणिनि वर्त्तते लोके। पाणिनीति शब्दस्य प्रादुर्भावः प्रकाशता प्रथितिर्वा भवतीत्यर्थः। पाणिनीयनाटके दर्शनकेसरिणा पण्डितगोपालशास्त्रिणाप्ययमेवार्थः स्फुटं प्रतिपाद्यते।

---

1. महाभाष्यम्, प्रदीपोद्योतसहितम्, द्वितीयो भागः, "सरूपाणामेकशेषः" (1. 2. 64) इति सूत्रस्य 41 तमं वार्त्तिकम्। पृ० 147, हरयाणा साहित्यसंस्थान, गुरुकुल झज्जर (रोहतक)

2. काशिका 2. 1. 6;

3. नाटके ग्रामाध्यक्षेण इतिपाणिनिशब्दार्थं पृष्टः परिषत्स्थविर आह........ "पाणिनिशब्दस्य लोके प्रादुर्भावः प्रकाश इत्यर्थः। अर्थात् जगति सर्वत्रैव अहो पाणिनिः। स हि कीदृक शब्दशास्त्रनिष्णातो विद्यते। धन्यं तस्य वैदुष्यमित्येवं प्रतिजनं तस्य प्रशस्तिः श्रूयते इति"। पाणिनीयनाटके द्वितीयं दृश्यम्, पृ० 9,

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No.
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथैतादृशा अन्ये प्रयोगा इत्थं भवन्ति—

1. पुराकाले सर्वत्र इतिपाणिनि भवति स्म, साम्प्रतं तु न तथा, संस्कृताध्ययनस्य वैरल्यात् ।
2. पराजितेषु शकेषु भारते सर्वत्र इतिविक्रमादित्यं बभूव ।
3. भारतवर्षे न तथेतिबुद्धं भवति यथा जयपाणिब्रह्मदेशादिषु ।
4. कश्मीरेभ्य आकुमारि तद्रामम् इतिकृष्णञ्च श्रूयते ।

अथ कवीनां प्रयोगाः । अर्जुनरावणीये—

"महात्मना येन च नीतिभाजा दुरापमित्युर्जुनमित्यवापे"[1] ।

तेन नीतिभाजा कार्त्तवीर्येण महात्मना "इत्यर्जुनम्" अवापे, स्वनामभूतस्य "अर्जुन" इति शब्दस्य प्रादुर्भावो लब्धः । राजोचितकर्मभिः स्वनाम-विश्रुतिरूपं दुर्लभं यशः प्राप्तम् इति भावः ।

द्व्याश्रयकाव्ये—

नानुज्येष्ठमयुध्यन्तेतिमूलराजमिच्छवः[2] ।

"अर्बुदात् प्राच्या नृपा अनुज्येष्ठं ज्येष्ठानुक्रमेण नायुध्यन्त । क्रमं मुक्त्वाहमहमिकयाऽयुध्यन्त इत्यर्थः । कीदृशाः सन्तः ? इतिमूलराजम्, मूलराजशब्दस्य जयोत्थां ख्यातिमिच्छवः" इतीयमत्र अभयतिलकगणि-टीका[3] ।

सुभद्राहरणे—

इतिक्षमाभर्त्रितिभीमसेनम्
इतिद्युमत्सून्वितिदस्रपुत्रौ ।

---

1. अर्जुन० 4, 4;
2. द्व्या० 5. 41; पृ० 385,
3. " " "

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बभूव तेषामिति दिक्षु शब्दः
स्वं भूरि सम्पादयतां स्ववीर्यैः ।।[1]

अत्र काव्यकारस्य स्वोपज्ञा टीका—"तेषामित्थं दिक्षु शब्दो बभूव। कथमित्यत्राह—इति क्षमाभर्त्रित्यादि। .. ..इतिशब्दस्य शब्दप्रादुर्भावेऽव्ययीभावः। तस्याव्ययत्वात् सुपो यथायोगं लुगभावौ। अहो युधिष्ठिरस्सुराजा, अहो भीमसेनो बलवान्, अहो अर्जुनस्सकलगुणसम्पन्नः, अहो अश्विसुतावभिरूपबुद्धिमन्तावितिते तेषां दिक्षु शब्दः प्रादुर्बभूव। जातावेकवचनम्। शब्दाः प्रादुर्बभूवुः[2]" इति।

सादृश्यवचने—

अत्राह वृत्तिकारः—"सादृश्यं तुल्यता। किमर्थमिदमुच्यते यथार्थ इत्येव सिद्धम्।[3]" अयं भावः—प्रकृतसूत्रेण यथार्थे समासविधानं क्रियते, यथार्थे यदव्ययं तत् समर्थेन सुबन्तेन सह समस्यते इति। चत्वारश्च यथार्थाः, योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति। तेन यथार्थ इत्येव सादृश्ये सिद्धं समासविधानम्, पुनः कथं सादृश्ये इत्युच्यते इति मनसिकृत्य प्रश्नः। अथ उत्तरमाह—"गुणभूतेऽपि सादृश्ये यथा स्यात्, सदृशः किख्या सकिखि"[4] इति। अयमभिप्रायः यदि सादृश्ये इति नोच्येत तदा पूर्वपदार्थप्रधानोऽव्ययीभाव इति यदा सादृश्ये विशेष्यत्वात् प्रधानं भवति तदेव स्यात् सादृश्यं किख्या सकिखीति। गुणभूते तु न स्याद्, अस्माद् वचनाद् भवति। सदृशः किख्या "सकिखि" इति। अत्र सादृश्यवतः प्राधान्यमस्ति सादृश्यं च गुणभूतम्। तदिद पुनः सादृश्यवचनाल्लभ्यते।

---

1. सुभद्रा० 1. 69, पृ० 29,
2. सुभद्रा० 1. 69, पृ० 29,
3. काशिका 2. 1. 6,
4. काशिका 2. 1. 6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकृतसूत्रेण यथार्थे समासविधानं क्रियते। तत्र यथार्थश्चित्वारः प्रदर्शिता वृत्तौ—योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति। तत्र क्रमेण योग्यतावीप्सापदार्थानतिवृत्तिष्वेव वृत्तिकारेणोदाहरणानि प्रदर्शितानि, सादृश्ये तु न। अत्र पुनः सादृश्यग्रहणस्य गुणभूतेऽपि सादृश्ये यथा स्यादिति प्रयोजनमुक्त्वा सदृशः किख्या "सकिखि" इत्युदाहरणमुपन्यस्तम् अत्र हि सादृश्यं गुणभूतम्। तद्वांश्च प्रधानभूतः। एतेनेदं गत यत्पूर्वं यथार्थतया प्रतिपादिते सादृश्येऽपीदमेवोदाहरणं भविष्यति, परन्तु तत्र सादृश्यं प्रधानभूतं गम्यते पूर्वपदार्थप्रधानत्वादव्ययीभावस्य। तद्यथा सादृश्यं किख्या सकिखि। किखीतुल्यता इत्यर्थः। यदा च पुनः सादृश्यवचनाद् गुणभूतेऽपि सादृश्ये समासः, तदा सदृशः किख्या "सकिखि" इत्येवम् इदमुदाहरणं भवति। इत्थमिदमेकमेवोदाहरणं द्विधा व्याख्यातम् उभयत्रोपतिष्ठते यथार्थे इत्यत्र सादृश्ये प्रधानभूते। पुनः सादृश्यवचनाच्च सादृश्यं गुणभूतेऽपीति।

उदाहरणे "किखी शब्दः पठ्यते। अपचितपरिमाणा शृगाली किखी इति हरदत्तः[1]। सादृश्यं किख्या सकिखि। तथा च सदृशः किख्या सकिखि इति। अत्र सादृश्ये सदृशे चार्थे सह शब्दो वर्त्तते। तस्य "अव्ययीभावे

1. एतदेव च हेमाचार्यमतम्—"शिवाभेदेऽल्पके किखी"। अभि०चिन्ता०4·356, पृ० 311, स्वामिद्वारिकादासशास्त्रि-कालिकाप्रसादशुक्लाभ्यां सम्पाद्य काशिकावृत्या सह प्रकाशितायां पदमञ्जर्यां (काशिकान्यास- पद० युता० द्वितीयो भागः 2. 1. 6. पृ० 23) अपचितपरिमाणः शृगालः किखी इति पुल्लिंगार्थनिर्देशो लभ्यते। सोऽयमसाधुपाठः। कुतः? किखीशब्दस्य स्त्रीलिंगप्रकृतित्वात्। हरदत्तमिश्रकृतपाठश्च स्त्रीलिंगार्थविशिष्ट एवासीत्। यथाह भाषावृत्तेः सम्पादकः श्रीशचन्द्रचक्रवर्तिभट्टाचार्यः अपचिपरिमाणा शृगाली किखी इति हरदत्तादयः (भाषा० 2. 1. 6 इति सूत्रस्य टिप्पणी, पृ० 62) भट्टोजिदीक्षितोऽपि हरदत्तमनुसरन् शब्दकौस्तुभे (2. 1. 6.) स्त्रीलिंगार्थविशिष्टमेव पाठं निर्दिशति---"अपचित-परिमाणा शृगाली किखी" इति। अयमेव च पाठो विश्वेश्वरसूरिणा व्याकरणसिद्धान्तसुधानिधौ (2. 1. 6) गृह्यते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चाकाले[1]" इति स-भावः। "अव्ययीभावश्च[2]" इति नपुंसकत्वाद "ह्रस्वो नपुंसके प्रातिपदिकस्य[3]" इति ह्रस्वः।

अथास्योदाहरणस्य प्रयोगः। सादृश्ये प्रधानभूते—

सकिखि देवदत्ताया अस्ति।

कश्चिद् दुर्बलाम् अपचितपरिमाणां देवदत्तां दृष्ट्वाह—देवदत्तायाः[4] सकिखि = किखीतुल्यता अस्ति, अपचितपरिमाणत्वात्।

तथा च—सकिखि दृश्यते देवदत्तायाः। किखीसदृशता दृश्यते देवदत्ताया अपचित-परिमाणत्वात् "सकिखि" इति अप्रसिद्धोदाहरणं चिरन्तन-प्रयोग इति हरदत्तः। एतेन ज्ञायते पुरातनपरम्पराप्राप्तत्वाद् अप्रसिद्ध-मपीदमुदारणं वृत्तिकारेण गृहीतम् इति। इत्थमन्यानि चाप्युदाहरणान्यत्र भवन्ति। तद्यथा नारायणभट्टस्य—

"सकृष्णम् अस्ति पार्थस्य"[5] तत्सादृश्यमित्यर्थः

हरिनामामृतव्याकरणे च—

"हरेः सादृश्यं सहरि प्रद्युम्ने"[6] इति।

अन्यच्चापि—यूनः प्रद्युम्नस्य सकृष्णं दृष्ट्वा व्यामुह्यन्ति स्म जनाः कृष्णोऽयमाहोस्वित् प्रद्युम्न इति।

अथ गुणभूते सादृश्ये उदाहरणवाक्यानि—

सदृशः किख्या सकिखि। देवदत्तेयं सकिखि विद्यते अपचितपरि-माणत्वात् किखी-सदृशी अस्तीत्यर्थः।

---

1. अष्टा॰ 6. 3. 80,
2. अष्टा॰ 1. 1. 40,
3. अष्टा॰ 1. 2. 47,
4. काशिका न्यास-पद॰ युता द्वितीयो भागः, 2. 1. 6, पृ॰ 23,
5. प्र॰ सर्व॰ चतुर्थो भागः समासखण्डः, पृ॰ 4,
6. हरि॰ व्या॰ समासप्रकरणम्- 1854, पृ॰ 807,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रक्रियासर्वस्वे—

"सकृष्णं पार्थः[1]" । कृष्णसदृशोऽस्तीत्यर्थः । सादृश्यमत्र सदृशपरमिति भट्टः[2] ।

अन्यच्च—आकृत्या गुणैश्च प्रद्युम्नः सकृष्णं बभूव । कृष्णसदृशो बभूवेत्यर्थः ।

अथ श्रीहर्षस्य प्रयोगः—

सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु ।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं ववृते पुराणम् ।।[3]

अत्र पाणिपक्षे "सपल्लवम्" इति सादृश्येऽव्ययीभावः । पल्लव-सदृशम् इत्यर्थः ।

□ □

1. प्र० सर्व० चतुर्थो भागः समासखण्डः, पृ० 4,
2. प्र० मर्व० चतुर्थो भागः समासखण्डः पृ० 4,
3. नैषधीय० 10. 84,

अत्र श्रीमन्नारायणकृता नैषधीयप्रकाशभिधा टीका—पुराणं तत्प्रसिद्धं यस्य पाणियुग्मं जातम् । किम्भूतम् ? सपल्लव कथाख्यायिकादियुक्तम् ।........... किसलयसदृशं वा । तथा व्यासपराशराभ्यां मुनिभ्यां प्रणीतभावान्निर्मि—तत्वाद् उभयीभविष्णु पुराणोपपुराणतां प्राप्तं मत्स्यकूर्मपद्मवाराहा—दिपदैरुपलक्ष्यमाण निर्दिश्यमानम् । अथ च रेखारूपमत्स्यपदमचक्रादि-सामुद्रिकलक्षणैरुपलक्ष्यमाणम्, पुराणमेव करयुगाकारेण परिणतमित्यर्थः । तत्पुराणमिति वा । सपल्लवमिति पक्षे सादृश्येऽव्ययीभावः । पृ० 430,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अक्षशलाकासङ्ख्याः परिणा। (2-1-10)

अक्षशब्दः शलाकाशब्दः सङ्ख्याशब्दश्च परिणा सह समस्यन्ते। अव्ययीभावश्च समासो भवति। कितवव्यवहारे=द्यूतकाराणां व्यवहारे अक्षशलाकापातनात्मके समासोऽयमिष्यते। पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति। तत्र यदा सर्वे उत्तानाः पतन्ति अवाञ्चो वा तदा पातयिता जयति। तस्यैवास्य पराजयोऽन्यथापाते जायते। अत्रान्यथापतने (विपरिवर्त्तने) कर्त्तृत्वेन अक्षादिभिस्तृतीयान्तैः समासः। विपरिवर्त्तनं पर्य्यर्थः। वैपरीत्यं च जयकालिकवृत्तापेक्षया बोध्यम्, तच्च पराजयरूपमेव। तेन एकवचनान्तेनैवायं समासः, अक्षाभ्यां विपरीतं वृत्तम् इत्याद्यर्थे तु न भवति, अनभिधानात्। तथा चेयं कारिका—

अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत्।
कितवव्यवहारे च एकत्वेऽक्षशलाकयोः ॥[1]

अत्रोदाहरणानि—

अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये—अक्षपरि, शलाकापरि, एकपरि, द्विपरि, त्रिपरि, परमेण चतुष्परि, पञ्चसु त्वेकरूपासु जय एव भवति। अतः

---

1. काशिका 2. 1. 10,
कारिकेयं महाभाष्ये (2. 1. 10) अपि पठ्यते। एतत्समानार्थमेव पद्यं नारायणभट्टः पठति—

पञ्चाक्षद्यूतके सर्वस्यैकरूप्ये जयो भवेत्।
एकद्व्याद्यन्यथात्वे तु समासोऽयं विधीयते ॥

प्र० सर्व०, भाग: 4, समासखण्डः, पृ० 4,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"पञ्चपरि" इति न भवति । एकेनाक्षेणान्यथापतितेन जातो यः पराजयः स "अक्षपरि" इत्युच्यते । एवं "शलाकापरि" इत्यादीनामर्थः ।

कथमेतेषामुदाहरणानां भाषायां प्रयोगः स्यादिति निदर्शनाय श्रृंगारप्रकाशे भोजराजेनोद्धृतं पद्यमत्र प्रस्तूयते—

शलाकापर्यभिद्यूतं चतुष्पर्यक्षपर्यपि ।
विपर्यस्ते विधौ पश्य नलादेरपि जायते ।।[1]

सुभद्राहरणे नारायणकवेः प्रयोगः—

जलप्रति प्राश्य कृतासुधारणै—
स्तपश्चरद्भिर्मुनिभिः क्वचिद्युतम् ।
क्वचिद् द्विपर्यक्षपरीति जल्पता,
गुहागृहे दिव्यजनेन दीव्यता ।।[2]

अत्र काव्यकारस्य स्वोपज्ञा टीका—"क्वचित्तु गुहागृहे दीव्यता क्रीडता जनेन युतम् । कीदृशेन ? द्विपर्यक्षपरीति जल्पता । अक्षेणेदं न तथा वृत्त यथा पूर्वं जये, अक्षाभ्याम् इदं न तथा वृत्त यथा पूर्वं जये इति जल्पता"[3] ।

□ □

1. श्रृंगार० (प्रथमभागः) द्वितीय-प्रकाशः, पृ० 76,
2. सुभद्रा० 10. 6., पृ० 232,
3. सुभद्रा० 10. 6., पृ० 233,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—नदीभिश्च [2. 1. 20]

सङ्ख्या इत्यनुवर्तते। नदीवचनैः शब्दैः सह सङ्ख्या समस्यते। अव्ययीभावश्च समासो भवति। समाहारे चायमिष्यते इति वृत्तिः[1]।

उदाहरणानि—

सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्[2]। समाहारे समासस्येष्टत्वाद् उदाहरणानि समाहारविषयाण्येव। एतच्चाभिधानस्वाभाव्याल्लभ्यते। समाहारश्चात्र नदीनां सम्भूयैकप्रवाहतारूपोऽर्थोऽभिप्रेतोऽस्ति।

सप्तगङ्गम्—

सप्तगङ्गाः समाहृताः सप्तगङ्गम्। सप्तानां गङ्गानां समाहारे इदमुदाहरणं भवति। गङ्गा च पुनरेका एवेति सार्वलौकिकम्। कथं तर्हीदमुदाहरणं स्यात्? अत्राह नारायणभट्टः—सप्तधाभूतानां गङ्गास्रोतसां समूहः सप्तगङ्गमिति[3]। इत्थं चेदमुदाहरणमुपपद्यते।

क्व खलु गङ्गा सप्तसु स्रोतस्सु विभक्ता क्व च पुनस्तेषां समाहारो जातो यो हि सप्तगङ्गमित्युच्यते—इत्येतदन्वेष्टव्यमस्ति।

---

1. काशिका 2.1.20,
2. काशिका 2.1.20,
3. प्र० सर्व० चतुर्थो भागः, समासखण्डः, पृ० 7,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुश्रुत्या चैतत् शृणुमो यद् हरद्वारस्य सप्तसरोवर-इति नाम्ना सम्प्रति ख्याते स्थले गङ्गा सप्त ऋषीन् तपस्यतो दृष्ट्वा सप्तभिर्धाराभिर्विभक्ता सती तदासनानि परिहृत्याग्रे गता, ततश्च तान् ऋषीन् अतिक्रम्यैकप्रवाहतां प्राप्ता इति । सप्तसरोवराख्ये स्थाने अद्यापि विख्यातः सप्तर्षि-आश्रमो विद्यते ।

द्वियमुनम्—

द्वे यमुने समाहृते द्वियमुनम् । द्विधाभूतयोर्यमुनास्रोतसोः समाहार इत्येवार्थोऽत्रापि प्रतीयते । ननु क्वस्विद् यमुना द्विधा विभक्ता, क्व च पुनस्तस्याः समाहार इत्येतदपि नूनं गवेषणीयमस्ति ।

पञ्चनदम्—

पञ्चानां नदीनां समाहारः पञ्चनदम् । पञ्चानां नदीनां सङ्गमे सति यो ह्येकः समुदितप्रवाहः स पञ्चनदम् । समासन्तोऽच्[1] ।"अव्ययीभावश्च"[2] इति नपुसंकत्वम् । एतच्च पञ्चानां नदीनां समाहाररूपं पञ्चनदं काशीखण्डस्थं तीर्थम् इति वर्ण्यते स्कन्दपुराणे—

किरणा धूतपापा च पुण्यतोया सरस्वती ।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्तिताः ।।

अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
तत्राप्लुतो न गृह्णीयाद् देहं ना पाञ्चभौतिकम् ।।

तीर्थानि सन्ति भूयांसि काश्यामत्र पदे पदे ।
न पञ्चनदतीर्थस्य कोट्यंशेन समान्यपि ।।

---

1. कृष्णोदकपाण्डुपूर्वाया भूमेरच् प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च सङ्ख्याया उत्तरे यदि ।।
इतिवचनादच् समासान्त इति न्यासे । द्र०—काशिका न्यासपदमञ्जरीयुता, द्वितीयभागः, पृ० 38,
2. अष्टा० 2. 4. 18,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्मिन् पञ्चनदीनां वै सम्भेदेऽघौघनाशिनि ।
स्नानमात्रात् प्रयात्येव भित्वा ब्रह्माण्डमण्डलम् ।।[1]

महाभारते चापि विविधतीर्थवर्णन-प्रसङ्गे इदं तीर्थत्वेन निर्दिश्यते-

अथ पञ्चनदं गत्वा नियतो नियताशनः ।
पञ्च यज्ञानवाप्नोति क्रमशो येऽनुकीर्तिताः ।।[2]

सुभद्राहरणेऽपि पञ्चानां नदीनां समाहारभूतं पञ्चनदं नाम तीर्थम् इत्यभिमन्यमानेन कविना उदाहरणमिदं प्रयुज्यते—

सह स्ववंशप्रभवैर्महर्षिभि—
वने वने बहुवृषि यत्र तिष्ठति ।
विकल्मषं पञ्चनदादिमज्जनै—
श्शिवैश्शनैर्गङ्गजलैः समाप्लुतम् ।।[3]

'स्थानमेतत् सम्प्रति काश्यां "पञ्चगङ्गाघाट" इति नाम्ना विश्रुतम् अस्ति । पुराणवर्णितः पञ्चानां नदीनां समाहारस्त्विह साम्प्रतं न दृश्यते" इति पौराणिककोशे राणाप्रसादशर्मा ।[4]

अथ यदि क्वचिदन्यत्रापि पञ्चानां नदीनां समाहारो भवति, सोऽपि पञ्चनदम् इत्युच्यते । तद्यथा कश्मीरेषु त्रिगमा-वितस्ता-सिन्धु-क्षीर भवानी-अञ्चार इत्याख्यानां पञ्चानां नदीनां समाहारः । "पञ्चनदम् इति

1. स्कन्दमहापुराणम् (द्वितीयो भागः) काशीखण्डोत्तरार्धे- अध्यायसङ्ख्या 59, श्लोक सङ्ख्या 115–118,
2. म० भार० 3. 83. 41, (पूना)
3. सुभद्रा० 10. 13,
4. द्र०—पौराणिककोशे "पञ्चगङ्गा" इति शब्दः । पृ० 284,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निगद्यते। तस्यादूरभवं नगरं च पुरा पञ्चनदपुरम् इत्यभिधीयते स्म।[1]

अत्रेदमवधेयं यत् "पञ्चनदम्" इति अव्ययीभावत्वान्नपुंसकम्। यच्च पुंसि "पञ्चनदः" इति शब्दोऽस्ति "पञ्जाब" इत्यस्य वाचक स खल्वस्य सूत्रस्याविषयः। न हि तत्र पञ्चानां नदीनां समाहारोऽस्ति। किन्तर्हि? पञ्च नद्यस्तत्र सन्ति[2]। अतः पञ्च नद्यो यस्मिन् देशे स पञ्चनदो देशः। बहुव्रीहिरत्र वर्त्तते। समासान्तोऽच्[3]।

अव्ययीभावस्याव्ययत्वात् "पञ्चनदम्" इत्यस्य प्रयोगे विभक्ति-स्थितिर्यथासूत्रं भवति—पञ्चनदं स्नाति, पञ्चनदे स्नाति इति।

सप्तगोदावरम्—

सप्त गोदावर्यः समाहृताः सप्तगोदावरम्[4]। अत्रापि सप्तधाभूतानां

---

1. चरक-संहितायाः पूरको दृढबलः पञ्चनदपुरे जातोऽभूद् इति तदुक्त्या ज्ञायते—
अखण्डार्थं दृढबलो जातः पञ्चनदे पुरे।
कृत्वा बहुभ्यस्तन्त्रेभ्यो विशेषोञ्छशिलोच्चयम्॥
सप्तदशौषधाध्यायसिद्धिकल्पैरपूरयत्।
इदमन्यूनशब्दार्थं तन्त्रं दोषविवर्जितम्।
चरकसंहिता (मूलमात्रम्) सिद्धिस्थानम्, श्लोकसङ्ख्या 39–40, चौखम्बा ओरियण्टालिया बनारस। प्र० सं० (1983)
अस्मिन् प्रसङ्गे चक्रपाणिदत्तटीकायुतायाश्चरकसंहिताया उपोद्घाते यादवशर्मकृता इयं टिप्पणी अवधेयाऽस्ति—
"सम्प्रति पंज्यनोर इति प्रसिद्धं पञ्चनदपुरं कश्मीरराजधानीश्रीनगरादुत्तरतः सार्धत्रिकोशोपरि त्रिगाम–वितस्ता (जिल्हम) सिन्धु-क्षीरभवानी-अञ्चार इति ख्यातानां पञ्चनदीनां सङ्गमतो नातिदूरस्थमिति श्रीनगर (कश्मीर) निवासिनो वैद्यवर्याः श्रीजियालाल शर्माणः"। चरकसंहितायाः तृतीयावृत्तेरुपोद्घातः पृ० 11, निर्णय० 1941,
2. ता नद्यो यथा 1-शतद्रुः 2-विपाशा, 3-इरावती, 4-वितस्ता, 5-चन्द्रभागा इति शब्दकल्पद्रुमः, पृ० 8,
3. कृष्णोदकपाण्डुपूर्वाया भूमेरच् प्रत्ययः स्मृतः।
गोदावर्याश्च नद्याश्च सङ्ख्याया उत्तरे यदि। काशिका 5. 4. 75;
4. "गोदावर्याश्च नद्याश्च सङ्ख्याया उत्तरे यदि" इति वचनादच् समासान्तः। पदमञ्जरी 2. 1. 20;

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गोदावरीधाराणां समूह इत्यर्थः प्रतीयते। महाभारतेऽस्य वर्णनं तीर्थत्वेन लभ्यते—

> सप्तगोदावरे स्नात्वा नियतो नियताशनः ।
> महत्पुण्यमवाप्नोति देवलोकं च गच्छति ।।[1]

महाभारतस्य विवरीता नीलकण्ठो नात्र किञ्चिद् विवरणं प्रस्तौति, येन स्फुटमस्यार्थपरिचयः स्यात् । अनर्घराघवेऽपि सप्तगोदावरशब्दः प्रयुज्यते—

विभीषणो रामं प्रति—"देव ! प्रणम्यतामयमन्ध्रविषयलक्ष्म्याः सप्तगोदावरहारकलापैकनायको भगवान् भीमेश्वरः[2] ।"

अत्र रुचिपत्युपाध्यायस्य टीका—"अन्ध्रविषयोऽन्ध्रनामा देशः। गोदावर्यो नदीविशेषाः। सप्तानां गोदावरीणां समाहारः सप्तगोदावरम्"[3] इति। एतेन सप्तसङ्ख्याका गोदावरीसञ्ज्ञाविशिष्टा नद्य इति टीकाकारस्य भावो व्यज्यते। शोधकारस्य तु सप्तधा विभक्तानां गोदावरीस्रोतसां समाहार इत्येवार्थो युक्ततरः प्रतिभाति। किमत्र वस्तु-भूतं तथ्यमिति निर्विकल्पं निर्णेतुं भूयोऽप्यत्रानुसन्धानमपेक्ष्यते।

□ □

---

1. म० भार० 3. 83. 41; (पूनां)
2. अनर्घ० सप्तमेऽङ्के 202 सङ्ख्याकस्य पद्यस्याग्रे पृ०369, निर्णय० पञ्चम० संस्करणम्। 1937,
3. अनर्घराघवे, तत्रैव।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—तृतीया तत्कृतार्थेन गुणवचनेन । [2. 1. 30]

अत्र सम्प्रत्युपलभ्यमानेषु काशिकापुस्तकेषु "शङ्कुलाखण्डः" "किरिकाणः" इति क्रमेणैतद् उदाहरणयुगलं प्रदर्शितम् अस्ति । शङ्कुलया खण्डः शङ्कुलाखण्डः शङ्कुलेति शस्त्रविशेषः । तेन कृतः खण्डः शङ्कुलाखण्डः इति स्फुटार्थकमेतत् । अथ किरिकाण इति विविच्यते । किरिणा काणः किरिकाणः । किरिरिति शब्द औणादिकः सूकरपर्यायः । "कृगृशॄपृकुटि-भिदिच्छिदिभ्यश्च"[2] इति कृधातोर् इः प्रत्ययः[3] । किरति विक्षिपति भुवमिति किरिः सूकरः[4] । तेन "किरिकाणः" इत्यस्य सूकरेण कृतः काण इत्यर्थो लभ्यते ।

---

1. अत्र शब्दकल्पद्रुमः—"शङ्कुला—उत्पलपत्रिकायाम् इति सङ्क्षिप्तसारोणादिवृत्तिः, पूगकर्तनी "जाँती" इति भाषा इति केचित्" ।
भागः 5, पृ० 10, उत्पलपत्रिकाशब्देनात्र उत्पलपत्राकारः शस्त्रविशेषोऽभिप्रेतोऽस्ति ।
2. उणादिकोशः 4, 141, पृ० 97,
3. कुञ्जुण्णिराजसम्पादितं महादेववेदान्तिवृत्तियुतं संस्करणम् ।
अत्र किद् इत्यनुवर्त्तते । एभ्यः इः प्रत्ययः स च किद् इत्यर्थं । ऋत इद्धातोः (अष्टा० 7. 1. 100) इति इत्वं रपरत्वं च ।
4. महादेववेदान्तिकृतोणादिवृत्तौ (4. 14.), किरिशब्दः सूकरार्थको निर्दिष्टः । पृ० 97, हेमचन्द्राचार्योऽपि किरिशब्दं सूकरपर्यायत्वेन पठति—किरः किरिः, भूदारः सूकरः कोलो वराहः क्रोडपत्रिणौ ।
अभि० चिन्ता० 4.353,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ विचार्यते—यथा शङ्कुलया खण्ड एव क्रियत अतो युज्यते शङ्कुलाखण्ड इत्युदाहरणम् । तथा किरिणा प्रहृतः काण एव क्रियत इति न युज्यते । ननु च यदि किरिणा प्रहृतस्य कस्यचिद् आकस्मिकं काणत्वं स्यात् तदापीदं न युज्यते, लोकप्रसिद्धार्थस्यैवोदाहरणत्वेन समादृतत्वात् । सर्ववृत्तिषूदाहृतत्वान्मूर्धाभिषिक्तमिदमुदाहरणं कथम् अप्रसिद्धार्थकं स्यात् ।

किरिकाण इति पाठस्य समीक्षा

इह किरिकाण इत्यस्य स्थाने गिरिकाण इत्येव पाठो युक्तः प्रतीयते । गिरिरित्यपि औणादिकः शब्दः । "कृगृशृपृकुटिभिदिछिदिभ्यश्च[1] इति गृधातोर् इः प्रत्ययः । गिरिशब्दोऽयं पर्वते वर्त्तते नेत्ररोगभेदे गिरियके (कन्दुके) गीर्णौ (निगरणे) पूज्ये च वर्त्तते[2] । यो हि नेत्ररोगभेदे वर्त्तते स खल्वत्र गृह्यते । गिरिणा नेत्ररोगेण कृतः काणः गिरिकाण इति ।[3]

अथ कोऽयं नेत्ररोगो येन जनः काणो भवति ? नेत्रे समुद्गतो विकृतमांसग्रन्थिर्यो हि दृष्टिमवरुणद्धि स गिरिसञ्ज्ञो नेत्ररोगः ।[4]

---

1. उणादिकोश: 4. 141; पृ० 97,
2. "कृगृशृपृ०" इतिसूत्रव्याख्याने महादेववेदान्तिना गिरिशब्दस्येमे अर्था इत्थं निर्दिश्यन्ते—
   "................किरिः कोले गिरिर्ना नेत्ररुग्भिदि ।
   अद्रौ गिरियके योषिद् गीर्णौ पूज्ये पुनस्त्रिषु" ।।
   उणादिकोशः 4. 141, पृ० 97,
   तथा च हेमचन्द्राचार्यः—
   "गिरिः पूज्येऽक्षिरुजि कन्दुके, शैले गिरियके गीर्णौ" इति
   अनेकार्थसंग्रहः 2.412–413, पृ० 34,
3. तथाहि वाचस्पत्यम्—"गिरिकाणः–गिरिणा नेत्ररोगभेदेन काणः" इति । (वाच० भाग: 4, पृ० 2589) कोऽयं नेत्ररोगः ? एतत्त्वत्र न दर्शितम् ।
4. "हिन्दी शब्दसागर" इत्याख्ये कोशे गिरिशब्दस्य षष्ठोऽर्थः इत्थं निर्दिश्यते— 6. "आंख का एक रोग जिसमें ढेंढर या ढेंटर निकल आती है और आंख कानी हो जाती है" । हिन्दी० भाग 3, पृ० 1286, काशीनागरी प्रचारिणी सभा 1968, अथ ढेंढर (टेंटर) इति किम् ? "ढेंढर—आंख के डेले का निकला हुआ विकृत मांस" । हिन्दी० भाग 4, पृ० 1980, काशी-नागरी० 1968, अथ "डेला" इति किम् ? 'डेला-आंख का सफेद उभरा हुआ भाग, जिसमें पुतली होती है" । हिन्दी० भाग० 4, पृ० 1959, काशीनागरी० 1968 ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गिरत्यावृणोति दृष्टिमिति गिरिः[1], स च प्रायेण एकस्मिन्नेव नेत्रे भवतीति लोके दृश्यते। तेन जनः काणो भवति अत उच्यते गिरिकाण इति। यथा शङ्कुलया खण्डो भवतीति युज्यते सामर्थ्यात्, तथा गिरिणा नेत्ररोगेण काणो भवति इत्यपि युज्यते। इत्थं सुसङ्गतार्थमेतद् भवति गिरिणा काणः गिरिकाण इति।

आचार्य-हेमचन्द्रस्तु गिरिशब्दं कन्दुकार्थं मत्वा प्रयुङ्क्ते—

दाण्डायां गिरिणा काणाः खण्डाः शङ्कुलया मिथः।
ग्राम्या युवतयाऽनूनाः मुष्टिभिः कलहं व्यधुः ॥[2]

अत्र अभयतिलकगणिव्याख्या—

"युवतया यौवनेन अहीना यौवनस्था ग्राम्या ग्रामीणदारका मुष्टिभिर्मिथः कलहं युद्धं व्यधुर्यतो दण्डप्रहरणमस्यां"प्रहरणात् क्रीडायांणः" (6. 2. 116) इति णे दाण्डा शङ्कुलाकन्दुकक्रीडा। तस्यां गिरिणा कन्दुकेन कर्त्रा काणाः कृताः। शङ्कुलागाढपातेनोर्ध्वमुच्छलितेनाक्ष्णो व्याघातात्। तथा शङ्कुलया वक्राग्रया क्रीडनयष्ट्या कर्त्र्या खण्डाः खण्डगुणोपेताः कृताः। मिथः प्रतिकूलमाहन्यमानात् कन्दुकात् स्खलितायाः शङ्कुलायाः पादेषु गाढप्रहारात् कुण्ठीकृता इत्यर्थः।[3]"

---

1. चरक-सुश्रुत-अष्टाङ्ग-हृदय-शाङ्गंधरसंहिता–माधवनिदान–भावप्रकाशप्रभृतिषु आयुर्वेदीयग्रन्थेषु नेत्ररोगपरिगणनप्रसङ्गे "गिरि" इति नाम न निर्दिश्यते। रोगोऽयं तत्र केनाभिधानेनाभिहित इति विवेचनीयमव-शिष्यते। पुरा कस्मिन् आयुर्वेदीये ग्रन्थे गिरिनाम्ना अस्य नेत्ररोगस्य वर्णनमासीद् इत्यप्यन्वेष्टव्यमस्ति। यद्यपि—"गृ निगरणे इति पठ्यते, अनेकार्थत्वात्तु धातूनाम् आवरणेऽप्ययं द्रष्टव्यः। तथा च नारायणभट्टः पर्वतवाचकस्य गिरिशब्दस्य निर्वचनमाह–(गिरत्यावृणोति गमनमिति गिरिः") प्र० सर्व० उणादिखण्डः 4, 155, पृ० 111)। एवं गिरत्यावृणोति दृष्टिमिति गिरिर्नेत्ररोगविशेषः। अथवा औपम्याद् एतद् द्रष्टव्यम्-गिरिरिव गिरिरिति'। तद्धि नेत्रे गिरिरिवोत्थितं भवति।
2. द्व्याश्रयकाव्यम्, प्रथम भागः (3. 10), पृ० 215,
3. द्व्याश्रयकाव्यम्, प्रथम भागः 3. 10, पृ० 215,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सम्प्रत्युयलभ्यमानेषु मुद्रितकाशिकापुस्तकेषु महाभाष्यपुस्तकेषु च "किरिकाणः" इति पाठो लभ्यते[1]।

आधुनिकैः ग्रन्थप्रणेतृभिः स यथादृष्टं प्रतिपाद्यते ।[2]

शब्दकौस्तुभेऽपि "किरिकाणः" इति पाठो दृश्यते[3]। भट्टोजिदीक्षितकृतो मूलपाठस्तु "गिरिकाणः" इत्येवासीदिति सिद्धान्तकौमुद्यन्तर्ग-

---

1. काशिका अनन्तशास्त्रिसम्पादिता, चोखम्बा (1931)
काशिका शोभितमिश्रसम्पादिता, चोखम्वा (1952)
काशिका नारायणमिश्रसम्पादिता, चोखम्वा (3969)
काशिका (न्यासपदमञ्जरीयुता) स्वामिद्वारिकादास–कालिकाप्रसादाभ्यां सम्पादिता (प्राच्य भारती प्रकाशन वाराणसी (1965)
काशिका आर्येन्द्रादिभिः सम्पादिता (1969)
महाभाष्यम्, गुरुप्रसादशास्त्रिसम्पादितम् (1939)
महाभाष्यम् (मूल. मराठी भाषान्तर सहित) वासुदेवशास्त्रि-अभयंकर-सम्पादितम्, शके 1863, महाभाष्यम्, वेदव्रतशास्त्रिसम्पादितम् (1964) महाभाष्यम्, कील्होर्न महाशयेन सम्पादितम्, तस्य तृतीयसंस्करणम् (1952) पूना, कील्होर्नमहाशयेन सम्पादिते महाभाष्ये, उस्मानियाविश्वविद्यालयस्थसंस्कृतपरिषदा प्रकाशितायां काशिकायां च पाठान्तराणां सङ्कलनमस्ति । तत्र "गिरिकाणः" इतिपाठस्तु पाठान्तरत्वेनापि न दृश्यते । एतेन ज्ञायते काशिका–महाभाष्यपुस्तकेषु बहोः कालादयं पाठो विपर्यासं गतः । अतः सङ्गृहीतमातृकासु स पाठः सम्पादकैर्न लब्धः ।

2. तद्यथा पण्डितब्रह्मदत्तजिज्ञासुना अष्टाध्यायीप्रथमावृत्तौ—"किरिकाणः" (सूअर के द्वारा काना किया) इति ।
अष्टा० प्र० 2. 1. 30, पृ० 198, प्रथमं संस्करणम् (1964) देवप्रकाशपातञ्जलेन अष्टाध्यायी-प्रकाशिकायाम्-"किरिणा काणः" किरिकाणः इति । अष्टा० प्रका० 2. 1. 50, पृ० 93, प्रथमसंस्करणम् (सं० 2021 वि०) आचार्यचारुदेवेन व्याकरण-चन्द्रोदये—"किरिणा काणः" किरिकाणः (सूअर द्वारा जो काणा बना है)" इति ।
व्या० चं०, प्रथमखण्डः, समासप्रकरणम्, पृ० 91, प्रथम-संस्करणम् (1969)

3. श० कौ० 2. 1. 30,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तयोणादिव्याख्या सूच्यते । "कृगृशृपृकुटिभिदिछिदिभ्यश्च" इति सूत्रं व्याख्यन्नाचार्यस्तत्राह–"इः कित् स्यात् । किरिर्वराहः । गिरिर्गोत्राक्षिरोगयोः, गिरिणा काणः गिरिकाणः"[1] इति । एतेन स्फुटतरमिदं गम्यते यच्छब्दकौस्तुभेऽपि "गिरिकाणः" इत्येवाचार्यकृतः पाठ आसीत् । पश्चात्तु लिपिकरप्रमादान्मुद्रणदोषाद्वा भ्रष्टः स पाठः ।

पुरुषोत्तमदेवेन भाषावृत्तौ "शङ्कुलाखण्डः" इत्युदाहृत्य द्वितीयमुदाहरणं "शलाकाकाणः" इति प्रदर्शितम्[2] । मन्ये "किरिकाणः" इत्येतद् असङ्गतार्थं विपर्यस्तपाठमुदाहरणं दृष्ट्वास्य स्थाने तेन "शलाकाकाणः इति स्पष्टार्थकमुदाहरणमुपन्यस्तम् । अथवा एतदपि सम्भाव्यते यद् "गिरिकाणः" इति दृष्ट्वापि "गिरिरिति नेत्ररोगे न तथा प्रसिद्धो यथा पर्वते" इति मनसिकृत्य तस्य स्थाने सुगमार्थक "शलाकाकाणः" इत्युदाहृतम्, सुकुमारमतीनां स्पष्टप्रतिपत्त्यर्थम् इति ।

पाणिनीयेतरव्याकरणसम्प्रदायस्य मुद्रितग्रन्थेषु अद्यापि "गिरिकाणः" इत्येव पाठो दृश्यते । चान्द्रवृत्तौ गिरिकाण इति स्फुटं पठ्यते[3] । चान्द्रवृत्तिश्च काशिकातः प्राग्भवा । ऐतेन ज्ञायते काशिकातः पूर्वम् अस्यसूत्रस्येदमुदाहरणं प्रसिद्धमासीत् । तदेव च वृत्तिकारेण गृहीतम् । अतः काशिकायां मूलपाठो गिरिकाण इत्येव आसीद् इति वक्तुं युक्तम् । चान्द्रवृत्तिकारेण चायं पाठो भाष्याद् गृहीतः स्याद् । एतेन भाष्येऽपि पूर्वम् अयमेव पाठ आसीद् इत्यनुमीयते ।

---

1. सि० कौ० (बालमनोरमायुतसंस्करणम्) चतुर्थभागः, उणादिषु चतुर्थः पादः, सूत्रसङ्ख्या 582, पृ० 589, चौखम्बा ।
2. भाषा० 2. 1. 30,
3. "गिरिकाणः" काणादिभावे गिर्यादीनां करणत्वात् ।
   चान्द्रवृत्तिः 2. 2. 16, पृ० 191,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जैनेन्द्रव्याकरणमहावृत्तौ[1] शाकटायनव्याकरणस्य चिन्तामणि-वृत्तौ[2] मलयगिरिशब्दानुशासने सवृत्तिके[3] हैमप्रक्रिया–प्रकाशमहाव्याकरणे[4] प्रयोगरत्नमालाव्याकरणे[5] च गिरिकाण इति पाठ एव विद्यते ।

"गिरिकाणो देवदत्तः" इत्यादिः प्रयोगः । गिरिकृतकाणगुणको देवदत्त इत्यर्थः । काण इत्यस्य काणत्वगुणविशिष्टो देवदत्तादिरित्यर्थं इति प्रकृतसूत्रगतस्य "गुणवचनेन" इति पदस्य व्याख्याने भाष्ये वृत्तौ च प्रतिपत्तिपुरस्सरं प्रतिपादितम्[6] ।

□ □

1. जैने० महा० 1. 3. 27, पृ० 51,
2. शाक० चिन्ता० 2. 1. 36, पृ० 169,
3. मलय० नाम्नि अष्टमः पादः, सूत्रसङ्ख्या 13, पृ० 114;
4. हैमप्र० (पूर्वार्धम्) तत्पुरुषप्रकरणम्, पृ० 279,
5. प्रयो० व्या०, समासविन्यासः 66, पृ० 128,
6. म० भा० 2. 1. 30,
   काशिका 2. 1. 30,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—कर्तृकरणे कृता बहुलम् । (2. 1. 32)

अत्राह वृत्तिकारः—बहुलग्रहणं किम् ? दात्रेण धान्यं लूनवान्, परशुना छिन्नवान्, इह समासो न भवति । पादहारकः, गलेचोपक इति च भवति[1] । अथात्र पादहारकः, गलेचोपक इत्यनयोरर्थो विमृश्यते ।

पादहारकः—

एतदुदाहरणं व्याख्यन् हरदत्तमिश्र आह—"ह्रियत इति हारकः, कृत्यल्युटो बहुलमिति कर्मणि ण्वुल् । पादाभ्याम् इत्यपादान-पञ्चम्यन्तः समासः"[2] इति । स चात्र बहुलग्रहणाद् इति पदमञ्जरी-कारस्याभिप्रायः । अथ पादाभ्यां ह्रियते अपह्रियते पृथक् क्रियत इति पादहारकः । तेन हि पादाभ्यां ह्रियमाणः पृथक्-क्रियमाणः पदार्थः पादहारक इत्युच्यते । तथा च शृङ्गारप्रकाशे भोजराजः—"पादहारकः पङ्कः"[3] इति वाक्यमाह । नागेशश्च पादहारकः पादाभ्यामपसार्यमाणो मञ्जीरादिरिति सूचयति[4] ।

गलेचोपकः—

गले चोप्यते—इति गलेचोपकः । "चुप मन्दायां गतौ, हेतु-मण्णिजन्तात् कर्मणि ण्वल्, अमूर्धमस्तकात्—इत्यलुग्" इति

---

1. काशिका 2. 1. 32,
2. काशिका (न्यासपदमञ्जरीयुता) 2. 1. 32,
3. शृङ्गार०, प्रथमः प्रकाशः, पृ० 34,
4. पादयोर्ह्रियमाणमञ्जीराद्यपेक्षयावधित्वेनापादानत्वम् ।
म० भा० (प्रदीपोद्योतयुतम् 2. 1. 33,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हरदत्तः[1]। गलेचोपक इत्यस्य "गले मन्दं प्रापणीय इत्यर्थः" इति नागेशः । यो गले शनैर्बद्ध्यते स गलेचोपक इति युधिष्ठिर-मीमांसकः[2]। स किन्नाम पदार्थं इति न केनापि निर्दिश्यते। सामान्येन यो गले चोप्यते स गलेचोपकः" इति नागेशादेर्भावः स्यात्। एतेन "गलेचोपकः" इति विशेषणं कस्यचिद् भवति। विशेष्ययुक्तस्यास्य विशेषणस्य वाक्ये प्रयोगस्तु व्याख्यातृभिर्न दर्शितः। न च भट्टिकाव्यार्जुनरावणीयसुभद्रा-हरण-वासुदेवविजयादिषु काव्यशास्त्रेष्वस्य प्रयोगो दृष्टः।

"चुप मन्दायां गतौ" इति धातुः, मन्दगतिश्चात्र यदि किञ्चिच्चलनमिति मन्येत चेद् गलेचोपकः=गले मन्दं मन्दं चाल्यमानो घण्टादिरपि सम्भवति। हस्त्युष्ट्रादीनां गले बद्धा घण्टा मन्दं मन्दं चाल्यते शनैर्गच्छद्भिस्तैः। एतत् खलु सम्भावनामात्रं निर्दिश्यते। तत्वतोऽर्थ-निर्णयस्तु पुरातनप्रयोगोपलम्भमन्तरा दुष्कर एवास्ति।

अथात्र श्रीमतश्चारुदेवाचार्यस्य निर्देशः—यदीमौ विशेषणशब्दौ स्यातां तर्हि नपुंसकनिर्देशेनात्र भाव्यम्—पादहारकम्, गलेचोपकम् इति। अनिर्दिष्टे नपुंसकमिति नियमात्, पुंसि चेमौ पठ्येते भाष्ये काशिकायां च। तेनेमौ सञ्ज्ञाशब्दावित्यनुमीयते। कस्येमे संज्ञे इति मृग्यं खल्वस्ति[3]।

गलेचोपक इत्ययं सञ्ज्ञाशब्द आहोस्विद् विशेषणमिति नागेशस्यापि सन्देहो दृश्यते। यतः स गलेचोपक इत्यत्र सप्तम्या अलुगविधायकानि हलदन्तात् सप्तम्याः सञ्ज्ञायाम्[4], तत्पुरुषे कृति बहुलम्,[5] अमूर्धमस्तकात् स्वाङ्गादकामे[6] इति त्रीणि सूत्राणि विकल्पत्वेन प्रदर्शयति, एषु प्रथमेन द्वितीयेन तृतीयेन वाऽत्रालु इति[7]। □□

---

1. पदमञ्जरी 2. 1. 32;
2. गले में जो धीरे से प्राप्त कराया=बांधा जाता है वह गलेचोपकः।
   म० भा० हिन्दीव्याख्या, तृतीयो भागः 2. 1. 32, पृ० 98,
3. वाचनिकोऽयमाचार्यस्य निर्देशः सम्भाषाप्रङ्गेन गृहीतः।
4. अष्टा० 6. 3. 8,
5. अष्टा० 6. 3. 11,
1. अष्टा० 6. 3. 13,
2. म० भा० (प्रदीपोद्योतयुतम्) 2. 1. 33,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

5

सूत्रम्—अपेतापोढमुक्तपतितापत्रस्तैरल्पशः । (2. 1. 38)

अत्र "कल्पनापोढः इति काशिकायाम् उदाहृतम्[1] । एतदेव च भाषा-वृत्ति[2]-शब्दकौस्तुभ[3]-सिद्धान्तकौमुदी[4]-व्याकरणसिद्धान्तसुधानिधि[5]-व्याकरण-दीपिका[6] प्रभृतिषु ग्रन्थेषु लभ्यते । एतेन गम्यते यत् पुरातनपरम्पराप्राप्तं मूर्धाभिषिक्तमिदमुदाहरणमिति ।

कल्पनाया अपोढः = अपेतः = अपगतः = पृथग्भूत इत्यर्थः ।

अपपूर्वाद् वहतेः क्तः । अपपूर्वो वहतिश्चास्मिन्नर्थे प्रयुज्यमानो दृश्यते[7] ।

कल्पना नाम सङ्कल्पना, मनसि जायमाना विचारपरम्परा वा, ततोऽपेतः पृथग्भूतः "कल्पनापोढः" इत्युच्यते । तद्यथा—

"आकलितसमाधिर्योगी कल्पनापोढो भवति" । इति

---

1. काशिका 2. 1. 38,
2. भाषा० 2. 1. 38,
3. श० कौ० 2. 1. 38,
4. सि० कौ०, तत्पुरुषसमासप्रकरणम्, पृ० 65, निर्णय०, 1929 ई०
5. व्या० सि० नि० 2. 1. 38,
6. व्या० दी० 2. 1. 38,
7. तद्यथा-ममापवाहितो भर्त्ता मृगरूपेण मायया । रामा० 3. 51. 4, (बड़ोदा)
   अपवाहितो दूरं नीतः दूरीकृत इत्यर्थः ।
   दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श । रघुवंशम् 16. 73,
   अपोढनेपथ्यविधिः = अपेतनेपथ्यकल्पन इत्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विचारशून्य इत्यर्थः। अथवा कल्पनेति रचना निर्माणं वा[1]। ततोऽपेतः "कल्पनापोढः" इति। तद्यथा--

"नवार्थकल्पनापोढाः कवयस्त्विह न पूज्यन्ते"। इति।

अथ प्रत्नप्रयोगः—

कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्, यथा रज्जौ सर्पकल्पना[2]। अत्र कल्पनाशब्देन अविद्यमानपदार्थस्य अन्यत्र स्थितस्य अन्यप्रतिभासरूपो मानस-व्यापारो गृह्यते। ततोऽपोढमिह कल्पनापोढमित्युक्तम्।

जैनेन्द्रव्याकरण-महावृत्तावेतत्सदृशमेव-"सुखापोढः"[3] इत्युदाहरणं प्रदर्शितम्। तस्यापि सुखाद् अपोढोऽपेत इति स्फुटमर्थो गम्यते।

अर्थ-प्रकाशिकायां 'कल्पनापोढः" इत्यस्य "कल्पना द्वारा ले जाया गया।" (कल्पनया नीतः, विषयान्तरं प्रापितः) इत्यर्थो निर्दिष्टः[4]। तदेतन्न युक्तं प्रतिभाति। अपादानपञ्चम्यन्तसमासेऽत्र नायमर्थः शक्यो वक्तुम्। कल्पनातोऽपेत इत्येवार्थो युज्यते।

अष्टाध्यायी-(भाष्य)-प्रथमावृत्तौ चास्योदाहरणस्य "कल्पना से बाधित" (कल्पनया बाधितः) इत्यर्थ उक्तः[5]। एतदपि भूतार्थाद् हीयते।

□ □

---

1. तद्यथा अमरकोशस्य पद्ये कल्पनाशब्दो रचनापर्यायः प्रयुज्यते—
"प्रबन्धकल्पना कथा" इति (अमर० 1. 5. 6) प्रबन्धस्य कल्पना रचना निर्माणमिति यावत्।
2. वचनमिद वाचस्पत्ये सर्वदर्शनसंग्रहस्येति कृत्वा उद्धृतम्, द्रष्टव्यम्-वाच० भागः 3, पृ० 1820,
3. जैने० महा० 1. 3. 33,
4. अर्थप्र० तत्पुरुषसमासप्रकरणम्, पृ० 32, प्रथमसंस्करणम् 1966 ई०।
5. अष्टा० प्रथ० 2. 1. 40, पृ० 205, प्र० सं० 1964 ई०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—सिद्धशुष्कपक्वबन्धैश्च । [2-1-41]

अत्र "साङ्काश्यसिद्धः" "काम्पिल्यसिद्धः" इत्युदाहरणद्वयं काशिकायामुपन्यस्तम्[1]। एतदेव च भाषावृत्ति[2]–शब्दकौस्तुभ[3]-व्याकरणसिद्धान्तसुधानिधि[4]–प्रभृतिषु ग्रन्थेषु दृश्यते। एतेनेदमपि पूर्वपरम्पराप्राप्तं मूर्धाभिषिक्तमुदाहरणयुगलम् इति गम्यते। अथानयोरर्थविवेचनम्—

साङ्काश्यसिद्धः, काम्पिल्यसिद्धः—

सङ्काशेन निर्वृत्तं वनं साङ्काश्यम् कम्पिलेन निर्वृत्तं वनं काम्पिल्यम् चातुरर्थिकः सङ्काशादिभ्यो ण्यः। तत्र तपसा सिद्ध इत्यर्थ इति पद-मञ्जर्यां हरदत्तमिश्रः[5]। अयमेव च मिश्रनिर्दिष्टोऽर्थो नागेशभट्टेन बृहच्छब्देन्दुशेखरे[6] भट्टोजिदीक्षितेन शब्दकौस्तुभे,[7] विश्वेश्वरसूरिणा च व्याकरणसिद्धान्त

---

1. काशिका 2. 1. 41,
2. भाषा० 2. 1. 41,
3. श० कौ० 2. 1. 41,
4. व्या० सि० सु० 2. 1. 41,
5. पद० 2. 1. 41,
6. सङ् काशेन निर्वर्त्तिते वने तपसा सिद्ध इत्यर्थः।
   बृहच्छब्दे०, भागः 2, पृ० 1023, वाराणसेयसंस्कृत वि० वि०, 1960,
7. श० कौ० 2. 1. 41,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुधानिधौ[1] स्वीक्रियते। अथ नागेशेन हरदत्त-निर्दिष्टम् अर्थमुपस्थाप्य अयं विशेष उच्यते—"यद्वा साङ्काश्ये नगरे सिद्धः ज्ञात इत्यर्थं"[2] इति।

अथ साङ्काश्यसिद्धः, काम्पिल्यसिद्धः, इत्यनयोरयमर्थोऽपि प्रतिभाति यत् साङ्काश्ये काम्पिल्ये च पुरे सिद्धो निर्मितः पदार्थविशेषः घटादिः पटादिर्वा इति। द्वे चापीमे पुरे प्राचीनभारते प्रसिद्धे बभूवतुरिति तत्र सिद्धस्य पदार्थस्य कृते साङ्काश्यसिद्धः, काम्पिल्यसिद्धः इत्येवं प्रयोगो भवति स्मेत्यनुमानेन ज्ञायते। कस्य पदार्थविशेषस्य कृते इत्थं प्रयोगाः प्रथिता बभूवुर्ये लोकविदितत्वादुदाहरणत्वेनापि गृहीता इति मृग्यं खल्वस्ति।

"साङ्काश्यम्" इति पुरं जनकस्य भ्रातुः कुशध्वजस्य राजधानी आसीदिति रामायणे वर्णितम्[3]। साम्प्रतमिदं नगरम् उत्तरप्रदेशस्य एटामण्डलान्तर्गतं "संकिसा बसन्तपुर" इति नाम्ना विख्यातमस्ति[4]। इदं खलु प्राचीनभारतस्य प्र-िद्धं नगरमासीत्। सङ्काशेन निर्वृत्तत्वाद् इदं पुरं साङ्काश्यम् इतिनाम्ना विश्रुतं बभूव। तस्यैव निकटे सङ्काशेन निर्वृत्तं वनमपि बभूवेति हरदत्तस्य निर्देशाज्ज्ञायते। तद् वनं तापसानां निवासाय निर्मितं तपोवनम् आसीद् इति प्रतीयते। अतः सङ्काशेन निर्वृत्तं वनम् इत्युच्यते। यदि तत् प्राकृतं वनं स्यात्तर्हि नहि निर्वृत्तम् इत्युच्येत। सङ्काशेन निर्वृत्ते तस्मिन् तपोवने तपसा सिद्ध इत्यय हरदत्तस्य भावो गम्यते।

तथा कम्पिलेन निर्वृत्तं पुरं काम्पिल्यम्। तन्निकटे च कम्पिलेन निर्वृत्तं काम्पिल्यं नाम तपोवनम्। तत्र तपसा सिद्ध इति हरदत्तस्याभिप्रायोऽस्ति।

---

1. व्या० सि० सु० 2. 1. 41,
2. बृहच्छब्देन्दु०, भागः 2, पृ० 1023, वाराणसेय संस्कृत वि०वि०, 1960
3. कस्यचित्त्वथ कालस्य साङ्काश्यादागतः पुरात्।
सुधन्वा वीर्यवान् राजा मिथिलामवरोधकः॥
निहत्य त मुनिश्रेष्ठ सुधन्वानं नराधिपम्।
साङ्काश्ये भ्रातरं शूरमभ्यषिञ्चं कुशध्वजम्॥
रामा० 1. 70. 16, 19, (बड़ौदा)
4. द्र०- ऐतिहासिक स्थानावली, पृ० 946,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुराकाले शासका ईदृशानि तपोवनानि कारयन्ते स्मेति कौटलीयार्थं शास्त्रस्य निर्देशेन ज्ञायते—"अकृष्यायां भूमौ विवीतब्रह्मसोमारण्य तपोवन–मृगवनौषधिवनहस्तिवनानि कारयेत्"[1] इति।

काम्पिल्यमित्यपि प्राचीनभारतस्य प्रसिद्धं पुरमासीत्। तद्धि दक्षिणपाञ्चालानां राजधानी बभूवेति महाभारतस्य वर्णनाद् अवगम्यते[1]। साम्प्रतमिदं नगरमुत्तर-प्रदेशस्य फर्रूखाबादमण्डलान्तर्गतं "कम्पिला" इति नाम्ना विज्ञायते[3]।

साङ्काश्यं काम्पिल्यं चेति परस्परान्नातिदूरस्थं प्राचीनभारतस्य प्रसिद्धं नगरद्वयमासीदिति तयोरिह साहचर्येण निर्देशः क्रियते, साङ्-काश्यसिद्धः काम्पिल्यसिद्ध इति।

□ □

---

1. कौटलीयार्थशास्त्रम्, द्वितीयमधिकरणम् अध्यक्षप्रचार।
2. सशिष्येण द्रोणेन पाञ्चालराजं द्रुपदं विजित्य भागीरथ्या दक्षिणे कूले तस्मै राज्यार्धं दत्तम्। उत्तरे कूले च राज्यार्धं स्वयमधिकृतम्—

    राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे।
    सखायं मां विजानीहि यदि पाञ्चाल मन्यसे॥

   म० भार० 1. 128. 12, (पूना)

   स च द्रुपदः—

    माकन्दीमथ गङ्गायास्तीरे जनपदायुताम्।
    सोऽध्यवात्सीद्दीनमनाः काम्पिल्यं च पुरोत्तमम्।
    दक्षिणांश्चैव पाञ्चालान् यावच्चर्मण्वती नदी॥

   म० भार० 1. 128. 15, (पूना)
3. द्र०– ऐतिहासिक स्थानावली, पृ० 158–59,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—उपमानानि सामान्यवचनैः । [1. 2. 55]

अत्र शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता, कुमुदश्येनी, हंसगद्गदा न्यग्रोधपरिमण्डला, इतीमान्युदाहरणानि काशिकायां प्रदर्शितानि[1] । तत्र "शस्त्रीश्यामा" इत्येकमुदाहरणं भाष्ये दृश्यते[2] । तदितराण्युदाहरणानि वृत्तिकारेण सम्प्रत्यनुपलब्धाभ्यः प्राचीनवृत्तिभ्यः सङ्कलितानि स्वयं वा कल्पितानीत्यवकल्पयामः ।

काशिकागतानि शस्त्रीश्यामा, कुमुदश्येनी, हंसगद्गदा, न्यग्रोधपरिमण्डला, इतीमान्युदाहरणानि शाकटायनव्याकरणस्य चिन्तामणिवृत्तौ[3] जैनेन्द्रव्याकरणस्य महावृत्तौ[4] प्रयोगरत्नमालाव्याकरणे[5] च दृश्यन्ते । तत्रेमानि काशिकात एव गृहीतानीति गम्यते । अथैषामर्थः प्रयोगश्च विमृश्यते—

शस्त्रीश्यामा—

शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता । अत्र केचन शस्त्रीव श्यामा = काला = कृष्णवर्णा इत्यर्थापयन्ति । तद्यथा—

---

1. काशिका 2. 1. 55,
2. किं पुनरिहोदाहरणम् ? शस्त्रीश्यामा । म० भा० 2. 1. 55,
3. शाक० चिन्ता० 2. 1. 63,
4. जैन० महा० 2. 3. 50,
   "अत्र हंसगद्गदा" इत्यस्य स्थाने "हंसगमनी" इति पठ्यत इति विशेषः ।
5. प्रयोग० व्या०. समासविन्यासः 44, पृ० 124,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"शस्त्रीश्यामः ववेति जल्पन्[1]"

इति हेमचन्द्राचार्यकृतः प्रयोगः। द्व्याश्रयकाव्यटीकायाम् अभयतिलकगणी तस्यार्थमाह—"शस्त्रीश्यामः क्षुरिकेव कालः[2]" इति। तदिदमयुक्तमिति युधिष्ठिरमीमसांकः। मोमासंकमहोदयस्य मतेन शस्त्रीश्यामेत्युदाहरणस्य शस्त्रीव श्यामा कान्तिमती इत्यर्थो भवति। स हि श्यामशब्दमिह कान्त्यर्थपरं प्रतिपादयति[3]।

अथ सोमेश्वरभूपतिविरचितस्य मानसोल्लासाख्यस्य ग्रन्थस्य वचनमप्यत्र युधिष्ठिरमोमांसकनिर्दिष्टस्य प्रकृतस्यार्थस्योपोद्बलकमिति प्रस्तूयते—

"खड्गश्यामाननाः काश्चित् काश्चित् स्वर्णसमप्रभाः"[4]

स्त्रियो राजोपान्ते स्युरित्यस्य शेषः। "अत्र खड्गश्यामाननाः" इत्यनेन खड्ग इव श्यामं कान्तम् आननं यासां ताः स्त्रिय इत्यर्थो लभ्यते। कृष्णत्वं त्वत्र प्रतिपादयितुं न शक्यम्। अतः "शस्त्रीश्यामा" इत्यस्यापि शस्त्रीव कान्तवर्णा स्त्रो इत्येवार्थ इति गम्यते।

---

1. द्व्या० 5.81, पृ० 407,
2. " " "
3. "शस्त्रीश्यामा में श्यामा शब्द का अर्थ काला नहीं है। कोई भी शस्त्री = कृपाण या तलवार काली नहीं होती, उस पर चमक (पालिश) की हुई होती है। उस पालिश से वह चमकती है। अतः जिस युवक और युवती का मुख उसके ओज से देदीप्यमान हो, उसके लिये श्याम और श्यामा शब्द का संस्कृत भाषा में प्रयोग होता है। चाहे उस युवक-युवती का रंग गौर हो, गेंहुआ हो, अथवा पक्का रंग हो, चाहे कृष्णवर्ण हो। यदि शस्त्रीश्यामा में श्याम शब्द कृष्ण वर्ण का ही वाचक माना जाये, तो चमक (= पालिश) रहित शस्त्री तो शस्त्र धर्म रहित होने मे शस्त्री ही नहीं कहलायेगी। प्रत्येक शस्त्री चमक युक्त ही होती है, उसमें कृष्णवर्णत्व नहीं होता। बिना चमक की, या जंग खाई काली शस्त्री ही नहीं होती। इसलिये किसी भी युवक-युवती के लिये यदि संस्कृत-साहित्य मे श्याम या श्यामा का प्रयोग होवे तो श्याम श्यामा के प्रयोगमात्र से उसे पक्का या काला वर्ण नहीं समझना चाहिये"। म० भा० हिन्दी-व्याख्या, तृतीयभागः, 2. 1. 54, पृ० 141,
4. मानसोल्लासः, द्वितीयो भागः, अध्यायः 11, श्लो० 94,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुमुदश्येनी—

कुमुदमिव कुमुदकुसुममिव श्येनी = श्येता = श्वेता या सा "कुमुदश्येनी"[1] इत्युच्यते । तथा हि व्याकरणचन्द्रोदये —

"कुमुदश्येनी बलाकपङ्क्तिः[2]" इति वाक्यं प्रयुज्यते ।

हंसगद्गदा—

हंसीव गद्गदा हंसगद्गदा[3]। गद्गदा स्खलितवाग् इत्यर्थः । "गद्गद वाक्स्खलने" इति कण्ड्वादिगणे धातुः पठ्यते[4]। या स्त्री हंसीव गद्गदा - मधुरस्खलितस्वरा सा हंसगद्गदा । हंस्या वाक् किल प्रकृत्यैव मधुरा स्खलितान्तरा च भवति । तदिह हंसीवाग्गद्गदत्वं सामान्यवचनत्वेन = साधारणधर्मत्वेन गृह्यते । तेन हंसीव गद्गदा = मधुरस्खलितस्वरा योषिद् हंसगद्गदेति निगद्यते ।

वाचः स्खलनं गद्गदत्वं वा जनानां हर्षशोकभयादिभावातिरेकाज्जायते । तद्यथा साहित्यदर्पणे विश्वनाथ आह—

"मदसम्मदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः"[5]

एतत्सर्वमिह न गृह्यते, किन्तु हंसीत्युपमानस्य यादृशं = यज्जातीयकं गद्गदत्वं तदेवात्राभिप्रेतम् । तच्च मधुरस्खलितस्वनरूपम् । अत एव

---

1. श्वेतार्थवाचकात् "श्वेत" इति शब्दाद् "वर्णादनुदात्तात्तोपधात्तो नः" (अष्टा० 4. 1. 29) इति स्त्रियां ङीप्प्रत्ययः, तकारस्य च नकारादेशः ।
2. व्या० चन्द्रो० प्रथमखण्डः, समासप्रकरणम् पृ० 107,
3. अत्र "पुंवत्कर्मधारयजातीयदेशीयेषु" (अष्टा० 6. 3. 41) इति पुंवद्भावः । तथा हि प्रकृतसूत्र-व्याख्याने नारायणभट्ट आह–"अत्रापि कर्मधारयत्वात् पुंवत्त्वमिष्टम्, मृगीव चपला मृगचपला" इति (प्र० सर्व०, चतुर्थभागः, समासखण्डः, पृ० 18) हरदत्तश्च प्रकृते (उपमानानि०) इति सूत्रवृत्तिव्याख्याने प्रश्नोत्तरप्रपञ्चपुरस्सरं "हंसीव गद्गदा हंसगद्गदेति पुंवद्भावं व्याचष्टे । (द्र०– पद० 2. 1. 55)
4. मा० धातु०, कण्ड्वादिः 24,
5. साहित्यदर्पणः 3. 138,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरुषोत्तमदेव त्रिकाण्डशेषकोशे "हंसगद्गदा" इति शब्दं "मधुरनिस्वना" इत्यस्य पर्यायत्वेन पठति[1]। शब्दकल्पद्रुमकोशेऽपि च "हंसगद्गदा" शब्दस्य "मधुर-भाषिणी" इत्यर्थो निर्दिश्यते[2]। अतो हंसोव या प्रहर्ष-परवशा प्रमदा सहजस्नेहातिशयतया स्खलितमधुरं सदा भाषते सा खलु हंसगद्गदेत्यभिधीयते।

न्यग्रोधपरिमण्डला—

न्यग्रोधस्य वटस्य इव परिमण्डलं=समारोहपरिणाहो यस्या नितम्बभागे, सा न्यग्रोधपरिमण्डला स्त्री। अत्र न्यग्रोधस्य परिमण्डलं सामान्यवचनत्वेन=साधारणधर्मत्वेन गृह्यते। न्यग्रोधपरिमण्डलस्येव स्त्रियो नितम्बस्थलस्य पृथुलता द्योत्यते। अथ शब्दकल्पद्रुमे अस्याथस्यो-पोद्बलकं शब्दमालायाः पद्यमिदमुद्धृतम्—

स्तनौ सुकठिनौ यस्या नितम्बे च विशालता।
मध्ये क्षीणा भवेद् या सा न्यग्रोधपरिमण्डला॥[3]

भट्टिकाव्ये चास्योदाहरणस्य प्रयोगो दृश्यते—

योषिद्वृन्दारिका तस्य दयिता हंसगामिनी।
दुर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला॥[4]

अत्रापि स एवार्थः। मल्लिनाथस्त्विह न्यग्रोधशब्देन न्यग्रोधपत्रम् उपमानत्वेन गृह्णाति। तथा हि भट्टिकाव्यस्य सर्वपथीनाख्यायां व्याख्यायां स आह-"न्यग्रोधपरिमण्डला वटपत्रवद वृत्तानुपूर्वोदरेत्यर्थः। एतदेवाभिप्रेत्य प्रोक्तं सामुद्रे—

काककुक्षिस्तु या कन्या न्यग्रोधपरिमण्डला।
एकं जनयते पुत्रं स च राजा भविष्यति॥ इति।[5]"

1. स्नुषा वधूटी, मधुरनिस्वना हंसगदगदा। त्रिकाण्डशेषः 2. 6. 3,
2. श० कल्प० पञ्चमभागः, पृ० 500,
3. श० कल्प०, द्वितीयभागः, पृ० 929,
4. भट्टि० 5. 18,
5. भट्टि० (सर्वपथीनव्याख्यायुतम्) 5. 18,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र "वटपत्रवद् वृत्तानुपूर्वोदरा" इत्यनेनापि नितम्बस्थलस्य विशालतैव द्योत्यते। एवं व्याख्यानस्य प्रकारभेदेन मल्लिनाथस्तमेवार्थं व्याचष्टे इति न विरोधः।

सूत्रम्—विभाषा सेनासुराच्छायाशालानिशानाम् (2.4 25)

अत्र "श्वनिशम्" "श्वनिशा" इत्युदाह्रियते काशिकायाम्[1]। शुनां निशा श्वनिशा श्वनिशञ्चेति षष्ठीतत्पुरुषः समासः। अस्यार्थो वृत्तिकारेण न निर्दिश्यते। भाषावृत्तावप्यस्योदाहरणस्यार्थो न दृश्यते। हरदत्तस्त्वत्राह "यस्यां निशायां श्वान उपवसन्ति सा श्वनिशम् इत्युच्यते। सा पुनः कृष्णचतुर्दशी, तस्यां हि श्वान उपवसन्तीति प्रसिद्धिः[2]"। शब्दकौस्तुभे भट्टोजिदीक्षितोऽप्येनमेवार्थं स्वीकरोति। एतदुपोद्बलकञ्च मीमांसाशाबरभाष्यस्येद वचनमुपस्थापयति "शुनश्चतुर्दश्यामुपवसतः पश्यामः[3]" इति। बृहच्छब्देन्दुशेखरे नागेशभट्टश्चापि कृष्णचतुर्दशीमेव श्वनिशं मन्वानः "तस्यां हि केचित् श्वान उपवसन्ति[4]" इति विशेषमाह। सिद्धान्तकौमुद्यास्तत्वबोधिनीटीकायां ज्ञानेन्द्रसरस्वत्यपि" केचिद इत्येव मन्यते[5]। कस्य मासस्येयं कृष्णचतुर्दशी, विशेषनिर्देशाभावात् सर्वा वा चतुर्दश्य इति केनापि न निर्दिष्टम्।

अथ अमरकोशस्य दाक्षिणात्यव्याख्यायाम् अमरपदविवृत्तिनाम्न्यामिदमुच्यते "यत्र श्वानः कस्यांचित् कृष्णचतुर्दश्यामुपवसन्ति तत् श्वनिशम् इति क्वचित् प्रसिद्धिः[6]"। एतेन ज्ञायते क्वाचित्की एवेयं प्रसिद्धिः, न सार्वत्रिकीति तेन हरदत्तादीनां तद अर्थकथनं क्वाचित्कीं प्रसिद्धिमाधारीकृत्य वर्त्तत इति प्रतीयते।

न्यासकारस्तु—"यस्यां निशायां श्वानो मत्ताः स्वरन्ति (विहरन्ति इति पाठान्तरम्) सा श्वनिशं श्वनिशेति चोच्यते" इत्याह[7]। तिथि-

---

1. काशिका 2.4.25,
2. पद० 2.4.25,
3. श० कौ० 2.4.25,
4. बृहच्छब्दे० द्वितीय भागः, तत्पुरुषसमासप्रकरणम् पृ० 1083,
5. सि०कौ० (बालमनोरमा तत्वबोधिनीयुता) द्वितीयभागः, तत्पुरुष० पृ० 128,
6. अमर० (दाक्षिणात्यव्याख्योपेतः) भागः 2, 3. 5. 40, पृ० 742,
7. न्यासः 2. 4. 25,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विशेषनिर्देशस्त्वत्र नास्ति। तेन यस्मिन्नृतौ कामोद्रेकेण मत्ताः श्वानो निशायां स्वरन्ति शब्दायन्ते तदृतुगतनिशा अत्र न्यासकारस्याभिप्रेता इत्यनुमीयते। अतस्तस्यर्तोर्यस्यां यस्यां निशायां कामार्त्ताः कुक्कुरा मत्ता इव स्वरन्ति शब्दायन्ते सा सा निशा श्वनिशा श्वनिशं चेत्युच्यत इति न्यासकाऽरस्य भावो लक्ष्यते। दृश्यते च प्रायेण शरदृतुरात्रिषु ग्रामोपान्ते मदनावेगपरवशा मत्ता इव शब्दायमानाः श्वानः। अत्रेदम् अवधेयं यत्तच्छब्दनं कुक्कुराणां भषणात्मकं न भवति। तत् खलु "हू हू" इत्येवञ्जातीयकं भषणात् किञ्चिन्मृदुस्वरं भवति। तद्धि अस्मद्ग्रामप्रदेशे (झुन्झुनू–मण्डले) "कुक्कुराणां रोदनम्" इत्युच्यते। न्यासे विहरन्तीति पाठे स्वीकृते मत्तानां शुनाम् अनवस्थितत्वं द्योतितं भवति, इत्येवं तेन पाठान्तरेणापि स एव भावो व्यज्यते।

वाचस्पत्येऽपि "कुक्कुरमादकरात्रौ श्वनिशम्"[1] इत्युच्यते। शब्दकल्पद्रुमकोशे चापि मत्तकुक्कुरनिशा श्वनिशेति निर्दिश्य एतदर्थप्रतिपादनपरं जटाधरस्येदं पद्यं प्रस्तूयते—

"यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा[2]" इति। अयमेवार्थः खल्वत्र युक्ततरः प्रतिभाति।

जैनेन्द्रव्याकरण–महावृत्तौ चौरनिश चौरनिशा इत्यतिरिक्तमिहोदाह्रियते[3]। नारायणभट्टश्च प्रक्रियासर्वस्वे शरन्निशं शरनिशा इत्युदाहरति[4]। तथैव पौषनिशं पौषनिशा, माघनिशं माघनिशा, हेमन्तनिशं हेमन्तनिशा, पूर्णचन्द्रनिशं, पूर्णचन्द्रनिशा इत्याद्याः प्रयोगा उन्नयाः।

□ □

1. वाचस्पत्यम्, षष्ठभागः, पृ० 5158.
2. श० कल्प०, पञ्चमभागः पृ० 176,
3. जैने० महा० 1. 4. 101,
4. प्र० सर्व० चतुर्थभागः, समासखण्डः पृ० 37,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुर्थोऽध्यायः

काशिकावृत्ति-तृतीयाध्यायगत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च

सूत्रम्—कर्त्तुः क्यङ् सलोपश्च। (3-1-11)

अत्र वार्त्तिकम्—

"ओजोऽप्सरसोर्नित्यं पयसस्तु विभाषया"।[1]

"ओजायमानं यो अहिं जघान"[2] इत्युदाहरणमिह प्रस्तूयते[2]।

अस्यार्थोऽत्र मीमांस्यते—

ओजो बलमित्यर्थः[3]। उपमानादाचारे कर्त्तुः क्यङ् इत्युच्यते। ओज इवाचरति ओजायते, बलमिवाचरति इत्येवमर्थोऽत्र प्रतीयते। परं नैतावद् व्याख्यायमानं युज्यते। ओजश्शब्दो वृत्तिविषये तद्वति वर्त्तते, इति हरदत्तः[4]। ओजस्विनि ओजश्शब्दोऽत्र वर्त्तत इति भावः। तत ओजस्वी इवाचरति ओजायते इत्येव सङ्गतोऽर्थो भवति। वेदे चैतत् प्रयुज्यते—

---

1. काशिका 3. 1. 11,
2. काशिका 3. 1. 11.
3. "उब्जेर्बले बलोपश्च" (उणादि० 4. 191)
   'ओजो दीप्तिप्रकाशयोः, अवष्टम्भे बले च" इति महादेव-वेदान्ति-कृतोणादिवृत्तिः। पृ० 105,
4. पद० 3. 1. 11,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥[1]

ओजायमानम् ओजस्वी इवाचरन्तम् अहिं जघान इत्यर्थः । सायणाचार्यस्तु "ओजायमानं बलमाचरन्तम्" इत्येवार्थमाह[2] । बलिवदाचरन्तम् इत्ययमर्थस्तु व्याख्यायमानोऽत्र युज्यतेतराम् ।

अथास्मिन्नेवार्थे लौकिकाश्चापि प्रयोगा दृश्यन्ते । तद्यथा
: रे—

सिताब्जशुभ्राणि जलानि यस्यां
पयायमानान्यवहन्त वाप्यः ।
भूभृत्सदाचारनिरस्यमानं
कालेयमौजायत नो बलञ्च ॥[3]

कालेयं कलेः पापस्य वा बलं नो औजायत ओजस्विवन्नैवाचरद् इत्यर्थः ।

भट्टिकाव्ये—

ओजायमाना तस्यार्घ्यं प्रणीय जनकात्मजा ।
उवाच दशमूर्धानं सादरा गद्गदं वचः ॥[4]

ओजस्विनी इवाचरन्ती इत्यर्थः । मल्लिनाथस्त्वत्र–"ओजायमाना ओज इवाचरन्ती मूर्त्तम् ओज इव स्थितेत्यर्थः"[5] इत्याह । जयमङ्गलोऽपि-ओजायमाना ओज इवाचरन्ती" इत्येवाह[6] । तदिदम् "ओजश्शब्दो वृत्तिविषये तद्वति वर्त्तते" इत्यनवधाय व्याख्यातमिति प्रतीयते । इह

---

1. ऋग्वेदः 2. 12. 11, अथर्ववेदः 20. 34. 11,
2. द्र०–ऋग्वेदसंहिता–सायणभाष्यम् 2. 12. 11,
3. अर्जुन० 8. 6,
4. भट्टि० 5. 76,
5. भट्टि० (सर्वपथीनव्याख्यायुतम्) 5. 76,
6. भट्टि० (जयमङ्गलोपेतम्) 5. 76,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओजस्विनीवाचरन्ती" इत्यपि व्याख्यातुं सुशकम्। एवं व्याख्याने सति वाक्यसङ्गतिरपि रुचिरतरा प्रतीयते।

द्व्याश्रयकाव्ये—

यस्य वाचः पयायन्ते लावण्यं च पयस्यते।
चैद्येऽप्सरायमाणा त्वं रन्तुमोजायसेऽत्र किम्॥[1]

"अत्र चैद्ये चेदिदेशाधिपेऽप्सरायमाणा त्वं किं रन्तुम् ओजायसे ओजस्विनीवाचरसि रन्तुमुद्यच्छसीत्यर्थः"–इतीयमत्राभयतिलकगणिप्रणीता टीका[2]"।

सुभद्राहरणे—

पयस्यमानया वाचा पयायितमृदुस्मितः।
जनमोजायमानोऽपि धर्मराजोऽसभाजयत्॥[3]

कौमुदीकथाकल्लोलिन्याम्—

"अतर्कितघटनासंघटनपटीयान् किन्तु विधिर्हि बलीयान्। अस्यैव

---

1. द्व्या० 7. 100,
2. द्व्या० 7. 100,
3. सुभद्रा० 2. 10,

अत्र काव्यकारो ब्रह्मदत्तसूनुर्नारायणकविः स्वोपज्ञव्याख्यायाम् ओजायमान इत्यादेरर्थमित्थं प्रतिपादयति—"धर्मराजः प्रकृत्या मधुरत्वाद् अनोजस्वी भूत्वा दण्ड्येष्वोजस्वीयन्नपि प्रतापं प्रकाशयन्नपि जनं सर्वलोकम् असभाजयत् अप्रीणयत्"। ततश्च प्रत्ययविधानमाह –"ओजश्शब्दाद् "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" इति क्यङ्। पयश्शब्दाद्—अप्सरश्शब्दात् (च) उपमानादाचारे इति क्यङ् इति"। तदिदं-प्रक्रिया दृष्ट्या विचारणीयम्, भाष्य–काशिकादिषु सर्वत्र "ओजोऽप्सरसोः नित्यम्" इति वार्त्तिकस्य "कर्त्तुः क्यङ् सलोपश्च" (अष्टा० 3. 1. 11) इत्यत्रैव सन्निवेशात्। ओजश्शब्दोऽत्र तद्वति वर्त्तत इत्यनवधार्य ग्रन्थकारेण ओज इवाचरति इत्येवमर्थस्यासङ्गतता मत्वेदमन्यथा कल्पितम् इति। एतत्खलु भाष्यकारादि व्याख्यानाद् भिद्यते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बलेन क्लीबमानोऽपि ओजायते[1]" । ओजस्वी इवाचरतीति एतट्टिप्पण्यामर्थो निर्दिष्टः[2] ।

इहोपन्यस्तेषूद्धरणेषु "ओजायते" इत्यादीनाम् ओजस्वीवाचरति" इत्याद्यर्थोऽस्ति । अत्र ओजशब्दो वृत्तिविषये तद्वति वर्त्तत इति वचन-प्रामाण्यात् । हरदत्तोक्तं चेदं माधवीयधातुवृत्ति[3]-शब्दकौस्तुभ[4]-सिद्धान्त-कौमुदी[5]-व्याकरणदीपिका[6]-व्याकरणसिद्धान्तसुधानिधि[7]-प्रभृतिषु ग्रन्थेषु गृह्यते ।

कर्त्तुः क्यङ्० इत्यत्रैवापरं वार्त्तिकम्—

"आचारेऽवगल्भक्लीबहोडेभ्यः क्विब् वा वक्तव्यः।"[8]

अवगल्भते, अवगल्भायते । क्लीबते, क्लीबायते । होडते, होडायते, इत्यादीन्युहरणानि[9] । "गल्भ धार्ष्ट्ये"[10] "क्लीबृ अधार्ष्ट्ये[11] "होडृ अनादरे"[12] इति भ्वादौ पठ्यन्ते । एते पचाद्यजन्ता अत्र गृह्यन्त इति हरदत्तः[13] । "गल्भ" इति धार्ष्ट्ये पठ्यते, अवपूर्वश्चायम् अधार्ष्ट्ये

---

1. को० कथा०, पश्चार्धभागः, सप्तमः कल्लोलः, पृ० 258,
2. " " " "
3. मा० धातु०, नामप्रत्ययधातुप्रक्रिया, "कर्त्तुः क्यङ्" इति सूत्रव्याख्याने, पृ० 592,
4. श० कौ० 3. 1. 11,
5. सि० कौ०, नामधातुप्रक्रिया, पृ० 249,
6. व्या० दी० 3. 1. 11,
7. व्या० सि० सु० 3. 1. 11,
8. काशिका 3. 1. 11,
9. काशिका 3. 1. 11.
10. मा० धातु०, भ्वादिः 269,
11. मा० धातु०, भ्वादिः 260,
12. मा० धातु०, भ्वादिः 187,
13. पद० 3. 1. 11,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्त्तते[1]। तथा च न्यासकार आह–"अवगल्भ अधाष्ट्र्ये" इति[2]। आख्यात चन्द्रिकायां भट्टमल्लोऽप्याह—

"क्लीबायते क्लीबते च क्लैब्ये स्युरवगल्भते[3]"। इति। अवगल्भः = अधाष्ट्र्यवान् क्लीब इति यावत्। अवगल्भ इवाचरति–अवगल्भते, अवगल्भायते, इति। क्लीव इवाचरति—क्लीबते, क्लीबायते। क्लीबोऽधृष्टः परिभवयोग्य इति भावः।

होडृ अनादरे, पचाद्यचि होड इति। धातुपाठे निर्दिष्टार्थानुरोधाद् होड अनादरकारक अवहेलक इति गम्यते। भट्टमल्लश्चाप्येतदेव समर्थयति[4]। होड इवाचरति–होडते, होडायते इति।

महाभाष्ये खल्विह विक्लीबते, विक्लीबायते। विहोडते विहोडायते, इति पठ्यते[5]। अत्रोपसर्गो धात्वर्थमेवाचष्टे, इति नैवार्थभेदो भवति।

अथ प्रयोगाः। भोजराजस्य शृंगार-प्रकाशे—

होडसे नाभिजातेषु क्लीबसे नाभिमानिषु।
विदग्धसि न मुग्धेषु नाप्रगल्भेषु गल्भसे ॥[6]

---

1. अवपूर्वोऽयं विपरीतार्थको भवति। तद्यथा "मान" इति पूजायां पठ्यते (मा० धातु० चुरादि० 234) अवपूर्वश्च विपरीतार्थको भवति—अवमानयतीति। एवमयमप्यत्र विपरीतार्थो वर्त्तते।
2. न्यासः 3. 1. 11,
   स्वामिद्वारिकादासकालिकाप्रसादशुक्लाभ्यां सम्पाद्य काशिकापदमञ्जरीभ्यां सह मुद्रिते न्यासे (द्वितीयभागे, 263 तमे पृष्ठे) "अवगल्भ आधृष्टे" इति पाठोऽस्ति; अपपाठः खल्वयम् "अवगल्भ अधाष्ट्र्ये" इत्येवं पाठेनात्र भाव्यम्।
3. आख्या० 2. 3. 21;
4. होडते हिण्डते रौडत्येते शेटति सेटति।
   करोत्यर्थस्तिराभ्यां चात्मनेऽत्रगणयत्यपि।
   आख्या० 1. 3. 10;
5. म० भा० 3. 1. 11,
6. शृंगार०, प्रथम भागः, पृ० 5,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अभिजातेषु न होडसे होड इव अवहेलक इव नाचरसि अपितु तान् सम्मानयस्येव। अभिमानिषुनक्लीबसे क्लीब इव निष्पौरुष इव नाचरसि इति।

द्व्याश्रयकाव्ये—

ऐन्द्र्यामिन्द्रति यः शास्त्रे गल्भते न तु होडते।
अक्लीबमोनेऽवन्तीशे किमत्र त्वं शचीयसि ।।[1]

होडते, अक्लीबमाने–इत्येतावत्र लक्ष्यभूतौ प्रयोगौ। "न तु होडते" इत्यस्यार्थं वर्णयन् टीकाकृदभयतिलकगणी प्राह–"न पुनर्होडते होडो मूर्खस्तद्वदाचरति"[2] इति। हैम-प्रकाशमहाव्याकरणेऽपि "क्रियारत्न-समुच्चयस्य प्रमाणेन" होडो मूर्ख इत्युक्तम्[3]।

□ □

---

1. द्व्या० 7 . 99, पृ० 563,
2, ,, ,, ,,
3. हैम० म० द्वितीयभागः 802 तमे पृष्ठे–होडो मूर्ख इति क्रियारत्नसमुच्चयः। "होड़ अनादरे" इति धात्वर्थानुरोधाद् अन्वर्थं मूर्खस्य सञ्ज्ञा कृता इति प्रतीयते। मूर्खो हि प्रायेण सर्वमपि जनं होडतेऽवमयन्ते अतो होड उक्तः। नराः पण्डितबुद्धयस्तु न किञ्चिदवमन्यन्ते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे (3-1-17)

अत्र वार्त्तिकम्—

सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् ।[1]

वार्त्तिकमिदं "सुदिनदुर्दिनाभ्यां", "नीहाराच्च" इति द्विधा विभक्तं भाष्ये पठ्यते[2] । एभ्यः करणे क्यङ् । सुदिनायते, दुर्दिनायते, नीहारायते इत्यादीन्युदाहरणानि । अथैतेषामुदाहरणानामर्थो विमृश्यते । वृत्तिकारेण वृत्तेर्व्याख्यातृभ्यां वा हरदत्त-जिनेन्द्रबुद्धिभ्यां नात्र कश्चिदर्थो निर्दिश्यते । अथ दुर्दिनम् इति मेघाच्छन्नतयान्धकारितं दिनमुच्यते[3] । तदपेक्षया निरभ्रगगनं दिनं सुदिनम् इत्यापद्यते । सुदिनं करोति सुदिनायते, दुर्दिनं करोति दुर्दिनायत इति ।

अथेदं निरुच्यते-"दुर् निन्दितं दिनं"[4] दुर्दिनम् । अत्र हि दुर् इत्यनेन दिनस्य दिनत्वं निन्द्यते = कुत्स्यते । दिनं हि नाम प्रकाशवत्त्वम्, यच्च दिनं मेघाच्छन्नतयान्धकारित भवति तद् दुर्दिनम् उच्यते । तदपेक्षया निर्मेघनभस्कम् अत एवानिरुद्धप्रकाशप्रसरं दिनं सुदिनम् इति गम्यते ।

---

1. काशिका 3. 1. 17,
2. म० भा० 3. 1. 17,
3. "मेघाच्छन्नेऽह्नि दुर्दिनम्" अमर० 1. 3. 12,
4. अमर० रामाश्रमी टीका, 1. 3. 12, पृ० 42,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुर्दिनम् इति मेघाच्छन्नेऽह्नि प्रसिद्धम्, तदपेक्षया मेघरहितं दिनं सुदिनमित्येतत् स्फुटमर्थापन्न भवति ।

ननु मेघरहितं दिनं सुदिनम् इति कोशग्रन्थे नोपलभ्यते, तेन शोभनं शुभं सुखकरं वा दिनं सुदिनम् इत्यपि शक्यं व्याख्यातुम्, अस्त्येतत्, तथापि दुर्दिनशब्द-साहचर्यात् तदपेक्षया सुदिनत्वमत्र ग्राह्यं भवति,तच्चैवञ्जातीयकमेव यन्मेघरहितं दिनमिति । अथ च नीहार-शब्दस्य साहचर्यमनयोरेनमर्थं भूयोऽपि द्रढयति । तथा च वर्धमानसूरिः प्रयुङ्क्ते गणरत्नमहोदधौ—

सुदिनायते शरत्, दुर्दिनायते प्रावृट् ।[1]

तथा —"नीहारायते हेमन्तः" इति प्रयोगो भवति । नीहारं करोति जनयतीत्यर्थः । नीहारः "कुहरा" "धुन्ध" इति लोके प्रसिद्धः । नीहारेणावृते नभसि दृष्टी रुद्धप्रसरा भवति ।

अथ केचन शुभं पुण्यं सुखकरमाह्लादक वा दिनं सुदिनम् तद्विपरीतं च दुर्दिनम् इति मत्वा सुदिनं करोति सुदिनायते, दुर्दिनायते इति प्रयुञ्जते । तद्यथा—

लुम्पन्नदष्टजामातृसम्पदां शुचमद्य नः ।
त्वदागमनजन्मायमानन्दः सुदिनायते ।।[2]

इत्यनर्घराघवे मुरारिः ।

अथ "शब्दवैरकलहाभ्र०" इत्यत्रापरं वार्त्तिकम्—

"अटाट्टाशीका-कोटा-पोटा-सोटा-प्रुष्टा-प्लुष्टाग्रहणं कर्त्तव्यम्" ।[3]

---

1. गण० म० अध्याय: 8, श्लोक 6,
2. अनर्घ० 3. 10,
3. काशिका 3. 1. 17,
अस्य वार्त्तिकस्य पाठोऽयम् उस्मानियाविश्वविद्यालय-संस्कृत-परिषत्प्रकाशितकाशिकातो गृहीतः । अन्येषु संस्करणेष्वत्र पाठो बहुधा विपर्यस्तो दृश्यते । अयं भाष्यानुसारी पाठ इत्यत्र गृह्यते ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेभ्योऽपि करणेऽर्थे क्यङ् विधीयते। अटायते, अट्टायते, शीकायते, कोटायते, पोटायते, सोटायते, प्रुष्टायते, प्लुष्टायते इत्यादीन्युदाहरणानि[1]। वृत्तौ न्यासपदमञ्जर्यादिषु चैतेषामुदाहरणानामर्थो न निर्दिष्टः। अथैषाम् अर्थ-मीमांसात्र क्रियते—

अटायते—

"अट गतौ" भ्वादिः[2]। अटतीति अटा। पचद्याच्[3] ततष्टाप्[4]। अटां करोति अटायते, इत्येवम् अयमर्थो धातुवृत्तिकारेण[5] महाभाष्य-सिद्धान्त–रत्नप्रकाशकारेण शिवरामेन्द्राचार्येण[6] च प्रदर्शितः।

अट्टायते—

"अट्ट अतिक्रमणहिंसयोः" भ्वादिः[7]। अट्टनम् अट्टा। "गुरोश्च हलः[8]" इत्यप्रत्ययः। ततष्टाप्। अट्टां करोति अट्टायते इति धातुवृत्तौ[9] महाभाष्यसिद्धान्तरत्नप्रकाशे[10] च। अतिक्रमण हिंसां वा करोतीत्यर्थः। प्रयोगेषु खलु प्रकरणानुरोधात् अतिक्रमणार्थो हिंसार्थो वा व्याख्येयः।

शीकायते—

शीकृ सेचने भ्वादिः[11]। "गुरोश्च हलः[12]" इत्यकारः। ततष्टापि शीका, सेचनम् इत्यर्थः। "शीकां करोति शीकायते"[13] इति धातुवृत्तिकारो

---

1. काशिका 3. 1. 17,
2. मा० धातु०, भ्वादि: 196,
3. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। अष्टा० 3. 1. 134,
4. अजाद्यतष्टाप्। अष्टा० 4. 1. 4.
5. मा० धातु०, भ्वादि: 196. पृ० 108
6. म० भा० प्र० व्या०, चतुर्थखण्डः, (रत्नप्रकाशः) 3. 1. 17, पृ० 72,
7. मा० धातु०, भ्वादि: 159,
8. अष्टा० 3. 3. 103,
9. मा० धातु० भ्वादि: 158,
10. म० भा० प्र० व्या,० चतुर्थ खण्डः (रत्नप्रकाशः) 3. 1. 17, पृ० 72;
11. मा० धातु०, भ्वादि: 64, पृ० 76;
12. अष्टा० 3. 3. 103,
13. मा० धातु०, भ्वादि: 64, पृ० 76;

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रत्नप्रकाशकृच्च[1]। वर्धमानसूरिणा तु शीकायते इत्यस्य शीत्कारं करोतीत्यर्थो निर्दिष्टः[2]।

कोटायते—

"कुट कौटिल्ये"[3] पचाद्यचि टाप् इति शिवरामेन्द्राचार्यः[4]। कुटतीति कोटा, कोटां करोति कोटायते इति शिवरामेन्द्राभिमतोऽर्थः। धातुवृत्तौ तु कोटायते इति रूपं न प्रदर्शितम्। दीक्षिताचार्यस्तु शब्दकौस्तुभे इत्थमेतद् व्याख्याति—"कुट कौटिल्ये" तुदादिः, हेतुमण्णिच्। "कुट[5] छेदने" आकुस्मीयः। कोटयति कोटयते वा कोटा, तां करोति कोटायते[6] इति।

पोटायते—

"पुट संश्लेषणे"[7], पचाद्यचि टाप् इति शिवरामेन्द्रः[8]। पुटति संश्लिष्यतीति पोटा, पोटां करोति पोटायते इति शिवरामेन्द्राभिमतोऽर्थः। कमर्थविशेषमुद्दिश्य कथमस्य वाक्ये प्रयोग एतत्तु नैतावता स्फुटं भवति। धातुवृत्तिकारस्त्वत्राह–"पोटा स्त्रीपुंसलक्षणा स्त्री। अतोऽन्ये अटाट्टादयः क्रियावचनाः[9]" इति। एतदेव हि भट्टोजिदीक्षितेन शब्दकौस्तुभे[10] नागेश-भट्टेन च बृहच्छब्देन्दुशेखरे[11] स्वीक्रियते। एवं तन्मतेन पोटां (स्त्री

---

1. म० मा० प्र० व्या० चतुर्थखण्डः (रत्नप्रकाशः) 3. 1. 17, पृ० 72;
2. गण० म०, अष्टम आख्यातगणाध्याय, श्लो० 441, पृ० 245,
3. मा० धातु०. तुदादिः 72. पृ० 475,
4. " " " "
5. धा० पा०, चुरादिः 167, (166 त्रुट छेदने, 167 कुट इत्येके) एवमयं तत्र पठ्यते।
6. श० कौ० 3. 1. 17,
7. मा० धातु० तुदादिः 76, पृ० 476.
8. म० मा० प्र० व्या०, खण्डः 4 [रत्नप्रकाशः] 3. 1. 17, पृ० 72;
9. मा० धातु०, नामधातुप्रत्ययप्रकरणम्–शब्दवैर० इति सूत्रव्याख्याने। पृ० 597,
10 श० कौ० 3. 1. 17.
11. बृहच्छब्देन्दु०, तृतीयभागः, पृ० 1894,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुंसलक्षणां स्त्रियं) करोतीत्यर्थेन भाव्यम्। करणार्थोऽत्र किमात्मक इति तु न स्फुटम्। शिवरामेन्द्रस्तु एतत् प्रत्याचक्षाण आह–"तत्र क्रियाशब्द-साहचर्येण पोटा-शब्दोऽपि क्रियाशब्द एव गृह्यते, न तु स्त्रीपुंसलक्षण-वाचकः। तेन तद्विपरीतं वदन्तो निरस्ताः"[1] इति। तदिदं युक्तं प्रतिभाति शिवरामेन्द्राचार्यस्य कथनम्। परम् एवं मतेऽपि "पोटायते" इत्यस्य कमर्थविशेषमुद्दिश्य कथं वाक्ये प्रयोग इति तु न स्फुटतां गच्छति। न चैतत् प्रदर्शितं शिवरामेन्द्रेणापि। तदेतद् भूयोऽप्यन्वेष्टव्यमस्ति।

सोटायते –

वार्त्तिके सोटा इति पाठोऽस्ति। "सुट" अथवा "षुट" इत्येवंरूपः-कश्चिद् धातुः पाणिनीये धातुपाठे माधवीयधातुवृत्तौ वा न पठ्यते। शिवरामेन्द्रस्त्वत्र व्याख्याक्रमेण "कुट कौटिल्ये, पुट संश्लेषणे, मुट मर्दने तेभ्यः पचाद्यच्"[2] इति पठति। एतेन ज्ञायते यदत्र तेन "कोटा पोटा मोटा" इत्येवं पाठो दृष्टः, स एव च व्याख्यात इति। अत्र भाष्यस्य मूलपाठो-ऽप्ययमेवासीद् इति गम्यते। शिवरामेन्द्रस्यैतद् व्याख्यानं दृष्ट्वा "महाभाष्य-प्रदीप-व्याख्यानानि" इत्यस्य ग्रन्थस्य सम्पादकोऽप्येतदेव सम्भावयति[3]। भट्टोजिदीक्षितेनापि सुट-धातुमलब्ध्वा "सोटा" इत्यस्य स्थाने मोटा इति पाठः स्याद् इति सङ्केतितं शब्दकौस्तुभे[4]। मुट प्रमर्दने इति भ्वादौ पठ्यते[5], ततः पचाद्यचि टाप् इति शिवरामेन्द्रः[6]। मोटतीति मोटा, मोटां करोति मोटायते इति।

---

1. म० भा० प्र० व्या० खण्ड 4, (रत्नप्रकाशः) 3. 1. 17 पृ० 72;
2. " " " " " "
3. सम्पादकः एम० एस० नरसिंहाचार्यस्तत्र पादटिप्पणीमेवं करोति—"एतेन मोटा इति भाष्यपाठोऽत्राभिमत इति ज्ञायते। सोटा इति भाष्ये उपलभ्यते, सुट इति षुट इति वा धातुर्नोपलभ्यते।" म० भा० प्र० व्या०, खण्डः 4 (रत्नप्रकाशः) 3. 1. 17;
4. द्र०–श० कौ० 3. 1. 17,
5. मा० धातु०, भ्वादिः 218, पृ० 113,
6. म० भा० प्र० व्या०, खण्डः 4, (रत्नप्रकाशः] 3. 1. 17 पृ० 72;

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रुष्टायते, प्लुष्टायते—

"प्रुषु प्लुषु दाहे" इति भ्वादौ पठ्येते[1]। ताभ्यां कर्मणि क्तः, टाप् इति शिवरामेन्द्रः[2]। प्रुष्टा प्लुष्टा इति। प्रुष्टां करोति प्रुष्टायते, प्लुष्टां करोति प्लुष्टायते। दाहं करोतीत्यर्थः। अनयोः प्रयोगस्त्वनुऽसन्धेयः इति।

□ □

1. मा० धातु०, भ्वादिः 452, पृ० 176.
2. म० भा० प्र० व्या०, खण्डः 4, [रत्नप्रकाशः] 3. 1. 17, पृ० 72;

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—पुच्छभाण्डचीवराण्णिङ् । (3-1-20)

करणे इति वर्त्तते । पुच्छ भाण्ड चीवर इत्येतेभ्यो णिङ् प्रत्ययो भवति करणविशेषे इति वृत्तिः[1] । कथम्भूते करण इत्यत्राह—

पुच्छादुदसने पर्यसने वा,
भाण्डात् समाचयने,
चीवरादर्जने परिधाने वा[2] । इति ।

उत्पुच्छयते, परिपुच्छयते । सम्भाण्डयते । सञ्चीवरयते भिक्षुः । इत्युदाहरणानि[3] ।

उत्पुच्छयते, परिपुच्छयते—

पुच्छादुदसने पर्यसने चेत्युच्यते । उदसनम्, उत्क्षेपणम् ऊर्ध्वं क्षेप इत्यर्थः । पुच्छमुदस्यति उत्पुच्छयते गौः । पुच्छमूर्ध्वं क्षिपतीत्यर्थः । पर्यसनं परितः क्षेपणम् । पुच्छं पर्यस्यति परिपुच्छयते गौः । पुच्छं परितः क्षिपतीत्यर्थः । महाभाष्येऽत्र "व्यसने" इत्यधिकं पठ्यते—

"पुच्छादुदसने व्यसने पर्यसने चेति" ।[4]

---

1. काशिका 3. 1. 20,
2. काशिका 3. 1. 20,
3. काशिका 3. 1. 20,
4. महाभाष्ये "नमोवरिवश्चित्रङः क्यच्" (3. 1. 19) इत्यस्य तृतीय-वार्त्तिकव्याख्याने ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शब्दकौस्तुभे व्याकरणसिद्धान्तसुधानिधौ व्याकरण-दीपिकायां चैतद् भाष्योक्तमविकलं गृह्यते। तत्र हि "व्यसनम्" इत्यस्य "विविधं विरुद्धं वा उत्क्षेपणम्" इत्यर्थो निर्दिश्यते, "विपुच्छयते" इत्युदाहरण च प्रस्तूयते[1]। पुच्छं व्यस्यति विपुच्छयते। विविधं विरुद्धं वा क्षिपतीत्यर्थः। यदा तु वैविध्येन ऊर्ध्वमधस्तिर्यग् इति कृत्स्ना पुच्छस्य क्षेपणं तदा "विविधम्" इति युज्यते। यदा च ऊर्ध्वम् अधो वामतो दक्षतश्चेति परस्परविपरीतदिश पुच्छ क्षिपति तदा "विरुद्धम्" इति युज्यते, इत्येष व्याख्यातॄणां भावोऽत्र लक्ष्यते। शिवरामेन्द्राचार्यस्तु "विविधं "क्षेपो व्यसनम्[2] इत्येवार्थापयति। उदाहरणं तु "विपुच्छयते" इत्येव।

अथैतेषाम् उदाहरणानां क्रमेण प्रयोगाः प्रस्तूयन्ते। उदसने "उत्पुच्छयते"। अर्जुनरावणीये—

उद्धूतबालव्यजनाग्रभाजा प्रातर्ध्वजिन्येव महीपतीनाम्।
गवां समित्या परिनिष्पतन्त्या रेजे सदोत्पुच्छयमानया या॥[3]

अनर्घराघवे—

दग्धाः प्रदीप्तपावकपरिचयपिण्डस्थहेमवेश्मानः।
क्षणमुत्पुच्छयमाने हनुमति लङ्कापुरोद्देशाः॥[4]

द्व्याश्रयकाव्ये—

साऽथ हस्तयमानास्य कण्ठे चिक्षेप च स्रजम्।
अश्वैरुत्पुच्छयमानैर्ययौ कुप्यच्च राजकम्॥[5]

---

1. श० कौ० 3. 1. 20,
   व्या० सि० सु० 3. 1. 20,
   व्या० दी० 3. 1. 20,
2. म० भा० प्र० व्या०, षष्ठखण्डः, (रत्नप्रकाशः) 3. 1. 19. पृ० 75.
3. अर्जुन० 8. 17,
4. अनर्घ० 6. 1,
5. द्व्या० 7. 108, पृ० 568,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्यच्च–

"हर्षोत्पुच्छयमानकर्णकरवोत्कर्णं व्रजायोत्सुकाः"।[1]

भाषावृत्तौ चात्र "उत्पुच्छयते व्याघ्रः" इत्युदाहृतम्।[2]

व्यसने–"विपुच्छयते" । द्व्याश्रयकाव्ये–

"द्राग् विपुच्छयमानोक्षरथैरागाच्च बन्धुता"।[3]

"विपुच्छयमानाः पुच्छान् विविधं विशिष्टं वाऽस्यन्त उक्षाणो येषु ते तथा ये रथास्तैश्च" इतीयमत्र अभयतिलकगणिकृता व्याख्या।[4]

पर्यसने, परिपुच्छयते–

दशमुखशरपीडितापयानोद्यमपरिपुच्छयमानवानराणि।
सरभसमभिसान्त्वयन् बलानि द्विषमभियोधयति प्लवङ्गराजः॥[5]

सुभद्राहरणे–

परिपुच्छयमानेन सह वत्सेन गौरियम्।
तृणान्यत्तु नृपोत्सृष्टा सन्तुष्टाः पूजया वयम्॥[6]

"परिपुच्छयमानेन पुच्छं, लाङ्गूलं पर्यस्यता" इति काव्यकारस्यात्र स्वोपज्ञा टीका।[7]

सम्भाण्डयते–

"भाण्डात् समाचयने" इत्युच्यते। समाचयनं राशीकरणम्। भाण्डं पात्रम्। तथा चामरः–

---

1. क्वाचित्कम् इदं पद्यं विश्वेश्वर-सूरिणा "पुच्छभाण्ड॰ (3.1.20) इति सूत्रव्याख्याने व्याकरणसिद्धान्तसुधानिधौ समुद्धृतम्।
2. भाषा॰ 3.1.20,
3. द्व्या॰ 7. 109, पृ॰ 568,
4. " "
5. अनर्घ॰ 6.39,
6. सुभद्रा॰ 2.28, पृ0 47,
7. " "

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्"[1] इति।

सम्भाण्डयते भाण्डानि समाचिनोति एकत्र सङ्गृह्णातीत्यर्थः।

तथा च प्रयोगाः, अर्जुनरावणीये–

"वेलां पयोधेरिव कीटमुक्तप्रवालशङ्खामलहेमपुञ्जाम्।[2]
प्रविश्य वीथिं वणिजां समूहाः सम्भाण्डयन्ते स्म चिराय यस्याम्॥

भट्टिकाव्ये–

कमण्डलुकपालेन शिरसा च मृजावता।
संवस्त्र्य लाक्षिके वस्त्रे मात्राः सम्भाण्ड्य दण्डवान्॥[3]

"मात्राः कमण्डल्वादिकं सम्भाण्ड्य समाचित्य, राशिकृत्येत्यर्थः" इति जयमङ्गलः।[4]

सुभद्राहरणे–

सुसिक्तसम्मृष्ट–तलप्रकीर्णप्रभूतनानाकुसुमोत्करेषु।
उषस्युषस्यावसथेषु दास्यो यया नियुक्ताः समभाण्डयन्त॥[5]

"यया (द्रौपद्या) नियुक्ता दास्यः प्रातः प्रातरावसथेषु समभाण्डयन्त भाण्डानि पात्राणि घटादीनि प्रक्षालितानि गृहकोणेषु समाचिन्वन्"[6] इति काव्यकारस्यात्र स्वोपज्ञा व्याख्या।

द्व्याश्रयकाव्ये–

सम्भाण्डयन्तः सञ्जीवरयमाणा मखाय ये।
ते मन्त्रयन्तो ब्रह्माणस्तयोः पाणी अमिश्रयन्॥[7]

---

1. अमर० 2.9.33,
2. अर्जुन० 8.16,
3. भट्टि० 5.62,
4. भट्टि० (जयमङ्गलोपेतम्) 5.62,
5. सुभद्रा० 1.33, पृ० 16,
6. " "
7. द्व्या० 7.110, पृ० 569,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"ये यागेषु सदोद्यतत्वान्मखाय यागार्थं सम्भाण्डयन्ते भाण्डानि यागोपकारकाणि समाचिन्वन्ति"[1] इतीयमत्र अभयतिलकगणिकृता व्याख्या। भाषावृत्तिकारःपुरुषोत्तमदेवश्चात्र "सम्भाण्डयते कुलालः"[2] इत्युदाहरति। कुलालः सम्भाण्डयते घटादीनि पात्राणि सञ्चिनोति, एकत्र सङ्गृह्णातीत्यर्थः।

अथ "भाण्डम्" इत्ययं शब्दो भूषणादिष्वन्येष्वपि बहुष्वर्थेषु वर्तते। तद्यथा हेमचन्द्राचार्य आह—

भाण्डं मूलवणिग्वित्ते तुरङ्गाणां च मण्डने।
नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च॥[3] इति।

अत्र तु पात्रम् इत्येवार्थो गृह्यते, न तु सर्वे इमेऽर्थाः। पात्राणां समाचयनेऽर्थे भाण्डशब्दाण्णिङ् प्रत्ययो भवतीति भावः। एतच्च पूर्वं प्रदर्शितैः प्रयोगैरपि गम्यते। धातुकाव्यस्य कर्त्ता कविस्तु भाण्डं वस्तुजातम् इति मत्वा तत्समाचयन एतत् प्रयुङ्क्ते—

"खला विपुत्कुक्कुरवद् भयार्त्ता ययुश्च सम्भाण्डयमानभृत्याः"[4]। इति।

अत्र टीका—"विपुच्छाः कुक्कुरा इव अधःकृत्तपुच्छाः श्वान इव भयार्त्ताः खलाः सम्भाण्डयमानभृत्याः समाचयमाना उद्धार्यवस्तूनि एकीकृत्य बध्नन्तो भृत्या येषां ते तथाभूताः सन्तो ययुः[5]" इति। एवं प्रतीयते यत् काव्यकारेण भाण्डं वस्तुमात्रस्योपलक्षणं मत्वायं प्रयोगः कृत इति। अत्रार्थेऽन्यत् प्रमाणम् मृग्यम्।

---

1. द्व्या० 7.110; पृ० 569;
2. भाषा० 3.1.20,
3. अनेकार्थ० पृ० 12, श्लो० 126, 127,
4. धातुकाव्यम् 3.66, पृ० 231, धातुकाव्यमिदं सटीकं निर्णयसागर प्रकाशितायाः काव्यमालाया दशमगुच्छकान्तर्निविष्टमस्ति। मुद्रितग्रन्थे काव्यकर्त्तुः टीकारस्य वा नामनिर्देशो न दृश्यते। "उदाहृतं पाणिनि-सूत्रमण्डलम्" इत्याद्यस्य प्रथमं पद्यमुद्धृत्य युधिष्ठिरमीमांसकेनास्य कर्त्ता नारायणभट्टः नारायणकविर्वा अस्तीति निर्दिष्टम्। द्र०—संस्कृत व्याकरणशास्त्र का इतिहास द्वितीय भाग, (द्वितीय संस्करण, सन् 1973 ई०) पृ० 442,
5. धातुकाव्यम् 3.66, पृ० 231,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सञ्चीवरयते भिक्षुः –

चीवराद् अर्जने परिधाने वा इत्युच्यते। चीवरं नाम अस्यूतं वस्त्रम्। मुनिजना भिक्षवश्चास्यूतं वासः परिदधते स्म, अस्माद्धेतोश्चीवरं मुनिपरिधानं भिक्षुवस्त्रं वेति प्रसिद्धं बभूव। तथा हि—"चीवरं वस्त्रं मुनिपरिधानं वा" इत्युणादिकोषे स्वामिदयानन्दः[1]। "चीवरं भिक्षुवस्त्रं स्याद्" इत्युणादिवृत्तौ महादेववेदान्ती[2]। चीवरस्य तापसजनपरिधानत्वेन प्रसिद्धेरेव "सञ्चीवरयते भिक्षुः" इति काशिकायाम् उदाह्रियते। भिक्षुश्चीवरं परिदधाति, अर्जयति वा याच्ञादिना इत्यर्थः। प्रकरणेन च खल्वर्जनार्थः परिधानार्थो वा गम्यते।

अथ प्रयोगाः, अर्जुनरावणीये—

पुरा नमस्यत्यमरानजस्रं गुरुद्विजातीन्वरिवस्यति स्म।
भिक्षुञ्च सञ्चीवरणानुषक्तं प्रार्चीज्जनो यत्र समृद्धियुक्तः॥[3]

अत्र किलार्जनेऽथे। चीवराणामर्जनं सञ्चीवरणम्, णिङन्ताद्युच्[4]। तत्रानुषक्तं प्रवृत्तं भिक्षुं जनः प्रार्चीत्, तद्दानेनेनापूजयदित्यर्थः।

अनर्घराघवे—

प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमोवल्लरी-
बल्याभिर्मखधूमवल्लिभिरमी सम्मीलितव्यञ्जनाः।
श्वः सञ्चीवरयिष्यमाणबटुकव्याधूतशुष्यत्त्वचः
निद्राणातिथयस्तपोवनगृहाः कुर्वन्ति नः कौतुकम्॥[5]

---

1. उणादिकोषः 3.1;

वस्त्रेऽर्थे चीवरशब्दस्य प्रयोगो यथा—

"प्रेतचीवरवसास्वनोग्रया" (रघुवंशम् 11-16) इति।

भिक्षुपरिधानेऽर्थे च भूयान् प्रयोगश्चीवरशब्दस्य संस्कृत–साहित्ये यत्र तत्र लभ्यते।

2. महादेववेदान्तिकृतोणादिवृत्तिः 3.1,
3. अर्जुन० 8.15,
4. अष्टा० 3.3. 107,
5. अनर्घ० 2.68,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र परिधानार्थे णिङ्। सञ्चीवयिष्यमाणाः परिधास्यमाना इत्यर्थः।

द्व्याश्रयकाव्ये–

सम्भाण्डयन्तः सञ्चीवरयमाणा मखाय ये।
ते मन्त्रयन्तो ब्रह्माणस्तयोः पाणी अमिश्रयन्॥[1]

"सञ्चीवरयमाणाश्चीवरं समाच्छादयन्तो यजमानेभ्यो भिक्षयाऽर्जयन्तो वा" इतीयमत्र अभयतिलकगणिव्याख्या[2]।

धातुकाव्ये–

खला विपुत्कुक्कुरवद् भयार्त्ता ययुश्च सम्भाडयमानभृत्याः।
भयेन सञ्चीवरिताः स्थिता ये ते तु प्रविष्टा नगरं प्रहृष्टाः॥[3]

अत्र टीका–"ये सज्जना भयेन सञ्चीवरिताश्चीवरमर्जितवन्तः परिहितवन्तो वा। पूर्वं स्थितास्ते तु प्रहृष्टा नगरं मधुरापुरं प्रविष्टाः।..............सञ्चचीवरितेति। "चीवरादर्जने परिधाने वा" इति णिङि कर्त्तरि क्तः"[4] इति।

सुभद्राहरणे–

दस्युध्वान्तार्कमाश्रित्य त्वां सञ्चीवरयामहे।
मुण्डयित्वा शिरः क्षीरं व्रतयन्तो यजामहे।[5]

इह परिधानेऽर्थे प्रयोगः। सञ्चीवरयामहे चीवरं धारयाम इत्यर्थः।

---

1. द्व्या० 7.110, पृ० 569,
2. " "
3. धातुकाव्यम् 3.66, पृ० 231,
4. " "
5. सुभद्रा० 2.29,

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 5144

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कौमुदीकथाकल्लोलिन्याम्-

"तृतीयश्च शिरो मुण्डयित्वा सञ्चीवरयमाणः शूद्रान्नं व्रतयन् देशाद्देशान्तरभ्रमणप्रसङ्गेनैकदैकस्मिन् ग्रामे कस्यचिद् विप्रस्यातिथिर्बभूव"।[1]

इहापि परिधानेऽर्थे प्रयोगः। सञ्चीवरयमाणः मुनिवच्चीवरं परिदधान इत्यर्थः।

सूत्रम्-विपूयविनीयजित्या मुञ्जकल्कहलिषु।(3-1-117)

"विपूय विनीय जित्य इत्येते शब्दा निपात्यन्ते यथासङ्ख्यं मुञ्ज कल्क हलि इत्येतेष्वर्थेषु बोध्येषु" इति वृत्तिः[2]।

विपूयः -

मुञ्जो विपूय इत्युच्यते। स हि रज्ज्वादिकरणाय शोधयितव्यो भवतीति विपूय इत्युक्त इति हरदत्तस्यात्र निर्देशः[3]। अथ मुञ्जार्थे विपूयशब्दस्य प्रयोगाः प्रदर्श्यन्ते-

अर्जुनरावणीये-

स्फुरद्विपूयायतमेखलाङ्गा विमुक्तजित्यादिकृषिप्रपञ्चाः।
रक्षोऽश्वयुग्यद्विपरुद्धतीरां विप्रा नदीं प्रोज्झ्य ययुर्भयेन॥[4]

भट्टिकाव्ये-

वसानां वल्कले शुद्धे विपूयैः कृतमेखलाम्।
क्षामामञ्जनपिण्डाभां दण्डिनीमजिनास्तराम्॥[5]

---

1. कौ० कथा०, पश्चार्धभागः, सप्तमः कल्लोलः, पृ० 259,
2. काशिका 3.1.117,
3. पद० 3.1.117,
4. अर्जुन० 9.29,
5. भट्टि० 6.60,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्राह मल्लिनाथः–"विपूयन्ते इति विपूया मुञ्जाः"[1] इति।

द्व्याश्रयकाव्ये–

"पुत्रे विपूयजन्माभे"[2] इति।

"विपूये मुञ्जे शरवणे जन्म यस्य स विपूयजन्मा स्कन्दः। तेजस्वितादिगुणैस्तत्तुल्येऽस्मिन् पुत्रे" इतीयमत्र अभयतिलकगणिकृता व्याख्या[3]।

सुभद्राहरणे–

विपूयमेखलावन्तः प्रगृह्यादिपदच्छिदः।
तोषयन्तो गुरुन् गृह्या वेदानध्यैयत द्विजाः ॥[4]

कौमुदीकथाकल्लोलिन्याम्–

एतद्वाक्यामाकर्ण्य विरहकातरो नरवाहनदत्तस्तत्क्षणमेव स्तुत्यम् आदृत्यं धृतविपूयमेखलाङ्कैः शिष्यैर्जुष्यं विगतविनीयं च निजपुरोधसं शान्तिसोमं सम्भृतभृत्यैः समाहूय .... वेगवतीं विद्याधरीमुपायमत[5]।

विनीयः –

कल्केऽर्थे विनीय इति निपात्यते। किन्नाम कल्क इत्यात्राह हरदत्तः— "कल्कशब्दोऽयमस्ति पिष्टे[6] औषधे—पथ्याशुण्ठीसैन्धवांशस्य कल्कः पेयो नित्यं सर्वरोगक्षयाय इति, तैले घृते वा औषधे प्रक्षिप्ते यद् ऋजीषं तत्रापि वर्तते, पापे

---

1. भट्टि॰ (सर्वपथीनव्याख्योपेतम्) 6.60, पृ॰ 182,
2. द्व्या॰ द्वितीयभागः, 11.24, पृ॰ 13,
3. " "
4. सुभद्रा॰ 3.15,
5. कौ॰ कथा॰, पश्चार्धभागः, एकादशः कल्लोलः, पृ॰ 300,
6. तथा चेदं कल्कस्य लक्षणं शब्दकल्पद्रुमकोशे कस्माच्चिदायुर्वेदग्रन्थादुद्धृतम्–

द्रव्यमात्रं शिलापिष्टं शुष्कं वा जलमिश्रितम्।
तदेव सूरिभिः पूर्वैः कल्क इत्यभिधीयते॥

श॰ कल्प॰ 2 भागः, पृ॰ 63,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च प्रसिद्धः—तपो न कल्कोऽध्ययनं न कल्कः[1] इत्यादौ"[2]। इत्थं कल्क-शब्दस्यार्थान्निर्दिश्य हरदत्तोऽग्रे कथयति—"इह तु प्रथमस्य ग्रहणम् इति केचित्। अविशेषेण इति वयम्"[3]। स्वमतमुपोद्बलयितुं हरदत्तोऽत्र महाकवेर्माघस्य पद्यं प्रस्तौति यत्र विनीय इति पापार्थे प्रयुक्तः।" तथा च माघः प्रायुङ्क्त—अविनीयसम्भ्रमविकासिभक्तिभिः[4]। हरदत्तेनोद्धृतेऽस्मिन् माघपद्ये अविनीयशब्देन अकल्कोऽकपटः निष्पापतेति भावो द्योत्यते। इत्थं हरदत्तस्य व्याख्यानेनेदं गम्यते यत् कल्कशब्दस्य पूर्वं निर्दिष्टेषु सर्वेष्वर्थेषु अविशेषेण विनीय इति प्रयुज्यते। धातुवृत्तिकारेणाप्येतदेव स्वीक्रियते। तथा हि स "णीञ् प्रापणे" इत्यस्य व्याख्याने प्राह—विनीयः कल्कः। कल्कश्च पक्वान्नतैलादीनामृजीषे पापे च वर्त्तते[5]। बृहच्छब्देन्दुशेखर-कारस्याप्येतादृशमेवाभिमतम्। स हि कल्कशब्दस्य सर्वेष्वर्थेषु विनीयशब्दमविशेषेण निपातितं मन्यते। तथा च शेखरे प्राह—"कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि इति कोशात् तैले घृते वौषधे प्रक्षिप्ते पाकानन्तरं यदृजीषं तच्च। सर्वत्र चेदं निपातनम्"[6] इति।

अथास्य प्रयोगाः प्रदर्श्यन्ते। शिशुपालवधे तावत्—

---

1. महाभारतस्येदं पद्यमुद्धृतं हरदत्तेन। तत्र सम्पूर्णमित्थं पठ्यते—

   तपो न कल्कोऽध्ययनं न कल्कः स्वाभाविको वेदविधिर्न कल्कः।

   प्रसह्य दाराहरणं न कल्कस्तान्येव भावोपहतानि कल्कः॥

   म० भार० 1.1.210, (पूना)

2. पद० 3.1.117,
3. पद० 3.1.117,
4. पद० 3.1.117,
5. मा० धातु०, भ्वादिः – 530, पृ० 237,

   अत्रेदमवधेयं यन्मुद्रितपुस्तके "पापे" इत्यस्य स्थाने "पाके" इति पाठो दृश्यते। मुद्रणदोषः खल्वयम्, मा० धातु०, प्राच्यभारती प्रकाशन कमच्छा वाराणसी, प्रथमसंस्करणम्, 1964 ई०।
6. बृहच्छब्दे0, तृतीयभागः, पृ0 2017,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुदितैस्तदेति दितिजन्मनां रिपावविनीयसम्भ्रमविकासिभक्तिभिः।
उपसेदिवद्भिरुपदेष्टरीव तैर्ववृते विनीतमविनीतशासिभिः ॥[1]

तथा तस्मिन् समये इतीत्थं मुदितैर्हृष्टैरविनीयोऽकल्कः, अकपट इति यावत् (तेन) यः सम्भ्रम आदरस्तेन विकासिनी स्फुटीभवन्ती भक्तिर्येषां तैः। विपूयविनीयजित्या मुञ्जकल्कहलिषु इति कल्कार्थे निपातः"। इतीयमत्र मल्लिनाथस्य सर्वङ्कषा टीका। अनयाऽपि खलु पूर्वनिर्दिष्टं हरदत्तादीनां मतं समर्थ्यते[2]।

द्व्याश्रयकाव्ये–

पुत्रे विपूयजन्माभेऽस्मिन् कुङ्कुमविनीयकैः।
श्रेणिगृह्या पुरीगृह्योत्सवं चक्रे प्रगृह्यवाक् ॥[3]

"पुरीगृह्या नगरबाह्या श्रेणी सजातीयशिल्पिसंघः कुङ्कुमविनीयकैः कुङ्कुमद्रवैरित्यर्थः। उत्सवं सर्वत्र छटादानैर्महं चक्रे" इतीयमत्र अभयतिलकगणि-प्रणीता व्याख्या[4]। उदपेषं पिष्टे पदार्थेऽत्र विनीयकशब्द इति स्फुटम्।

वासुदेवविजये–

प्रणाय्यगृह्योऽतिविनीयधामाप्यप्रेष्ट सत्योद्यतया स कंसः[5]।इह पापार्थे प्रयोग इति स्पष्टम्।

कौमुदीकथाकल्लोलिन्याम्–

"एतद्वाक्यमाकर्ण्य विरहकातरो नरवाहनदत्तस्तत्क्षणमेव स्तुत्यमादृत्यं धृतविपूयमेखलाङ्गैः शिष्यैर्जुष्यं विगतविनीयञ्च निजपुरोधसं शान्तिसोमं समाहूय .... वेगवतीं विद्याधरीमुपायमत।"[6]

इहापि विनीयशब्दः पापार्थे प्रयुक्तः। विगतविनीयं निष्किल्विषम् इत्यर्थः।

---

1. शिशु० 13.24,
2. शिशु० (सर्वङ्कषोपेतम्) 13.24, पृ० 341,
3. द्व्या० द्वितीयभागः, 11.24, पृ० 13,
4. " "
5. वासु० 2.15,
6. कौ० कथा०, पश्चार्धभागः, एकादशः कल्लोलः, पृ० 300,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जित्यः –

जित्य इति निपात्यते हलिश्चेद् भवति। बृहद् हलं हलिरिति न्यासकारः[1]। जित्यो बृहद्धलं स्याद् इति भाषावृत्तिकारः[2]। प्रक्रियाकौमुद्याः प्रसादाख्यायां व्याख्यायां विट्ठलाचार्यः[3] पाणिनीयमिताक्षरायामन्नभट्टश्चैनमेवार्थमुररीकुरुतः[4]। हल विलेखने[5], हलति विलिखति भुवमिति हलिः[6]। बहद्धलस्य खल्वियं संज्ञा लोके प्रसिद्धा। एतदेव चोणादिव्याख्यायां नारायणभट्टः समर्थयति—हलिः महद्धलम्[7] इति। हलिरिति स्त्रीलिङ्गः शब्दः। दृश्यते च क्वचिद् बृहत्वे स्त्रीत्वम्। तद्यथा बृहत् सरः सरसी[8] इति। तथात्र बृहद्धलं हलिरिति। हलिरेव जित्य इति। सा हि बलवता हालिकेन धारणार्हा भवति बलेन वा क्रष्टव्या भवतीत्यतो जित्या इत्युच्यते। हलिरिति स्त्रियाम्, तत्पर्यायो जित्यशब्दोऽपि कैश्चित् स्त्रीलिङ्गविशिष्टो निर्दिश्यते। तथा हि अमर-कोशस्य अमरपदपारिजाताभिधायां व्याख्यायां मल्लिनाथ आह—"जित्या हलिरुभे स्त्रियाम्"[9] इति। हेमचन्द्राचार्योऽप्येतदेव प्रतिपादयति—"जित्या तु हलिः"[10] इति। काशिकायां[11] भाषावृत्तौ[12] प्रक्रियाकौमुद्यां[13] शब्दकौस्तुभे[14] सिद्धान्तकौमुद्यां[15]

---

1. न्यासः 3.1.117,
2. भाषा० 3.1.117,
3. महद्धलं हलिरित्युच्यते।

   प्र० कौ० (प्रसादटीकायुता) उत्तरार्धम्, कृन्दतप्रक्रिया, पृ० 411,
4. महद्धलं हलिः। पा० मिता० 3.1.117,
5. धा० पा०, भ्वादिः 578,
6. सर्वधातुभ्य इन्। उणादिकोषः 4.119,
7. प्र० सर्व० (उणादिखण्डः) द्वितीयभागः, 4.128, पृ० 106,
8. तथा महाभाष्यकार आह—दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते, म० भा० 1.1.19,
9. अमर० (दाक्षिणात्यव्याख्योपेतः) प्रथमभागः, 2.9.13, पृ० 551,
10. अभि० चिन्ता० 3.554, पृ0 222,
11. काशिका 3.1.117,
12. भाषा० 3.1.117,
13. प्र० कौ०, उत्तरार्धम्, कृदन्तप्रक्रिया, पृ० 491,
14. श० कौ०, 3.1.117,
15. सि० कौ०, कृत्यप्रक्रिया, पृ० 273, निर्णय०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बृहच्छब्देन्दुशेखरे[1] अष्टाध्यायीभाष्ये[2] पाणिनीयमिताक्षरायां[3] पाणिनीयाष्टके तत्वप्रकाशिकोपेते[4] तु जित्य इति पुल्लिङ्ग एव प्रयुक्तः।

जित्य इत्यस्य हरदत्तनिर्दिष्टमर्थान्तरम्, तत्समीक्षा च

पदमञ्जर्यां जित्यशब्दस्यार्थ एवमुच्यते—"जित्य इति। बलेनाक्रष्टव्यः। कृष्टसमीकरणार्थं स्थूलं काष्ठं हलिरित्युच्यते[5]" एतेन स्पष्टं यद् हलेन कृष्टस्य क्षेत्रस्य समीकरणार्थं यत् स्थूलं काष्ठं "सुहागा" वा इति हिन्दीभाषिप्रदेशे प्रसिद्धं तदेव हरदत्तस्य मतेन हलिर्जित्य इति च। न तु बृहद्धलं हलिर्जित्य इति।

भट्टोजिदीक्षितस्तु द्वावप्येतावर्थावभेदेन प्रतिपद्यते। तथा हि शब्दकौस्तुभे प्राह—"जित्यो हलिः। बलेन क्रष्टव्य इत्यर्थः। महद्धल हलिः। कृष्टसमीकरणार्थं स्थूलकाष्ठमुच्यते"[6]। एतदेव च सिद्धान्तकौमुद्यां वर्णयति[7]। भट्टनागेशो बृहच्छब्देन्दुशेखरे[8] विश्वेश्वरसूरिर्व्याकरणसिद्धान्तसुधानिधौ[9] ओरम्भट्टो व्याकरणदीपिकायां[10] श्रीकृष्णाचार्यः प्रक्रियाकौमुद्याः प्रकाशव्याख्यायां[11]

---

1. बृच्छब्दे०, तृतीयभागः, पृ० 2018,
2. अष्टा० भा० 3.1.117,
3. पा० मिता० 3.1.117,
4. पाणिनीयाष्टकं तत्वप्रकाशिकोपेतम् 3.2.117,
5. पद० 3.1.117,
6. श० कौ० 3.1.117,
7. जित्यो हलिः। बलेन क्रष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठम्। सि० कौ० कृत्यप्रक्रिया, पृ० 273, निर्णय०।
8. "काष्ठमिति हलिपदवाच्यमित्यर्थः"। बृहच्छब्दे0 तृतीयभागः, पृ० 2018,
9. जित्यो हलिः। बलेन क्रष्टव्यः। कृष्टसमीकरणार्थं स्थूलकाष्ठम। व्या० सि० सु० 3.1.117,
10. जित्यो हलिः। बलेन क्रष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठम्। व्या० दी० 3.1.117,
11. जित्यो हलिरिति। बलेनाक्रष्टव्य इत्यर्थः। महद्धलं हलिः। कृष्टसमीकरणार्थं स्थूलकाष्ठमुच्यते। प्र० कौ०, प्रकाशटीकोपेता, द्वितीयभागः, सूत्रसङ्ख्या 721, पृ० 471,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुद्धबोधापरनामा गङ्गादत्तशास्त्री पाणिनीयाष्टके तत्वप्रकाशिकोपेते[1] चारुदेवाचार्यश्च व्याकरणचन्द्रोदये[2] दीक्षितस्य व्याख्यानमेवानुवदन्ति। तदेतत् परस्परभिन्नयोर्द्वयोरर्थयोरभेदेन प्रतिपादनं नोचितं प्रतिभाति। हलति विलिखति भुवमिति हलिः। तच्च बृहद्धलमिति प्रसिद्धम्। कृष्टसमीकरणार्थं काष्ठं तु हलिरिति वक्तुं न शक्यम्। कुतः ? नहि तद् विलिखति। किन्तर्हि ? विलिखितं समीकरोति, इति स्फुटमेव तस्य भिन्नता द्योत्यते। अथ या हलिर्नहि सा कृष्टसमीकरणकाष्ठम्, यच्च कृष्टसमीकरणकाष्ठं न हि तद् हलिः। हलिश्च कृष्टसमीकरणकाष्ठञ्चेति परस्परभिन्नं वस्तु-द्वयम्। तस्माद् "महद्धलं हलिः, कृष्टसमीकरणार्थं स्थूलकाष्ठमुच्यते"[3] इति भट्टोजिदीक्षितवचनं न सङ्गतिमुपैति।

यत्तु हरदत्त आह "कष्टसमीकरणार्थं स्थूलकाष्ठं हलिरित्युच्यते"[4] इति, तदपि नोपपद्यते। कुतः ? हलिरिति योगरूढोऽयं शब्दः। हलति विलिखति भुवमिति यौगिकार्थपुरस्सरं बृहद्धले रूढः। कृष्टसमीकरणकाष्ठं तु न हि हलिरिति वक्तुं शक्यते। तत्र हि हलति विलिखति भुवमिति यौगिकार्थानुपपत्तेः। न हि तद् भुवं विलिखति। किन्तर्हि ? विलिखितं समीकरोति। तस्माद् विलेखनक्रियं बृहद्धलमेव|हलिः, तदेव च जित्य इति फलितम्। अयमेव चार्थो जिनेन्द्रबुद्धि—पुरुषोत्तमदेव—विठ्ठलाचार्य—नारायणभट्टप्रभृतिभिर्विद्वद्भिः स्वीक्रियत इति निर्दिष्टपूर्वम्।

"कृष्टसमीकरणार्थं स्थूलं काष्ठं हलिः" इत्येतत्तु यौगिकार्थादपि न सिद्ध्यति रूढितोऽपि च भिद्यते। न चात्र किञ्चित् कोशादेर्वचनं प्रमाणत्वेनोपलभामहे—कृष्टसमीकरणार्थं स्थूलं काष्ठं हलिरिति। मिश्रमहोदयेनायमर्थः कुतो गृहीत इति विचारणीयमस्ति।

---

1. जित्यो हलिः। बलेन क्रष्टव्य इत्यर्थः। महलद्धलं हलिः। कृष्टसमीकरणार्थं बृहत्काष्ठमुच्यते। पाणिनीयाष्टकम् (तत्वप्रकाशिकोपेतम) 3.1.117,
2. जित्यो हलिः = बलेन क्रष्टव्यः। महद्धलं हलिः। खेत में हल चलाने के पश्चात् जिस बड़े काष्ठ से उसे बराबर किया जाता है उसे हलि कहते हैं ऐसा भट्टोजिदीक्षित मानते हैं, जिसे किसान सुहागा कहते हैं।
   व्या० चन्द्रो० द्वितीयखण्डः, कृत्प्रकरण, पृ० 9,
3. श० कौ० 3.1.117,
4. पद० 3.1.117,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ प्रयोग – प्रदर्शनम्

द्व्याश्रयकाव्ये हेमचन्द्राचार्योऽपि महद्धलम् इत्यस्मिन्नेवार्थे जित्याशब्दं प्रयुङ्क्ते। तथा हि तस्य प्रयोगः

"दोह्या गाः प्रददौ जित्याशतभूमिं च भूमिपः[1]"। इति।

अत्राभयतिलकगणिकृता व्याख्या "जित्या महाहलानि तासां यच्छतं तस्य भूमिं च। महाहलशतेन यावती भूमिः कृष्यते तावतीमित्यर्थः[2]।" इत्थं हेमाचार्यमतेनापि महाहलमेव जित्या न तु कृष्टसमीकरणार्थं काष्ठम् इति स्फुटम्।

अथार्जुनरावणीय–प्रयोगः –

स्फुरद्विपूयायतमेखलाङ्गा विमुक्तजित्यादिकृषिप्रपञ्चाः।
रक्षोऽश्वयुग्यद्विपरुद्धतीरां विप्रा नदीं प्रोज्झ्य ययुर्भयेन॥[3]

अत्रापि जित्यशब्दस्य स एवार्थो बोध्यः।

---

1. द्व्या० (द्वितीय भागः) 11.23, पृ. 12,
2. " "
3. अर्जुन० 9.29,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अधिकरणे शेतेः । (3-2-15)

इह वार्त्तिकं पठ्यते—

"दिग्धसहपूर्वाच्च[1]"। इति।

दिग्धेन सह शेते "दिग्धसहशयः" इत्युदाहरणं भवति। प्रयोगरत्नमालाव्याकरणेऽस्यार्थं विशदयन्नाह पुरुषोत्तमविद्यावागीशः "चन्दनादिना दिग्धेन सह यः शेते स दिग्धसहशय इत्युच्यते।" महाभारतेऽपि खल्वेवं दिग्धेन लिप्तेन चन्दनादिना सह शायिनां जनानां निर्देशो लभ्यते—

ये पुरा शेरते वीराः शयनेषु यशस्विनः।
चन्दनागरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते॥[3]

इत्थमिह वर्णिता एतादृशा एव जना "दिग्धसहशय" इत्युदाहृतपदेन वाच्या भवन्तीति स्फुटं गम्यते।

---

1. काशिका 3.2.15,
2. प्रयो० व्या०, कृद्धिन्यासः 35, पृ० 344
3. म० भार० 11.16.33 (पूना)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–दिवाविभाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसङ्ख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु। (3-2-21)

अथास्य सूत्रस्य कानिचिद् उदाहरणान्यर्थतः प्रयोगतश्च मीमांस्यन्ते-

कारकरः –

न्यास-पदमञ्जरी–प्रदीपोद्योतप्रभृतिषु ग्रन्थेष्वस्योदाहरणस्यार्थनिर्देशो न लभ्यते। भट्टिकाव्य–रावणार्जुनीय–सुभद्राहरणादिषूदाहरणकाव्येषु चास्य प्रयोगोऽपि न दृश्यते। इह खल्वस्यार्थो विमृश्यते–

वणिग्भिः पशुपालैः कर्षकैश्च राज्ञे देयो भागो रक्षानिबन्धनः कर इत्युच्यते। कर एव कारः। प्रज्ञादित्वात् स्वार्थेऽण्[1]। प्रयुज्यते च भगवता सूत्रकारेण करपर्यायः कारशब्दः – "कारनाम्नि च प्राचां हलादौ"[2] इति। इह प्रकृतसूत्रेऽपि स एव करवाची कारशब्द इति व्याख्यानपरम्परया गम्यते। माधवीयधातुवृत्तौ[3] प्रक्रियाकौमुद्याः प्रकाशव्याख्यायां श्रीकृष्णाचार्यकृतायां[4],

---

1. अष्टा० 5.4.38,
2 अष्टा० 6.3.9,
3. कर एव कार इति प्रज्ञादिः। मा० धातु०, तनादिः 12, पृ० 513,
4. कर एवं कारः प्रज्ञादित्वात्स्वार्थेऽण्।
प्र० कौ० (प्रकाशव्याख्योपेता), तृतीयभागः, सूत्रसङ्ख्या 773, पृ० 493,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शब्दकौस्तुभे[1] चारुदेवशास्त्रिप्रणीते व्याकरणचन्द्रोदये[2] च कारशब्दोऽत्र सूत्रे करपर्याय इत्येव व्याख्यातम्। कारं करोति कारकरः। करोतिरत्र सङ्ग्रहकर्मा। अनेकार्थत्वाद्धातूनाम्, करोतेर्हि सर्वधात्वर्थानुवादकत्वाद् वा। कारं राजग्राह्यभागं करोति सङ्गृह्णाति यः स कारकर इति। कर-सङ्ग्राहकोऽधिकारी इत्यर्थः। वासुदेवशरण-अग्रवालमहोदयस्यायमेवार्थोऽभिमतः। तेनेदमप्यत्र निर्दिश्यते यद् विशिष्टानां राजकीयकराणां सङ्ग्राहकोऽधिकारी कारकर इत्युच्यते स्म। "कारनाम्नि च प्राचां हलादौ" इत्यनेन ते करा निर्दिश्यन्ते। प्राच्यदेशे खलु कालविंशेषेष्विमे प्रजया राज्ञे देया भवन्ति स्म। विशिष्टकरसङ्ग्राहक एव कारकर इत्येतत्तथ्यम् अग्रवालमहोदयः पालिसाहित्यस्य प्रमाणेन प्रतिपादयति— पालिसाहित्ये कारकर-पदवाच्यस्याधिकारिणो निर्देशोऽस्ति। "सामञ्ञफलसुत्त" इत्यत्र वर्णितम्—कश्चित् कृशवृत्तिः कृषको राज्ञोऽधिकारिणं ग्रामे समागतं दृष्ट्वा व्यचिन्तयत् अयं खलु कारकरोऽस्ति, यो विशिष्टप्रकारकं करं सङ्गृहीतुमागतः। रासिवड्ढको वास्ति, यः खलस्थाने (खलिहान में) धान्यराशिं परिमाय ततो राजभागं गृहीतुमागत इति।[3]

---

1. "कारकरः। कर एव कारः। प्रज्ञादित्वात् सर्वार्थेऽण्। श० कौ० 3.2.21,
2. "कार कर"। व्या० चं० द्वितीयखण्ड, कृत्प्रकरणम्, पृ० 47,
3. "पाणिनि ने कारकर और क्षेत्रकर का उल्लेख किया है, जो विशेष अधिकारियों की संज्ञायें थीं। पाणिनिकालीन भारतवर्ष, अध्याय 7, परिच्छेद 2, पृ० 396, कारकर संज्ञक अधिकारी विशेष प्रकार के राजकीय करों के वसूल करने वाले थे। सूत्र 6/3/10 (कारनाम्निच प्राचां हलादौ) में कुछ विशेष करों का उल्लेख है जो देश के पूर्वी भाग में प्रचलित थे और विशेष अवसरों पर प्रजा जिन्हें देने के लिये बाध्य की जाती थी। इनकी व्याख्या आगे की जायेगी। पाली साहित्य में भी इस नाम के अधिकारियों का उल्लेख है। सामञ्ञफलसुत्त में एक गरीब किसान राजा के अधिकारी को गाँव में आया हुआ देखकर समझता है कि या तो वह कारकारक था जो विशेष प्रकार के लाग (कार) वसूल करने के लिये आया था, या वह रासिवड्ढक था जो खलिहान में रास नापकर राजा का भाग ले जाने के लिये आया था (इध ते अस्स पुरिसो कस्सको गहपतिको कारकारको रसिवड्ढको, दीर्घनिकाय, सामञ्ञफलसुत्त 2/38)

पाणिनिकालीन भारतवर्ष, अध्याय 7, परिच्छेद 2, पृ० 396,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थम् अग्रवालमहोदयनिर्दिष्टेन पालिसाहित्यगत-प्रयोग-प्रामाण्येनेदं विज्ञायते यद् विशिष्टानां राजकीयकराणां सङ्ग्राहकोऽधिकारी कारकर इत्यभिधीयते स्म। तस्यैव प्रकृतसूत्रेण साधुत्वान्वाख्यानं क्रियते।

हेमचन्द्राचार्यकृतप्रयोगस्य समीक्षा

अथ हेमचन्द्राचार्येण कारं क्रियां करोतीत्यर्थे कारकरशब्दो द्व्याश्रयकाव्ये प्रयुज्यते—

अन्तकरे कर्तृकरे क्षणदाकरशेखरे।
अभूद् बलिकरो नान्दीकरः कारकरश्च सः॥[1]

करणं कारः क्रियेति यावत् तत्करोतीति कारकरः इत्ययमर्थोऽत्र श्लोकपदस्वारस्याज्ज्ञायते। तथा चात्र प्राह टीकाकृदभयतिलकगणी— "क्षणदाकरशेखरे शम्भौ विषयेऽभूत्। कीदृग् ? .... कारकरश्च। नमस्कारादिक्रियायाः कर्त्ता[2]" इति। तदेतन्नैवोपादेयं भवति। कुतः ? प्रमाणं विनैव कल्पितत्वाद् एतद्बाधकप्रमाणोपलम्भाच्च। बाधकप्रमाणञ्च प्राक् प्रस्तुतमेव श्रीवासुदेवशरणग्रन्थोद्धरणपुरस्सरम्।

वाचस्पत्ये[3] अष्टाध्यायी—(भाष्य)—प्रथमावृत्तौ[4] चापि प्रकृतोदाहरणस्य क्रियायाः कारक इत्यर्थो निर्दिष्टः। एतदपि तत एव हेतोरपास्तं भवति। अर्थप्रकाशिकायां तु उदाहरणमिदं नैवार्थापितम्।

आदिकरः –

आदिरित्यत्रारम्भस्य वाचकः। आदिं करोति आदिकरः। एनमेवार्थं वाचस्पत्यकारो निर्दिशति[5]। अस्मिन्नेवार्थे च प्रयोगा दृश्यन्ते। तद्यथा अर्जुनरावणीये—

---

1. द्व्या॰ द्वितीयभागः, 11.62, पृ॰ 33,
2. " " " "
3. "कारकर त्रि॰ कारं करोति कृ-ट। क्रियाकारके दासादौ। वाच॰ तृतीयभागः पृ॰ 1938,
4. कारकरः (काम करने वाला) अष्टा॰ प्र॰ 3.2.21, पृ॰ 418, प्रथम संस्करणम् (1964) ई॰
5. वाच॰, प्रथमभागः, पृ॰ 694,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"देवापदामादिकरो य एष नान्दीकरश्च क्षणदाचराणाम्"[1]।

रावणविषयीदं वचनम्। भाषावृत्तावपि "देवापदामादिकरो य एकः" इत्ययमर्जुनरावणीयस्य पद्यांशः प्रकृतसूत्रस्योदाहरणत्वेनोद्धृतः[2]।

द्व्याश्रयकाव्ये–

स्ववंशादिकरौ प्रीतौ दिवाकर-विभाकरौ।
एष भक्तिकरोऽकार्षीत्...................... ॥[3]

सुभद्राहरणे–

आज्ञया वासुदेवस्य जगदादिकरस्य वै।
किङ्करेण कृतं त्वष्ट्रा चित्रं चित्रकरेण यत्॥[4]

कौमुदीकथाकल्लोलिन्याम्–

"एषा .... स्वपक्षसम्पदामादिकरस्यापि विपक्षसम्पदामन्तकरस्य .... चण्डसिंहस्य पुमनुजा भगिनी"[5]।

नान्दीकरः

मङ्गलपाठो नान्दीत्युच्यते। नान्दीं करोति नान्दीकरः। तथा च

"नान्दीवादी नान्दीकरः समौ"[6]

इत्यमरकोशगतवचनं व्याख्यन्नाह भट्टक्षीरस्वामी अमरकोशोद्घाटनाख्यायां टीकायाम्–"नान्दीं मङ्गलपाठं करोति नान्दीकरः, दिवाविभेति टः"[7] इति। सा च

---

1. अर्जुन॰ 10.9,
2. भाषा॰ 3.2.21,
3. द्व्या॰ (द्वितीयभागः) 11.61, पृ॰ 32,
4. सुभद्रा॰ 3.47
5. कौ॰ कथा॰, पाश्चार्धभागः, एकादशकल्लोलः, पृ॰ 307,
6. अमर॰ 3.1.38,
7. अमर॰ (अमरकोशोद्घाटनोपेतः) 3.1.39, पृ॰ 101,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मङ्गलपाठात्मिका नान्दी नाटकादाववश्यङ्कर्त्तव्यतया निर्दिष्टा[1]। तां हि सूत्रधारो

---

1. तथा हि साहित्यदर्पणकार आह–

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते।
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।
तथाप्यवश्यङ्कर्त्तव्या नान्दी विघ्नोपशान्तये॥
आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति सञ्ज्ञिता॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी—।
पदैरुक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥

सा० द० 6.22, 23, 24, 25,

भरतमुनिश्च नाट्यशास्त्रे नान्दीलक्षणमित्थमाह–

आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रवर्त्तते।
देवद्विजनृपादीनां तस्मान्नान्दीति सञ्ज्ञिता।

ना० शा० 5.54,

वाचस्पत्ये च नान्दीशब्दविवरणे "यदाह भरतः" इति कृत्वेदमपि पद्यमुद्ध्रियते—

देवद्विजनृपादीनामाशीर्वादपरायणा———।
नन्दन्ति देवता यस्मात्तस्मान्नादी प्रकीर्त्तिता॥

वाच०, पञ्चमभागः, पृ० 4032,

वाचस्पत्यकोशकारस्य मतेन नान्दीशब्दस्य व्युत्पत्तिरित्थमस्ति - नन्दन्ति देवा अत्रेति नान्दी। करणाधिकरणयोश्च (अष्टा० 3.3.117) इत्यधिकरणे घञ्। पृषोदरादित्वाद् वृद्धिः। — द्र० वाच०, पञ्चमभागः, पृ० 4031,

शब्दकल्पद्रुमकोषकारश्चास्य व्युत्पत्तिमित्थाह– "नन्दन्त्यनेनेति। नन्द + घञ्। निपातनाद् दीर्घः ततो ङीप्"। श० कल्प०, द्वितीयभागः, पृ० 860,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मध्यमस्वरेण पठेदिति नाट्यशास्त्रकारो भरतमुनिर्निर्दिशति[1]। इत्थं नान्द्या मङ्गलपाठस्य कर्त्ता नान्दीकर इत्युच्यते। वासुदेवशरण-अग्रवालमहोदयेन प्रकृतोदाहरणस्यायमेवार्थो निर्दिष्टः[2]। अमर-पद-विवृत्तिकारो लिङ्ग्यासुरिरपि मङ्गलपाठको नान्दीकर इत्येवाह—

"नान्दीं मङ्गलवाद्यं वदतीति नान्दीवादी। नान्दीं मङ्गलपाठं करोतीति नान्दीकरः। मङ्गलपाठकस्य नामनी[3]" इति।

इदमत्रावधेयं यन्मङ्गलवाद्यम् इत्यत्र वाद्यशब्दः पाठ्यस्य उच्चार्यस्य वा वाचको व्याख्याकारस्याभिप्रेतोऽस्ति न तु भेर्यादिवाद्यपरः। तेन मङ्गलवाद्यम् इत्यस्य मङ्गलाय वाद्यम् = पाठ्यम् = उच्चार्यं पद्यादिमयं वाक्यमित्यर्थो गम्यते। अत एव मङ्गलवाद्यं वदतीत्युक्तम्, अन्यथा हि मङ्गलवाद्यं वादयतीति स्यात्। यच्चान्ते "द्वे मङ्गलपाठकस्य नामनी" इत्युक्तम्, एतेनापि व्याख्यातुरेष एवार्थोऽत्राभिप्रेत इति स्फुटं सूच्यते।

अथामरपदविवरणकृदप्ययार्योऽप्येतदेव समर्थयति। स हि "नान्दीवादी नान्दीकरः समौ" इत्येतद् व्याचक्षाण आह—

"देवद्विजनृपादीनां स्तुतिर्यस्मात् प्रयुज्यते।
आशीर्वचनसंयुक्ता सा नान्दी नन्दिनो मुदे॥"

---

1. सूत्रधारः पठेत्तत्र मध्यमस्वरमाश्रितः।
नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम्॥ ना० शा० 5.104,

एतदर्थप्रतिपादकमेव शब्दकल्पद्रुमकोषे नान्दीशब्दविवरणे मालतीमाधवटीकाया इदमुद्धरणं प्रस्तूयते—

काचिद्दशपदा नान्दी काचिदष्टापदा तथा।
सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः॥

इति मालतीमाधवटीका"॥ श० कल्प०, तृतीयभागः, पृ० 860,

2. "सूत्र 3/2/21 में पाणिनि ने नान्दीकर का उल्लेख किया है। नाटक के आरम्भ में नान्दीपाठ करने वाले के लिये यह संज्ञा प्रयुक्त होती थी"।

पाणि० भार०, अ० 5, परि० 3, पृ० 328,

3. अमर० (दाक्षिणात्यव्याख्योपेतः) द्वितीयभागः 3.1.18, पृ० 52,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाट्यादौ पठ्यते यत्तु सा नान्दी कथिता बुधैः।
सा स्यात् पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृता॥

इत्यादिना कोहलादिभिरुक्तलक्षणः पद्यविशेषो नान्दीत्युच्यते। यत्किञ्चिन्मङ्गलसूचकं वाक्यमात्रं वा। तथा च नान्दीमुखं कर्म इति मङ्लमुखमित्यर्थः तथा च "मदकलकलविङ्कीकाकुनान्दीकरेभ्यः" इति मुरारिप्रयोगश्च। नान्दीं वदति ताच्छील्येनेति नान्दीवादी। सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः। नान्दीं मङ्गलं करोतीति नान्दीकरः। दिवाविभानिशा........बहुनान्दी........इत्यादिना करोतेष्टः प्रत्ययः[1]" इति। एतेन नान्दीकरो मङ्गलपाठक इत्यर्थः प्रतिपादितो भवति। मल्लिनाथस्तु अमरपदपारिजाताभिधाने व्याख्याने भेरीवादकस्यापीमे नामनी इति विशेषमाह–

"नान्दीवादी नान्दीकरः समौ। आशीर्वादकनामनी। देवद्विजनृपादीनामाशीर्नान्दीति कीर्त्यत इति रभसकोषः। खेलिवादकनामनी अपि स्याताम्। दुन्दुभिस्त्वानको भेरी भम्भा नासूश्च नान्द्यपि इति वैजयन्ती[2]"। एतेन स्फुटं यन्नान्दीकर इत्यस्य आशीर्वादकः = (मङ्गलपाठकः) भेरीवादकश्चेति द्वावप्यर्थौ मल्लिनाथस्याभिप्रेतौ स्तः। कैश्चित्वत्र नान्दीवादी नान्दीकर इत्यनयोः मङ्गलार्थम्भेर्यादिवादक इत्ययमेक एवार्थो वर्ण्यते। तद्यथा रामाश्रमः "नान्दीवादी नान्दीकरः समौ" इत्यस्य व्याख्यायामाह–

"द्वे नाटकादौ मङ्गलार्थम्भेर्यादिवादकस्य"[3] इति।

अमरकोशस्य व्याख्याता भरतोऽप्येतन्मतं निर्दिशति–

"केचित्तु भेरीप्राया नान्दी, तद्वादनशीलः, अत्र वदिकृञौ वादनार्थावित्याहुः"[4] इति।

---

1. अमर० (दाक्षिणात्यव्याख्योपेतः) द्वितीयभागः, 3.1.39, पृ० 53,
2. अमर० (दाक्षिणात्यव्याख्योपेतः) द्वितीयभागः, 31.38, पृ० 54,
3. अमर० (रामाश्रमीटीकोपेतः) 3.1.38, पृ० 488,
4. शब्दकल्पद्रुमकोषे नान्दीशब्दविवरणे "इत्यमरटीकायां भरतः" इति कृत्वा भरतस्यायं निर्देश उद्धृतः।

द्र० - श० कल्प०, द्वितीयभागः, पृ० 860,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थं नान्दीकर इत्यस्य द्वावर्थाविमौ व्याख्यायमानौ लभ्यते। उभयोश्चानयोरर्थयोः प्रयोगा दृश्यन्ते। मङ्गलपाठकेऽर्थे तावदनर्घराघवनाटके मुरारिकवेः प्रयोगः –

अयमपि खरयोषित्कर्णकाषायमीषद्विसृमरतिमिरोर्णाजर्जरोपान्तमर्चिः।
मदकलकलविङ्कीकाकुनान्दीकरेभ्यः क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति॥[1]

"अयं भानुमान् सूर्योऽपि मदकलानां कलविङ्कीनां चटकीनां काकुः = ध्वनिभेद एव नान्दी स्तुतिवादस्तत्करेभ्यः क्षितिरुहशिखरेभ्यो वृक्षाग्रेभ्यः .... अर्चिस्तेज उच्चिनोति आकर्षति। अयमस्तं व्रजन् भानुः खरयोषित्कर्णवर्णं .... निजमर्चिः मत्तचटकीकुलकाकुध्वनिरूपस्तुतिवाक्यान्युद्घोषयद्भ्यो वृक्षाग्रेभ्यः समाकर्षतीत्यर्थः "इतीयमत्र आचार्यरामचन्द्रमिश्रकृता प्रकाशटीका[2]। रुचिपतिरुपाध्यायस्त्वत्र मदकलकलविङ्कीकाकुरेव नान्दीवाद्यभेदः स्तुतिर्वा, तत्करेभ्य इत्युभयं निर्दिशति[3]। सुभद्राहरणे चापि मङ्गलवाचकेऽर्थे नान्दीकर इति प्रयोगोऽस्ति–

क्वचिल्लिपिकरैर्युक्तं क्वचिन्नान्दीकरैर्नटैः।
क्वचिद्बलिकरैर्यच्च क्वचित् क्षेत्रकरैर्नरैः॥[4]

तदिन्द्रप्रस्थाख्यं पुरमिति पूर्वेण सम्बन्धः।

मङ्गलार्थम्भेर्यादिवादके चार्थे तु द्व्याश्रयकाव्ये प्रयोगः–

अन्तकरे कर्त्तृकरे क्षणदाकरशेखरे।
अभूद् बलिकरो नान्दीकरः कारकरश्च सः॥[5]

---

1. अनर्घ० 2.45,
2. अनर्घ० (प्रकाशटीकोपेतम्) 2.45, पृ० 98, चौखम्बा०।
3. "मदकला या कलविङ्की चटकस्त्री" गुर्तल" इति प्रसिद्धा, तस्याः काकुर्ध्वनिभेदः सैव नान्दी वाद्यभेदः स्तुतिर्वा, तत्करेभ्यः।"
   अनर्घ० (रुचिपत्युपाध्यायटीकोपेतम्) 2.45, पृ० 106, निर्णय०।
4. सुभद्रा० 3.49,
5. द्व्या० (द्वितीयभागः) 11.62, पृ० 33,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह खलु नान्दीकर इत्यनेन शम्भुपूजने मङ्गलसूचकभेर्यादिवाद्यध्वनिकारक इति भावो गम्यते। तथा चात्र अभयतिकगणिकृता टीका—"नान्दीकरो द्वादशविधतूर्यवादक इत्यर्थः"।[1]

अथ नान्दीशब्दस्य समृद्धिरित्यर्थोऽपि लभ्यते। भट्टाचार्येण तारानाथतर्कवाचस्पतिना वाचस्पत्यकोषेऽयमर्थः सङ्कलितः[2]। ब्रह्मपुराणे—

"ते तु नान्दीसुखा नान्दी समृद्धिरिति कथ्यते"[3] इति।

एतेन नान्दीशब्दः समृद्ध्यर्थकोऽपीति स्फुटम्। इह च "नन्दन्ति जना अनयेति नान्दी" इत्येषा व्युत्पत्तिरास्थेया[4]। नान्द्या समृद्ध्या हि जना नन्दन्तीति सर्वलोकप्रत्यक्षमेतद्। अतः सङ्गच्छतेऽयमर्थो नान्दीशब्दस्य। तामेतां नान्दीं समृद्धिं यः करोति स नान्दीकर इति। अर्जुन-रावणीयमहाकाव्ये खल्वस्मिन्नर्थे नान्दीकर इति प्रयोगोऽपि दृश्यते—

"देवापदामादिकरो य एष नान्दीकरश्च क्षणदाचराणाम्"[5] इति।

रावणमधिकृत्येदमुक्तम्। यो देवापदाम् आदिकरः = उत्पादकः, क्षणदाचराणाञ्च नान्दीकरः समृद्धेः सम्पदो वा कर्त्ता। देवानामापदुत्पादको रक्षसां च सम्पदः कर्त्तेति गम्यते। अत्र खल्वयमेवार्थः पदानां परस्पराकाङ्क्षया व्यज्यते। प्रकरणानुकूल्याच्च युज्यते। रक्षसां नान्दीकरः = मङ्गलपाठकः, मङ्गलसूचकवाद्यवादको वेत्ययमर्थस्त्वत्र न सङ्गच्छते। प्रकृतप्रकरणाननुकूलत्वाद् औचित्याभावाच्च।

अथेह नान्दीकरशब्दस्य पूर्वं द्वावर्थौ निर्दिष्टौ—मङ्गलपाठकः मङ्गलार्थम्भेर्यादिवाद्यवादकश्चेति। तत्र कश्चित् प्रथमं प्रत्यपादयत्।

---

1. द्व्या० (द्वितीय भागः) 11.62, पृ० 33,
2. द्र० - वाच०, पंचमभागः, पृ० 4036,
3. वाचस्पत्ये ह्येव पद्यार्धमिदं ब्रह्मपुराणस्येति कृत्वोद्धृतम्।
   द्र० - वाच०, पञ्चमभागः, पृ० 4036,
4. नन्दतेः "करणाधिकरणयोश्च" (अष्टा० 3.3.117) इति करणे घञ्। तथा च शब्दकल्पद्रुमः "नान्दी-स्त्री, नन्दन्त्यनयेति। नन्द + घञ्। निपातनाद्दीर्घः, ततो ङीप्" इति। द्र० - श० कल्प०, द्वितीयभागः, पृ० - 860,
5. अर्जुन० 10.9,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कश्चिदपरम्। कश्चिदुभयम्। द्वयोश्चार्थयोः प्रयोगो दृष्टः। इत्थं पूर्वनिर्दिष्टौ द्वावप्यर्थौ बहुभिर्व्याख्यातौ परस्परं सम्बद्धार्थौ च स्तः। इमौ सूत्रकृत आचार्यस्याभिप्रेतावास्ताम् इति सम्भाव्यते।

यच्च समृद्धेः कर्त्ता नान्दीकर इत्येवमपरोऽप्यर्थः प्रतिपादितः, अर्जुनरावणीयमहाकाव्यप्रयोगोद्धरणपुरस्सरं च समर्थितः, स सूत्रकारस्याऽभिप्रेतोऽस्ति, न वाऽस्तीति दुर्वचमेतत्। तद्विषये हि निर्णायक-प्रमाणानुपलम्भात्।

कर्तृकरः

उदाहरणमिदम् अमरकोशादिषु प्रत्नग्रन्थेषु न लभ्यते, न च वाचस्पत्य-शब्दकल्पद्रुमप्रभृतिष्वाधुनिककोषग्रन्थेष्विदं सङ्कलितमस्ति। भट्टिकाव्य-रावणार्जुनीय-सुभद्राहरणप्रभृतिषूदारणकाव्येष्वप्यस्य प्रयोगो न दृश्यते। अर्थ-प्रकाशिकायामपीदं नैवार्थापितम्। कोऽह्यस्यार्थ इति न स्फुटमवगम्यते।

सामान्येन हि क्रियायाः कारकः कर्त्तेत्युच्यते, तेन च कर्त्तारं करोति कर्त्तृकर इत्यर्थो वक्तुं शक्यते। परं किमु भगवतः सूत्रकारस्यायमेव कर्त्ताऽत्राभिप्रेत आसीद् इति नास्ति निश्चयः। इदमपि चाऽसम्प्रधारितमेवास्ति यत् करोतिरत्र किमर्थक इति। किमु उत्पादनार्थकः ? आहोस्वित् प्रेरणार्थकः ? उताहो नियुक्त्यर्थक इति। किन्नु कर्त्तारमुत्पादयति, आहोस्वित् प्रेरयति उत वा नियोजयतीति न हि निश्चितं किञ्चिद् अध्यवसीयते। द्व्याश्रयकाव्ये हेमचन्द्राचार्येण कर्त्तृकर इति भगवतः शङ्करस्य विशेषणत्वेन प्रयुज्यते—

अन्तकरे कर्त्तृकरे क्षणदाकरशेखरे।
अभूद् बलिकरो नान्दीकरः कारकरश्च सः॥[1]

इह खलु कर्त्तृपदेन क्रियायाः कारकः कर्त्तेति गृह्यते। करोतिश्च तत्प्रादुर्भावकरणार्थकः प्रेरणार्थको वा गृहीत इति श्लोकपदस्वारस्याद् विज्ञायते। तथाहि च टीकाकृदभयतिलकगणी प्राह—"कर्त्तारं क्रियाकारकं पुरुषं करोति कर्त्तृकरस्तस्मिन्। ईश्वरेण हि कर्त्ता क्रियते। युदक्तम्—

अन्यो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥ इति।

1. द्व्या० (द्वितीयभागः) 11.62, पृ० 33,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेनास्य जगत्सृष्टिरपि सूचिता"[1] इति। चारुदेवशास्त्रिणा चास्योदाहरणस्य कर्त्तुः प्रेरक इत्यर्थो मतः।[2]

वासुदेवशरण–अग्रवालमहोदयस्य मतेन तु कर्त्तृकर इति काचिद् विशिष्टा संज्ञाऽस्ति। तेनोक्तं यदिदं पदमस्पष्टार्थं साहित्येऽप्रयुक्तं चास्ति।[3] अस्यार्थनिर्णयार्थं प्रवृत्तोऽग्रवालमहाशय आह–पालीवाङ्मये राज्ञो दूतत्वेन प्रतिनिधित्वेन वा कार्यं सम्पादयिता कर्त्तेति व्यवहृतोऽस्ति। कौटल्येन सर्वोच्चकोटिगतो दूतो निसृष्टार्थ इत्युक्तः। तस्यैव च "अवसृष्टार्थः" इत्यपरमभिधानं निर्दिष्टम्। अस्मादेव किल हिन्द्यां बसीठ इति शब्दो निष्पन्नः। एष हि दूतो राज्ञः सकाशात् कर्त्तुमकर्तुमन्यथाकर्तुञ्च प्राप्ताधिकारो भवति स्म। भगवान् कृष्णः पाण्डवैर्दुर्योधनसभायाम् अवसृष्टार्थदूततत्वेन प्रहितो बभूव। एवं प्रतीयते यदीदृश एव राजप्रणिधिः कर्त्तेति कथ्यते स्म। तस्य च नियोक्ता राजा मुख्यामात्यो वा कर्त्तृकर इत्यभिधीयते स्म।[4]

अथ श्रीमद्वासुदेवशरण–निर्दिष्टमिमं सम्भाव्यमर्थं दृष्ट्वेयमपराऽपि सम्भावना समुदेति यद् रामायणे राज्ञः प्रतिनिधित्वेन राजकार्यस्य सम्पादयितारो

---

1. द्व्या० (द्वितीय भागः) 11.62; पृ० 33,
2. "कर्तृ—कर्तृकरः, कर्त्ता को प्रेरित करने वाला"।

   व्या० चन्द्रो०, द्वितीयखण्डः, कृत्प्रकरणम्, पृ०-46,
3. पाणिनि ने कर्तृकर इस विशेष संज्ञा का उल्लेख किया है। (3.2.21)

   यह शब्द अस्पष्टार्थ और साहित्य में अप्रयुक्त हैं"।

   पाणि० भार०, अ० 7, परि० 2, पृ० - 398,
4. "पाली में राजा के दूत या उसकी ओर से कार्य करने वाले के लिए कर्त्ता शब्द का प्रयोग हुआ है (स्टीड, पालीकोश, जातक, 6/259 आदि)। कौटिल्य ने सबसे ऊंची कोटि के दूत को निसृष्टार्थ कहा है (अमात्यसम्पदोपेतो निसृष्टार्थः) उसे ही अवसृष्टार्थ भी कहते थे, जिससे हिन्दी में बसीठ शब्द बना है। उसे राजा की ओर से कर्त्तुमकर्त्तुन्यथाकर्तुं सब प्रकार के अधिकार प्राप्त होते थे। कृष्ण पाण्डवों की ओर से दुर्योधन की सभा में अवसृष्टार्थदूत बनाकर भेजे गये थे। ज्ञात होता है कि कर्त्ता इसी प्रकार के राजप्रणिधि की संज्ञा थी, और उसे नियुक्त करने वाला राजा या मुख्यामात्य कर्तृकर कहलाता था"

   पाणि० भार०, 31.6, परि० 2, पृ० 398,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजकर्त्तार इत्यभिहिताः[1]। ते राजकर्त्तार एवात्र यदि कर्तृपदेन गृहीताः स्युस्तर्हि तेषां कर्त्ता = नियोजको राजा महामात्यो वा कर्तृकर इति स्यात्।

क्षेत्रकरः –

इदमुदाहरणपदमपि अमरकोशादिषु प्राच्यग्रन्थेषु न लभ्यते, न च वाचस्पत्यशब्दकल्पद्रुमप्रभृतिषु नव्यकोशेषु सङ्गृहीतं दृश्यते। अर्थप्रकाशिकायामपीदं नैवार्थापितम्। द्व्याश्रयकाव्ये तु क्षेत्रस्य रचक इत्यर्थे क्षेत्रकरशब्दः प्रयुज्यते–

---

1. व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः।
समेत्य राजकर्त्तारः सभामीयुर्द्विजातयः॥
मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः।
कात्यायनो गौतमश्च जाबालिश्च महायशाः॥
एते द्विजाः सहामात्यैः पृथग्वाचमुदीरयन्।
वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम्॥
ईक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम्।
अराजकं हि नो राष्ट्रं न विनाशमवाप्नुयात्॥

रा० 2.16, श्लो० 1, 2, 3, 7 (बड़ोदा)

अन्यच्च–

ततः प्रभातसमये दिवसेऽथ चतुर्दशे।
समेत्य राजकर्त्तारो भरतमिदमब्रुवन्॥
गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः।
रामं प्रव्राज्य ज्येष्ठं लक्ष्मणं च महाबलम्॥
त्वमद्य भव नो राजा राजपुत्र महायशाः।
सङ्गत्या नापराध्नोति राज्यमेतदनायकम्॥

रा० 2.71, श्लो 1, 2, 3, (बड़ोदा)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"रणे क्षेत्रकरान् जङ्घाकरान् कुर्वन्नभूच्च सः।"[1] इति।

तथा च टीकाकारः प्राह—स जयसिंहः .... रणे युद्धार्थं क्षेत्रकरान् रणभूमिरचकान् दोर्बलावलेपात् सङ्ग्रामारम्भिणः परानित्यर्थः"[2]। अयमप्यर्थः स्वकल्पनयोपनीतः, न तु सम्प्रदायप्राप्त इति विज्ञायते। अत्रार्थे तथाविधप्रमाणाभावात्। आचार्यचारुदेवेन क्षेत्रकर इत्यस्य "क्षेत्रं करोति कृषति" इत्यर्थः व्याख्यातः[3]। अयमर्थोऽपि सम्भाव्यकल्पनाबुद्ध्या तर्कित इति ज्ञायते। अत्रार्थे प्रमाणस्याप्रदर्शनात्। सूत्रकारस्यायमेवार्थोऽभिप्रेत इति नास्ति निश्चयः, एतत्साधकप्रमाणानुपलम्भात्।

वासुदेवशरण-अग्रवालमहोदयस्य मतेन तु क्षेत्राणां परिमापनं कृत्वा तद्व्यवस्थापयितारो ह्यधिकारिणः क्षेत्रकरपदेनाभिधीयन्ते स्म। एत एव हि पालीसाहित्ये रज्जुगाहकपदेनाभिहिताः। रज्जुग्राहक एव क्षेत्रकर इत्यग्रवालमहोदयस्याभिमतम्[4]। पुरातनार्थसम्बद्धत्वाद् इदमेव मतमत्र युक्तं प्रतिभाति। तथाप्यस्यार्थस्योपोद्बलनार्थं रज्जुग्राहक एव क्षेत्रकर इतीत्थम्भूतं स्पष्टं प्रमाणं प्राचीनग्रन्थेषु मृग्यम्।

भट्टिकाव्ये क्षेत्रकर इति प्रयोगो न लभ्यते। अर्जुनरावणीय-सुभद्रा-हरणयोस्त्वयं प्रयोगो दृश्यते। तत्र कमर्थमुद्दिश्येदं प्रयुज्यत इति न स्फुटं गम्यते। अर्जुनरावणीये तावत्—

धनुष्करा ये समरेष्ववीराः सेवार्थमिन्द्रेण पुरा नियुक्ताः।
ते किङ्कराः क्षेत्रकरा इवैत्य स्नातुं तमावृत्य चिराय तस्थुः॥[5]

---

1. द्व्या० (द्वितीयभागः) 11.64, पृ० 34,
2. " " "
3. क्षेत्र—क्षेत्रकर, क्षेत्रं करोति कृषति, खेत पर हल चलाने वाला।

   व्या० चन्द्रो०, द्वितीयखण्डः, कृत्प्रकरणम्, पृ० 46,
4. कारकर और क्षेत्रकर—पाणिनि ने 3.2.21 सूत्र में कारकर और क्षेत्रकर का उल्लेख किया है, जो विशेष अधिकारियों की संज्ञाएँ थीं। खेतों की नापजोख करके बन्दोबस्त करने वाले अधिकारी क्षेत्रकर कहे जाते थे, जिन्हें पालीसाहित्य में रज्जुगाहक कहा गया है। कुरुधम्मजातक में एक अमात्य का उल्लेख है जो जनपद में जाकर खेतों को नाप कराता था। (जातक 3.276)।

   पाणि० भार० अ० 7, परि०, पृ० 397,
5. अर्जुन० 10.10,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभद्राहरणे च–

क्वचिल्लिपिकरैर्युक्तं क्वचिन्नान्दीकरैर्नटैः।
क्वचिद्बलिकरैर्यच्च क्वचित्क्षेत्रकरैर्नरैः॥[1]

जङ्घाकरः–

गुल्फजान्वोरन्तरालावयवो जङ्घेत्युच्यते। जङ्घां करोतीति जङ्घाकरः। जङ्घाशब्देनात्र जङ्घासाध्या गतिर्गृह्यते[2]। जङ्घां जङ्घासाध्यां गतिं धावनात्मिकां करोतीति जङ्घाकर इति भावः। अत्रेदमवधेयम्—नह्यस्य धावकमात्रमर्थोऽस्ति। किन्तर्हि ? जङ्घाचालनेन धावनकर्मणाऽजीविनि जङ्घाकर इति व्यवह्रियते। कथमेतद् गम्यते ? अमरकोशे हि जङ्घाचालनेन धावनकर्मणाऽजीविनि जङ्घाकरिक इति शब्दो निर्दिष्टः[3]। सोऽयं जङ्घाकरिकशब्दो जङ्घाकर इत्यमस्मादेव स्वार्थे कप्रत्ययविधानान्निष्पन्न इति वाचस्पत्यकारः[4]। एतेन गम्यते यो ह्यर्थो जङ्घाकरिकस्य स एव जङ्घाकरस्येति। जङ्घाकरिकशब्दश्च धावनकर्मणाऽजीविनि वर्त्तते, इत्थं जङ्घाकरशब्दस्यापि "धावनाऽजीवी" इत्यर्थो विज्ञायते। स हि जङ्घाकरिको धावित्वा द्रुतगमनेन वा सन्देशं हरति स्म, तेन चाजीविकामाप्नोति स्म इति कौटलीयार्थशास्त्राज्ज्ञायते[5]। सोऽयं कौटल्येन निर्दिष्टो जङ्घाकरिक एव

---

1. सुभद्रा० 3.49,
2. तथा हि वाचस्पत्यकोषकार आह–"जङ्घाकर त्रि जङ्घां तत्साध्यगतिं करोति, कृ–दिवाविभेत्यादिना टः"। वाच0, चतुर्थभागः, पृ० 3012,
3. "जङ्घाकरिकजाङ्घिकौ" इत्यमरः (2.8.73)।

   अथास्य व्याख्यायां रामाश्रम आह–"द्वे जङ्घाजीविनः" इति। अमर० (रामाश्रमीटीकोपेतः) 2.8.73, पृ० 377,
4. "जङ्घाकर —— जङ्घाकरिके धावके, जङ्घाकर + क। तत्रार्थे। वाच०, चतुर्थभागः, पृ० 3012,
5. "ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत्। अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानीकस्थचिकित्सकाश्वदमकजङ्घाकरिकेभ्यश्च विक्रयाधानवर्जम्" इति कौटलीयार्थशास्त्रम्, अधिकरणम्-2, अध्याय-1, त0 गणपतिशास्त्री कौटलीयार्थशास्त्रस्य श्रीमूलाभिधायां व्याख्यायां जङ्घाकरिक शब्दस्यार्थमित्यमाह–"जङ्घाकरिको जाङ्घिको दूरदेशगतागतजीवी" इति।

   कौटलीयार्थशास्त्रम् (श्रीमूलासंवलितम्) खण्डः 1, अधिकरण्-2 अध्यायः 1, पृ० 111,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकृतसूत्रेणान्वाख्यायमानो जङ्घाकरोऽस्तीति वासुदेवशरणमहोदयेनापि प्रतिपादितम्[1]। तदिदं प्रतिपादनं पुरातनार्थसम्बद्धत्वादिह युक्तमिति गम्यते। हेमचन्द्राचार्येण तु दूरदेशगतागतजीवी जङ्घाकर इत्यर्थमनपेक्ष्य पलायनकर्त्तरि जङ्घाकरशब्दः प्रयुज्यते—

"रणे क्षेत्रकरान् जङ्घाकरान् कुर्वन्नभूच्च सः"[2] इति।

तथाह्यत्र टीकाकृदाह—स जयसिंहः .... रणे युद्धार्थं क्षेत्रकरान् रणभूमिरचकान् दोर्बलावलेपात् सङ्ग्रामारम्भिणः परानित्यर्थः। जङ्घाकरान् पराजयाज्जङ्घाकर्मणः पलायनस्य कर्तॄन् कुर्वन्"[3]। इति।

भट्टिकाव्येऽर्जुनरावणीये च जङ्घाकर इति प्रयोगो न दृश्यते।

धनुष्करः –

धनुः करोतीति धनुष्करः। धनुष कर्त्ता शिल्पीत्यर्थः। प्रकृतोदाहरणस्यायमेवार्थो वाचस्पत्यकारेण निर्दिष्टः[4]। टप्रत्ययान्तस्यास्य धनुष्करशब्दस्यैनमेवार्थं च शब्दकल्पद्रुमकरोऽपि प्रतिपादयति[5]। अतो धनुः करोतीति धनुष्करः शिल्पिविशेष इत्यर्थोऽत्र युज्यते। अयमर्थश्च प्रयोगैरपि समर्थ्यते। तद्यथा अर्जुनरावणीये—

धनुष्करा ये समरेष्ववीराः सेवार्थमिन्द्रेण पुरा नियुक्ताः।
ते किङ्कराः क्षेत्रकरा इवैत्य स्नातुं तमावृत्य चिराय तस्थुः॥[6]

---

1. समाचार लेकर जाने वाले धावन जङ्घाकर कहलाते थे (3.2.21) जिन्हें कौटिल्य ने जङ्घाकरिक कहा है। (अर्थ0 2.1)। पाणि॰ भार0 अ॰ 7, परि॰-2, पृ॰ 397,
2. द्व्या॰ (द्वितीयभागः) 11.64, पृ॰ 34,
3. " " "
4. "धनुष्कर त्रि॰ धनुः करेऽस्य इसुसोः सामर्थ्ये षत्वम्। धनुर्हस्ते-1 धानुष्के, धनुः करोति कृ॰-ट चापकारके शिल्पिभेदे त्रि॰"। वाच॰ पञ्चमभागः, पृ॰ 3844,
5. "धनुष्करः पुं॰ (धनुः करोतीति। धनुस् + कृ + दिवाविभेति टः) धनुः करे यस्य इति व्यधिकरणबहुव्रीहिः समासो वा"। श॰ कल्प॰, द्वितीयभागः, पृ॰-779,
6. अर्जुन॰ 10.10,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभद्राहरणे च

धनुष्करैस्तथा पूर्णं भृत्यैर्बहुकरैरपि।[1]

द्व्याश्रयकाव्येऽपि धनुष्कर इति प्रयोगो दृश्यते—

"यस्मिन् बाहुकरः सोऽभूदरुष्कर-धनुष्करः[2]" इति।

टीकाकृदभयतिलकगणिमतेनेह धनुः करोति गृह्णाति यः स धनुर्गृहीता धनुष्कर इत्यर्थोऽस्ति। यथाहि स आह—"स जयसिंहो यस्मिञ्छत्रौ विषयेऽभूत्। कीदृक्? बाहुकरो बाहुम् उपचाराद् बाहुकार्यं शौर्यं कर्त्ता। तथारुष्करोऽस्त्रव्रणकर्त्ता यो धनुष्करो धनुर्गृहीतेत्यर्थः"[3] इति। आचार्यस्य तु धनुष्करोति विध्यतीति धनुष्कर इत्यर्थोऽत्राभिप्रेतोऽस्तीति गम्यते। धनुश्शब्देनेह धनुस्साध्यं वेधनं तस्याभिप्रेतम्। प्रयुज्यते चास्मिन्नर्थे धनुष्करणम्[4] इति। अतो हेमचन्द्राचार्यस्याप्यत्र धनुस्साध्य-वेधनक्रियाकर धनुष्कर इत्यर्थ एवाभिमत इति गम्यते।

---

1. सुभद्रा० 3.48,
2. द्व्या० (द्वितीयभागः) 11.63, पृ० 34,
3. " "
4. काशिकाकारः "विध्यत्यधनुषा" इति सूत्रव्याख्यायामाह—तद् इति द्वितीयासमर्थाद् विध्यति इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, न चेद् धनुष्करणं भवति।"...... एवं तर्हि धनुष्प्रतिषेधेन व्यधनक्रिया विशिष्यते, यस्यां धनुष्करणं न सम्भाव्यत इति"।

काशिका 4.4.83,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु पूर्वं धनुः करोतीति धनुषः कर्त्ता धनुष्कर इत्युक्तम्। तच्च अर्जुनरावणीयसुभद्राहरणयोः प्रयोगेण समर्थितम्। इह च धनुष्करोति = धनुष्करणं करोतीति धनुष्कर इत्यर्थः प्रतिपाद्यते द्व्याश्रय-प्रयोगं पुरस्कृत्य। अथानयोः कतरोऽर्थः सूत्रकारस्य भगवतः पाणिनेरभिप्रेतः ? अथवा द्वावप्यभिप्रेतौ इति भूयोऽप्यन्वेषणीयतामपेक्षते। इह खलु निर्णायकप्रमाणं मृग्यम्। अन्तरेण प्रमाणं तु न हि कश्चिन्निर्णयः कर्त्तुं शक्यः।

सूत्रम्—फलेग्रहिरात्मम्भरिश्च। (3.2.26)

फलेग्रहिः

"फलानि गृह्णाति इति फलेग्रहिर्वृक्षः" इत्यर्थो वृत्तिकारेण प्रदर्शितः[1]। यथाकालं फलानि धारयति यः स वृक्षः फलेग्रहिरिति भावः। अमरकोशकृदप्याह—

"स्यादबन्ध्यः फलेग्रहिः[2]" इति।

"बध्नाति फलमिति बन्ध्यः[3]"। तद्विपरीतोऽबन्ध्यः। यथाकालं फलप्रसवक्षमो वृक्ष इत्यर्थः। धातुवृत्तिकारोऽप्येनमेवार्थं समर्थयति।[4] दृश्यन्ते चास्मिन्नर्थे भूयांसः प्रयोगाः। तद्यथा—

सुभद्राहरणे—

फलेग्रहीणां वृक्षाणां फलान्यारुह्य तस्कराः।
चञ्चूर्यमाणास्तद्भीत्या लोलुप्यन्ते न जातु नः॥[5]

---

1. काशिका 3.2.26,
2. अमर० 2.4.6,
3. भट्टक्षीरस्वामिमतेनेयं व्युत्पत्तिः। द्र०-अमर० (अमरकोशोद्घाटनोपेतः) 2.4.7, पृ० 53,
4. "फलेग्रहिः अवन्ध्यवृक्षादिः"। मा० धातु०, क्र्यादिः – 65-66, पृ० 535,
5. सुभद्रा० 2.34,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्व्याश्रयकाव्ये–

"सेवनीयः सतां जज्ञे फलेग्रहिरिव द्रुमः[1]"। इति।

चम्पूभारते–

पुष्पात् प्रागेव सुषुवे पुत्रमेषेति वीरुधः।
फलेग्रहय एवासन् प्रसूनात् प्राक् पृथावने॥[2]

"महारथ त्व मम वाञ्छितद्रुमं–
फलेग्रहिं न प्रतनोषि यस्मात्"।[3]

वासुदेवविजये–

नासीदकालेऽप्यफलेग्रहिर्द्रुमस्तदर्तवः कर्मकरा इवासन्।[4]

अथैतावता विवेचनेन गम्यते यत् फलप्रसवक्षमे वृक्षे फलेग्रहिरिति पदं रूढम्। उपचारात् "फलेग्रहिर्यत्नः" इत्यादिप्रयोगोऽपि साधु। भट्टिकाव्यार्जुनरावणीययोस्तु फलग्राहकमात्रे फलेग्रहिरिति प्रयुज्यते। भट्टिकाव्ये तावत्–

आत्मम्भरिस्त्वं पिशितैर्नराणां फलेग्रहीन् हंसि वनस्पतीनाम्।
शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मात्॥[5]

काव्यकृदिह फलानि गृह्णन्तीति फलेग्रहयो मुनयः फलभोजना इति विवक्षति। सोऽयं प्रौढ्या रूढ्यनादरेणेत्थं प्रयोग इति मल्लिनाथः[6]। सम्प्रदायव्यतिक्रम इति चारुदेव-शास्त्री[7]।

---

1. द्व्या० (द्वितीयभागः) 11.66, पृ० 30,
2. चम्पू० 1.52,
3. चम्पू० 10.32,
4. वासु० 2.68,
5. भट्टि० 2.33,
6. "यद्यपि फलेग्रहिर्वृक्ष इति काशिकायाम्, "स्यादवन्ध्यः फलेग्रहिः" इत्यभिधानकोशेषु च फलसम्बन्धिवृक्षे रूढिः प्रतीयते, तथाप्यत्र प्रौढ्या रूढ्यनादरेण योगमात्राश्रयणेन मुनिविशेषणत्वमुक्तम्। भट्टि० (सर्वपथीनव्याख्योपेतम्) 2.33, पृ०-38,
7. द्र०-चारुदेवशास्त्रिनिबद्धो "भट्टिकाव्यविमर्शः" इति निबन्धः। विश्वसंस्कृतम् (त्रैमासिकम्) वर्षम् 3, अंक-3, ज्येष्ठ 2023 (मई 1966) पृ० 229,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्जुनरावणीये च–

सन्त्रासिताशेषफलेग्रहिद्विजः सम्मानितात्मम्भरिराक्षसव्रजः।
कुर्वन् सरिद्वारि स कूलमुद्रुजं सस्नौ प्रवेशेन च कूलमुद्वहम्॥[1]

इह सन्त्रासिता अशेषाः फहेग्रहिद्विजाः वृक्षस्थपक्षिणो येन इति भावोऽपि स्यात्। अथवा भट्टिप्रयोगतुल्यम्—सन्त्रासिता अशेषाः फलेग्रहिद्विजाः फलानि गृह्णन्ति भोजनाय ये ते द्विजाः ब्राह्मणा वनवासिनस्तापसाः येन स इति भावः स्यात्।

सूत्रम्—वहाभ्रे लिहः। (3.2.32)

वहंलिहो गौः –

वहंलिहो गौरिति काशिकायामुदाहरणम्। मूर्धाभिषिक्तञ्चेदमुदाहरणं सर्ववृत्तिग्रन्थेष्वित्थम्भूतमेव पठ्यते। वहति युगमनेनेति वहः वृषस्कन्धप्रदेश उच्यते। "गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च"[2] इति करणे घप्रत्ययान्तोऽयं वह-शब्दो निपातितः[3]। अमरकोशे खल्वयं वृषस्कन्धपर्यायो वहशब्दो निर्दिष्टः[4]। महाभारते चायमस्मिन्नर्थे प्रयुक्तो दृश्यते[5]।

काशिकायां चान्यत्र वहेगडुरित्युदाहरणपदं प्रदर्शितम्[6]। इहापि वहशब्दो बलीवर्दस्कन्धवाचक एवास्ति। वहे बलीवर्दस्कन्धदेशे युगसम्पीडनाज्जातः

---

1. अर्जुन० 10.16,
2. अष्टा० 3.3.119,
3. इह वृत्तिकार आह–"वहन्ति तेन वहः" इति। काशिका 3.3.119,
4. "स्कन्धदेशस्त्वस्य वहः सास्ना तु गलकम्बलः"। अमर० 2.9.63,
5. यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ।
   दक्षिणे चैव सव्ये च गवामिव वहः कृतः॥
   म० भार० 4.2.18, (पूना)
6. (वार्त्तिकम्) सप्तम्याः पूर्वनिपाते प्राप्ते गड्वादिभ्यः सप्तम्याः परम्। गडुकण्ठः, गडुशिराः। कथं वहेगडुः ? प्राप्तस्य चाबाधा व्याख्येया। काशिका 2.2.35,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्कशमांसग्रन्थिर्वहिगडुरित्यच्यते। एतेन वहो वृषस्कन्ध इति स्फुटम्। वहं लेढि वहंलिहो गौः। अयमेवार्थो भट्टोजिदीक्षितप्रभृतिविद्वद्भिर्व्याख्यायते[1] दृश्यन्ते चास्मिन्नर्थे प्रयोगाः। तद्यथार्जुनरावणीये—

मज्जन्तमेकं जनमेजयं तं स्तनन्धयानामपि नाशकारी।[2]
वहंलिहानां निवहो गवां वा निशाचराणां परिवार्य तस्थौ॥

द्व्याश्रयकाव्ये—

कूलमुद्वहसिन्धूर्मिरयैर्गोभिर्वहंलिहैः[3]।

अत्राह टीकाकारः—"वहंलिहैर्जातिस्वभावाज्जिह्वया स्कन्धान् स्पृशद्भिः"[4]। इति।

सुभद्राहरणे—

सरस्सु पीतपानीयैर्बभौ यत् कूलमुद्वहैः।
अभ्रंलिहमहाशृङ्गैः ककुद्मद्भिर्वहंलिहैः॥[5]

इह काव्यकृतः स्वोपज्ञा टीका—वहः स्कन्धः। वहत्यनेनेति कृत्वा। गोचरसंचरवहेति करणे घप्रत्ययो निपातितः[6]" इति।

अष्टाध्यायीभाष्ये तु स्वामिदयानन्देन "वहमुदकं लेढीति वहंलिहो वृषभः" इत्युक्तम्[7]। तच्चिन्त्यम्।

---

1. "वहः स्कन्धस्तं लेढीति वहंलिहो गौः"।
   श० कौ० 3.2.32, सि०कौ०, कृदन्तम्, पृ० 279 निर्णय०।
   आचार्य-चारुदेवोऽप्याह—"वहं लेढीति वहंलिहो गौः, बैल जो अपने कन्धे को चाटता है"।
   व्या० चन्द्रो०, द्वितीय-खण्डः, कृत्प्रकरणम्, पृ० 49,
2. अर्जुन० 10.15,
3. द्व्या० (द्वितीयभागः) 11.84, पृ० 43,
4. द्व्या० (द्वितीयभागः) 11.84, पृ० 44,
5. सुभद्रा० 3.55,
6. " "।
7. अष्टा० भा० 3.2.32,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–उदीचां माङो व्यतीहारे। (3.4.19)

अपमित्य याचते

माङिति मेङः कृतात्त्वस्य ग्रहणम्। तस्यैव व्यतीहारवृत्तित्वात्।[1] अपूर्वकालार्थोऽयमारम्भः, पूर्वकाले तु "समानकर्तृकयोः पूर्वकाले"[2] इत्येव सिद्धेः। अपमित्य याचते इत्युदाहरणम्[3]। पूर्वं ह्यसौ याचते पश्चादपमयते। तदिदमपूर्वकालेऽपि क्त्वो विधानमुदीचामाचार्याणां मतेन।

व्यतीहारो विनिमयो वस्तुपरिवर्त्तनादिरूपः। अथ अपमित्य याचते इत्यस्यायमर्थः—याचित्वा अपमयते इति। पूर्वं खलु याचते ततोऽपमयते = विनिमयं करोति। तद्यथा—वस्त्रं मे देहीति पूर्वं याचते, ततश्च वस्त्रविनिमयेन वस्त्वन्तरं ददाति तत्रेदं प्रयुज्यते—अपमित्य याचते इति। अपमातुं याचते इति भावः। अपूर्वकालेऽपि क्त्वेति विशेषः।

---

1. (मेङ् इत्ययं धातुः प्रणिदानेऽर्थे पठ्यते। द्र०-धा०पा०, भ्वादि० 688, प्रणिदानञ्च विनिमयः, व्यतीहार इति यावत्। एतदेव हि भाष्यकारोऽपि निर्दिशति। द्र०-म० भा० 3.4.19,
2. अष्टा० 3.4.21,
3. काशिका 3.4.19,
अथेह–"मयतेरिदन्यतरस्याम्" (अष्टा 6.4.70) इति विकल्पेनेत्वविधानाद् अपमाय याचते इत्युदाहरणमपि भवति। वृत्तिकारेण तु अपमित्य इत्येव दर्शितम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भाषायामित्थं चास्य प्रयोगः शक्यःकर्तुम्—"अपमित्य याचते गां देवदत्तम्। गां याचित्वा अपमयते = तद्विनिमयेन महिष्यादिकं ददातीत्यर्थः। गां मे देहि। त्वया गौर्दीयते चेन्मया महिषी प्रतिदीयते इत्येवं विनिमयं कर्तुं गां याचते इति भावः। याचनं पूर्वं विनिमयः पश्चात्, याचनञ्च विनिमयमुद्दिश्यैवेति स्थितम्।

अपमित्य हरति

इह अपमित्य हरति इत्यपरमुदाहरणं काशिकयां प्रदर्शितम्। हृत्वा अपमयते इत्यस्यार्थः। पूर्वं हरति गृह्णाति किञ्चिद् वस्तु, पश्चादपमयते तद्विनिमयेन वस्त्वन्तरं प्रयच्छति, तत्रेदं प्रयुज्यते अपमित्य हरतीति। इह विनिमयस्य पूर्वकालिकत्वाभावात् समानकर्तृकयोरित्यस्य न प्राप्तिः। प्रत्युत याचेर्हरतेश्च पूर्वकालिकत्वातत्तः क्त्वाप्राप्तिः। उदीचां मतेन त्विदमपवादविधानम्। अन्यत्र तु याचित्वापमयते, हृत्वापमयते इति भवत्येव पूर्वकाले यथा—प्राप्तः क्त्वाप्रत्ययः। अथार्जुनरावणीये सुभद्राहरणे च खल ईदृशमुदाहरण प्रयुक्तं दृश्यते। अर्जुनरावणीये तावत्—

पौर्वापर्यमविज्ञाय ब्रूते वाच्यस्य यः पुमान्।
तं हसन्ति जना मूढमपमित्येव याचकम्॥[1]

सुभद्राहरणे च—

अपमित्य तपोवित्तैरस्या भागं भगीरथः।
निनीषुः स्वपितॄन् नाकं ययाचे चन्द्रशेखरम्॥[2]

"भगीरथः स्वपितॄन् कपिलकोपाग्निदग्धानस्या जलेन स्नपितान् नाकं नेतुकामश्चन्द्रशेखरं याचित्वा तपोवित्तैरस्या भागं कपर्दभारधारिताया अपममे व्यतिजहे इत्यन्वयः"[3]।

1. अर्जुन० 13.4,
2. सुभद्रा० 6.13,
3. काव्यकारस्येयं स्वोपज्ञा व्याख्या,
द्र०-सुभद्रा० (स्वोपज्ञटीकोपेतम्) 6.13, पृ० 133,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चमोऽध्यायः

काशिकावृत्ति-चतुर्थाध्यायगत-विशेष्टोदाहरणानाम् अर्थः प्रयोगश्च ।

सूत्रम्–जानपदकुण्डगौणस्थल............वृत्त्यमत्रावपनाकृत्रिमा ....केशवेशेषु । (4.1.42)

जानपदी

जानपदीति ङीष् प्रत्ययो विधीयते वृत्तिश्चेत् सा भवति । जानपदीशब्दो यदा वृत्तिविशेषणं तदा ङीष् भवतीति भावः । जानपदी वृत्तिः । जानपदी अन्या, स्वरे विशेषः[1] । जनपदे भवा वृत्तिः कृषिपाशुपाल्यादिरूपा जानपदीति व्यवह्रियते । अर्जुनरावणीये चास्य प्रयोगो दृश्यते–

गौरीपतेः प्राप्य वरं वराकीः सन्त्रासयन् देववधूः सदेवाः ।
निरस्यते जानपदीं च वृत्तिं वध्यो न वा ब्रूत मया स पापः ॥[2]

द्व्याश्रयकाव्ये चाप्येतत् प्रयुक्तम्–

"जानपदीं वृत्तिमास्थिता सा" इति ।[3]

इह टीकाकृदाह–"जानपदीं जनपदे देशे भवां.........वृत्तिं पाशुपाल्यकर्षणरूपाम् इति ।[4]

---

1. इह उत्सादिपाठादञि कृते ङीप्, आद्युदात्तत्वञ्च भवति ।
2. अर्जुन० 14.16,
3. द्व्या० (प्रथमभागः) 4.52, पृ० 333,
4. " " " ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्– संहितशफलक्षणवामादेश्च। (4.1.70)

संहितोरूः

अनौपम्यार्थोऽयमारम्भः। पूर्वं तु "ऊरूत्तरपदाद्"[1] इति औपम्ये विधानम्। संहितशब्दोऽयं संश्लिष्टपर्यायः। संहितौ ऊरू यस्याः सा संहितोरूः। मांसलत्वाद् यस्या ऊरू परस्परं संश्लिष्टौ भवतः सा एवमुच्यते संहितोरूरिति। वासुदेवविजये चेदमुदाहरणपदं प्रयुक्तं दृश्यते–

"तां संहितोरूं युवतिं सरोरुदां शौरिर्व्यमार्क्षीत् कुररीमिवेक्षिता"।[2]

सुभद्राहरणे च–

संहितोरूं तुलाकोटिरोचिष्णुपदपल्लवाम्।[3]

शफोरूः

शफशब्दः खुरवाची[4]। यथा गवादेः शफो द्विधा विभक्तः सन् परस्परं संश्लिष्टो भवति तथा परस्परं संश्लिष्टौ मांसलत्वाद्यस्या ऊरू सा शफोरूः।

---

1. अष्टा० 4.1.69,
2. वासु० 1.49,
3. सुभद्रा० 2.120,
4. "शफः खुरे गवादीनाम्" इति हेमचन्द्राचार्यः। द्र०-अनेकार्थ० 2.305,
   "शफं क्लीबे खुरः पुमान्" इत्यमरसिंहः। द्र०-अमर० 2.8.49, शफशब्दोऽयं पुंसि नपुंसके चापीति नागेशः।

   द्र०-बृहच्छब्दे० (प्रथमखण्डः) स्त्रीप्रत्ययप्रकरणम्, पृ० 779-80,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शफाविव संश्लिष्टत्वाद् उपचारात्—शफोरूरित्युच्यते। भट्टोजिदीक्षितप्रभृतिभिर्विद्वद्भिरयमेवार्थो व्याख्यायते[1]। प्रयोगस्त्वस्य न लभ्यतेऽर्जुनरावणीयादिषूदाहरणकाव्येष्वपि। द्व्याश्रयकाव्ये अशफोरूरिति प्रयुक्तम्[2] तत्र टीकाकृता—अनिन्दितोरूरित्यर्थापितम्[3]। एवं तन्मतेन शफोरूरित्यस्य शफवदश्रीलोरूवतीत्यर्थो भवति।

लक्षणोरूः—

लक्षणशब्दोऽत्रार्शआद्यजन्तः[4] लक्षणवल्लक्षणम् इति। लक्षणवन्तावूरू यस्याः सा लक्षणोरूः। लक्षणं चेह सामुद्रिकशास्त्रोक्तं शुभाशुभसूचकं स्यात्। इह स्त्रीप्रत्ययविधौ तदन्तविधिरपि भवतीति[5] सुलक्षणोरूः, कुलक्षणोरूः इत्याद्याः प्रयोगा अप्युन्नेयाः।

लक्षणोरूरिति प्रयोगोऽपि रावणवध—रावणार्जुनीयादिषूदाहरण काव्येषु न दृश्यते।

केचिद् आर्हता आचार्यास्तु स्वशब्दानुशासने लक्षणशब्दस्य स्थाने लक्ष्मणशब्दं पठन्ति[6]। तेषां लक्ष्मणोरूरित्युदाहरणं भवति। तच्च लक्ष्मणौ लक्ष्मीवन्तौ श्रीसम्पन्नौ कान्तावूरू यस्याः लक्ष्मणोरूरित्येवं व्याख्यायते।[7]

---

1. सि० कौ०, स्त्रीप्रत्ययप्रकरणम्, पृ० 51, निर्णय०। श० कौ० 4.1.70,
2. द्व्या० (प्रथमभागः) 4.82
3. द्व्या० (प्रथमभागः) 4.82, पृ० 353,
4. अर्शआदिभ्योऽच्। अष्टा० 5.2.127,
5. भट्टोजिदीक्षितः "अनुपसर्जनात्" (अष्टा० 4.1.14) इत्यात्राह- अधिकारोऽयं यूनस्तिरित्यभिव्याप्य। अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।
   सि० कौ०, स्त्रीप्रत्ययप्रकरणम्, पृ० 45, निर्णय०।
6. "सहसफसहितसंहितलक्ष्मणवामादेश्च"। इति पाल्यकीर्तिश्शाकटायनः। शाक0 व्या० 1.3.73,
   "उपमान-सहितसंहितसहशफवामलक्ष्मणाद्यूरोः" इति हेमचन्द्राचार्यः। सिद्ध० शब्दा० 2.4.75,
   "सहशफसहितसंहितलक्ष्मणवामादेः" इत्याचार्यमलयगिरिः।
   मलय० शब्दा० नाम्नि पञ्चमपादः, सूत्रसङ्ख्या-69,
7. "लक्ष्मणौ श्रीमन्तावूरू यस्याः"।
   द्र० -द्व्या० (सटीकम्) प्रथमभाग, 4.82, पृ० 352,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वामोरू

वामशब्दः शोभनपर्यायः। वामौ सुन्दरावूरू यस्याः सा स्त्री वामोरूः। उदाहरणपदञ्चेदं बहुशः प्रयुक्तं दृश्यते काव्यग्रन्थेषु। तद्यथा शिशुपालवधे–

"वामोरूरतिशयमाप विभ्रमस्य"[1] इति।

नैषधे च–

"ध्वान्तस्य वामोरु! विचारणायाम्"[2] इति।

प्रकृतसूत्रे काशिकायामुपसङ्ख्यानं पठ्यते–

"सहितसहाभ्याञ्चेति वक्तव्यम्"[3] इति।

भाष्येऽपीदं पठितम्[4]। इह सहितोरूः, सहोरूः इत्युदाहरणे भवतः। संहितशब्दस्य "समो हिततत्तयोर्वा लोपः"[5] इति पक्षे मलोपे कृते एकदेशविकृतः सहितशब्दः। एतन्मनसिकृत्य कैय्यट आह–"नन्वेकदेशविकृतस्यानन्यत्वात् संहितशब्दग्रहणेन सहितशब्दस्य सिद्धं ग्रहणम्। एवं तर्हि विद्यमानं हितमस्य सहितम् इति यदा व्युत्पत्तिस्तदर्थकं वार्त्तिकम्।[6] एवमिह कैय्यटस्य मतेन हितेन सह वर्त्तमानौ–ऊरू यस्याः सा सहितोरूरित्यर्थः। कैय्यटनिर्दिष्टोऽयमेवार्थो भट्टोजिदीक्षित[7]–नागेशभट्ट[8]-प्रभृतिभिर्विद्वद्भिरप्युपात्तः।

अथ सहोरूरित्यस्याप्यर्थः कैय्यटस्य मतेनेत्थं भवति–सहेते–इति सहौ। सहौ ऊरू यस्याः सा सहोरूरिति[9]। अपरोऽप्यस्यार्थस्तन्मतेनैवं भवति-सहशब्दो

---

1. शिशु० 8.24,
2. नैष० 22.35,
3. काशिका 4.1.70,
4. म० भा० 4.1.70, हर०।
5. म० भा० 6.1.144,
6. प्रदीपः 4.1.70,
7. श०कौ० 4.1.70,
   सि० कौ०, स्त्रीप्रत्ययप्रकरणम्, पृ० 51, निर्णय०।
8. बृहच्छब्दे० (प्रथमखण्डः) स्त्रीप्रत्ययप्रकरणम्, पृ० 779, उद्योतः 4.1.70,
9. प्रदीपः 4.1.70,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विद्यमानवचनोऽपि, तेन विद्यमानावूरू यस्याः सा सहोरूः। सर्वस्या अपि ऊरुसद्भावाच्च प्रकर्षगतिरिह विज्ञास्यते। तेन ऊर्वतिशयप्रतिपत्तिर्भवतीति[1]। भट्टोजि-[2]नागोजिभ्यामपि[3] कैय्यटोक्तमेवेदमङ्गीक्रियते। नागेशश्चेह सहौ-ऊरू यस्या सा सहोरूरिति कैय्यटोक्तेः रतिश्रमसहाविति भावं प्रतिपादयति।[4]

अथैतस्मिन् व्याख्याने सत्यपि मम त्वेषोऽर्थ इह युक्ततरः प्रतिभाति—सह हितौ निहितौ सहितौ = सन्निहितौ ऊरू यस्या सा सहितोरूः। अथ सर्वस्या अपि सहितौ = सन्निहितावूरू भवत इति प्रयोगस्यानर्थक्यापत्तेः प्रकर्षगतिरिह विज्ञायते—मांसलत्वाद् अतिशयेन सहितौ सन्निहितौ सन्निधिं गतौ संश्लिष्टौ ऊरू यस्याः सा सहितोरूरिति। यच्चोक्तम् "एकदेशविकृतस्यानन्यत्वाद् संहितशब्दस्य ग्रहणेन सहितशब्दस्यापि सिद्धं ग्रहणमिति तत्र ब्रूमः—सुकुमारमतीनां स्पष्टप्रतिपत्यर्थमिदं सङ्गृहीतम् इति। तद्यथा चन्द्राचार्येण स्पष्टप्रतिपत्यर्थमेव संहितसहितेति द्वावपि शब्दौ सूत्रे[5] पठितौ। न च तत्र स्वोपज्ञवृत्तौ कश्चिद् विशेषो निर्दिष्टः[6] चन्द्राचार्यवदेव हेमचन्द्र[7]-पाल्यकीर्तिशाकटायन[8]-मलयगिरिप्रभृतय[9] आचार्याः सूत्रयन्ति सुकुमारमतीनां प्रतिपत्तिगौरवं परिहरन्तः। तद्वदिहापि बोध्यम्।

एवं सहोरूरित्यस्याप्ययमेवार्थः। सह मिलितौ मांसलत्वादतिशयेन सहभावं प्राप्तौ परस्परसंश्लिष्टौ ऊरू यस्याः सा सहोरूरिति। इत्थमनयोर्द्वयोरप्युदाहरणयोरयमेक एवार्थो ममात्र युक्ततरः प्रतीयते।

---

1. प्रदीपः 4.1.70,
2. श० कौ० 4.1.70,
   सि० कौ स्त्रीप्रत्ययप्रकरणम्, पृ० 779,
3. बृहच्छब्दे० (प्रथमखण्डः) स्त्रीप्रत्ययप्रकरणम् 1, पृ० 780,
4. उद्योतः 4.1.70,
5. ऊरोरुपमानसंहितसहितसहशफवामलक्षणादेः चान्द्र० 2.3.79, पृ० 241,
6. द्र०-चान्द्र० 2.3.79, पृ० 241,
7. "उपमानसंहितसहितसहलक्ष्मणवामादेः"। सिद्ध० शब्दा० 2.4.75,
8. "सहसफलसहितसंहितलक्ष्मणवामादेश्च"। शाक० व्या० 1.3.73,
9. "सहशफसहितसंहितलक्ष्मणवामादेः"। मलय० शब्दा०, नाम्नि पञ्चमः पादः, सूत्रसङ्ख्या 69,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्-ग्रामजनबन्धुसहायेभ्यस्तल्। (4.2.43)

तस्य समूह इत्यर्थे तल्। स्वभावात् स्त्रीत्वम्। ग्रामाणां समूहो ग्रामता। इत्थं जनता बन्धुता सहायता चेति। मनुस्मृतेर्मेधातिथिभाष्ये समुद्धृत एकस्मिन् पद्येऽस्य सूत्रस्योदाहरणानां हृद्यः प्रयोगो दृश्यते—

ग्रामता जनता चैव बन्धुता च सहायता।
महेन्द्रस्याप्यगम्यासौ भूमिभागभुजां कुतः ॥[1] इति।

सूत्रम्-दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। (4.3.56)

एभ्यः "तत्र भवः" इत्येतस्मिन् विषये ढञ्। आस्तेयम् इत्युदाहरणस्यार्थो विमृश्यते। इह अस्तिशब्दः प्रातिपदिकम्, न तु तिङन्त इति वृत्तिकारः[2]। एतद्धि तिङन्तप्रतिरूपकं निपातसञ्ज्ञकं प्रातिपदिकम् इति भावः। तदेतद् अस्तिना तिङन्तेन समानार्थम्। यथा—अस्तिक्षीरा गौरिति। विद्यमानक्षीरेत्यर्थः।

---

1. मनु० (मेधातिथिभाष्योपेता) 2.38, मनुसुखरायमोरसम्पादितं संस्करणम्।
2. काशिका 4.3.56,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धनवचनञ्च यथा अस्तिमान् इति। धनवान् इति गम्यते। इह खलु विशेषस्यानभिधानाद् द्वयोरपि ग्रहणम् इति न्यासकारहरदत्तौ[1]। अस्तिभवम् आस्तेयम् विद्यमाने धने च भवम् इत्यर्थः।

प्रक्रियासर्वस्वकृता अस्तिशब्दस्य धनवचनतां प्रदर्श्य–"आस्तेयो मदः" इति शोभनः प्रयोगः कृतः[2]। एतदेव च मत्वा व्याकरणचन्द्रोदयकारेण "बहुला ह्यास्तेया दोषा भवन्ति" इति प्रयुक्तम्[3]। विद्यमाने भवम् इत्यस्मिन्नर्थे त्वस्य प्रयोगो मृग्यः।

रावणवध–रावणार्जुनीयादिषूदाहरणकाव्यषूदाहरणमिदं प्रयुक्तं न दृश्यते।

सूत्रम्–प्राग्वहतेष्ठक्। (4.4.1)

अत्र वार्त्तिकानि–

1. ठक्प्रकरणे माशब्दादिभ्य उपसङ्ख्यानम्।

माशब्दिकः, नैत्यशब्दिकः कार्यशब्दिक इत्युदाहरणानि। वाक्यादेतत् प्रत्ययविधानम्। मा शब्द इत्याह माशब्दिकः। शब्दो मा कारीत्यर्थः। इह वृत्तौ करोतिक्रियाऽन्तर्भूता वर्त्तते। शब्दो मा कारीत्येवं य आह स मा-शाब्दिक इत्युच्यते। वाक्यादिह प्रत्ययविधानादयमर्थो लभ्यते। कैय्यट[4]-नागेश[5]-हरदत्तमिश्र[6]-जिनेन्द्रबुद्धि[7]-प्रभृतिभिराचार्यैरयमर्थ इत्थमेव प्रतिपाद्यते। वाक्यादिह प्रत्ययविधानादयमर्थो लभ्यते।

---

1. न्यासः 4.3.56,
   पद० 4.3.56,
2. प्र० सर्व० तद्धितखण्डः, तृतीयो भागः, पृ० 82,
3. व्या० चन्द्रो०, तद्धितप्रकरणम्, खण्डः 2, पृ० 316,
4. प्रदीपः 4.4.1,
5. उद्योतः 4.4.1,
6. पद० 4.4.1,
7. न्यासः 4.4.1

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गणरत्नमहोदधिकारो वर्धमानसूरिस्तु "मा कृथाः पापमनाचारं वेति ब्रुवाणो माशब्दिकः[1]" इत्येवमेनदर्थापयति। अस्य भाव एवं गम्यते-माशब्दम् आह माशब्दिकः। मा चासौ शब्दश्च माशब्दस्तमाहेति। यो मा इति निषेधार्थं शब्दमुच्चारयति मा कृथा पापमनाचारं वेति उद्दिश्य स माशब्दिक इति। अयमर्थश्च माशब्द इति प्रातिपदिकात् प्रत्ययविधाने सति लभ्यते, माशब्दमाहेति। इह च वाक्यात् प्रत्ययविधानं न तु शब्दाद् इत्युक्तम्। एतच्च "आहौ प्रभूतादिभ्यः[2]" इत्युत्तरवार्त्तिकारम्भाल्लभ्यते। अन्यथा प्रभूतादीनां माशब्दादित्वेनैव सिद्धे पुनर्वचनम् अनर्थकं स्यात्। वाक्यात् प्रत्ययविधाने च मा शब्द इत्याह = मा शब्दः कारीत्याहेत्ययमेवार्थो भवति। एवं स्थिते वर्धमानप्रदर्शितोऽर्थस्तु कैय्यट-नागेश-हरदत्तादीनां व्याख्यानाद् विभिद्यते।

यद्यपि सूरिः माशब्दादिव्याख्यानान्ते स्वयमेवाह—"माशब्दादिभ्यो वाक्यात् प्रत्ययविधानम्[3] इति। परं वाक्यात् प्रत्ययविधाने सति तु मा शब्द इत्याह = मा शब्दः कारीत्याहेत्यर्थो लभ्यते। यत्तु मा कृथाः पापमनाचारं वेति माशब्दं ब्रुवाणो माशब्दिक इत्येतत् प्रतिपादनं तद्विप्रतिषिद्धमिवापतति।

अथेहान्येष्वपि ग्रन्थेषु शाकटायनव्याकरणचिन्तामणिवृत्ति[4]-शब्द-कौस्तुभ[5] सिद्धान्तकौमुदी[6]-प्रक्रियासर्वस्व[7]-व्याकरणदीपिका[8]-व्याकरणचन्द्रोदयप्रभृतिषु[9] स एव वृत्तिकार-निर्दिष्टः कैय्यटादिसम्मतः पूर्वप्रतिपादितोऽर्थो व्याख्यायते न तु वर्धमानोक्त इति। इत्थमिह सूरिप्रदर्शितोऽर्थः सम्प्रदायेन हेतुना च नानुमोदितो भवति। परं त्रिकाण्डशेषकोषे तु सूरिसम्मत एवार्थः प्रतिपाद्यते। तत्र हि

---

1. गण० म० श्लो० 374, तद्धितगणाध्यायः, पृ० 212,
2. काशिका 4.4.1, म० भा० 4.4.1,
3. गण० म०, श्लो० 374, तद्धितगणाध्यायः, पृ० 212,
4. शाक० चिन्ता० 3.2.46, पृ० 368,
5. श० कौ० 4.4.1,
6. सि० कौ०, तद्धितप्रकरणम्, पृ० 132, निर्णय0।
7. प्र० सर्व० तद्धितखण्डः, तृतीयभागः, पृ० 104,
8. व्या० दी० 4.4.1
9. व्या० चन्द्रो० तद्धितप्रकरणम्, द्वितीयखण्डः, पृ० 340,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कोषकृता निषेधकेऽर्थे माशब्दिक इति पठ्यते[1]। यो हि किञ्चिन्निषेद्धुं माशब्दमुच्चारयति स निषेद्धा माशब्दिक इति। अथानेन कोषकृता पुरुषोत्तमदेवेन स्वभाषावृत्तावप्येतदेव प्रतिपादितम्[2]। तत्रायम् "आहौ प्रभूतादिभ्यः" इत्युत्तरवार्त्तिकं न पठति, माशब्दादित्वेनैव च प्रभूतादीनपि व्याचष्टे[3]। एवं सम्प्रदायाद् भिद्यमानमस्येदं व्याख्यानं खलु विचारणीयं भवति।

2. आहौ प्रभूतादिभ्यः।

प्रभूतमाह प्राभूतिकः। इह क्रियाविशेषणात् प्रत्ययविधानम्। प्रभूतं भवतां धनधान्यादिकमभीष्टं स्यादिति प्रियाशिषं वदन्नेवमुच्यते। एवं पर्याप्तमाह पार्याप्तिक इति। व्याकरणचन्द्रोदयकारस्त्विहान्यथैवार्थं प्रतिपादयति-प्रभूतं (यथा स्यात् तथा) आह—प्राभूतिकः, यः पर्याप्तं भाषते स इति[5]। तदिदं विचारणीयम्। इह क्रियाविशेषणात् प्रत्यय इति मनसिकृत्य ग्रन्थकारः प्रभूतशब्दम् "आह" इत्यस्या एव क्रियाया विशेषणत्वेनाभ्युपगम्यैतत्प्रतिपादयति। वस्तुतस्तु "आह" इत्यर्थनिर्देशः क्रियारूपः। आह इत्यस्मिन्नर्थे प्रभूतादिभ्यष्ठग् भवति, यदि तानि क्रियाविशेषणानि भवन्ति। इत्थमाहार्थे प्रभूतादीनां काचिदन्या क्रिया विशेष्यत्वेनाश्रीयते। तस्यां हि प्रभूतादिविशेषणानां विशेष्यभूतायां सत्याम् आहेत्यर्थे एभ्यष्ठग् विधीयते। प्रभूतं ते स्याद् (धनधान्यादिकमभीष्टम्) इति य आह = कथयति स प्राभूतिक इत्युच्यते। इह स्याद् इत्याशीर्वचनक्रियाया विशेषणं प्रभूतपदम्। तत आहार्थे प्रत्ययविधानम्। यदा तु सम्भिन्नबुद्ध्या आह इत्यर्थनिर्देशरूपायाः क्रियाया एव विशेषणं प्रभूतपदं मन्यते तदाऽसावनिष्टोऽर्थ आपतति। स त्विह प्रतिपाद्यमानो नैवोचित्यमञ्चति।

---

1. "माशब्दिकः प्रतिषेद्धा"।
   त्रिकाण्ड०, तृतीयकाण्डम्, वर्गः। पृ० 84,
2. द्र० - भाषा० 4.4.1,
3. द्र० - भाषा० 4.4.1,
4. द्र०-गण० म०, तद्धितगणाध्यायः, श्लोकः 374, पृ० 212,
5. प्रभूतं (यथा स्यात् तथा) आह—प्राभूतिकः, जो बहुत बोलता है। पर्याप्तमाह = पार्याप्तिकः, जो पर्याप्त बोलता है। व्या० चन्द्रो०, तद्धितप्रकरणम्, द्वितीयखण्डः, पृ० 340,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

3. पृच्छतौ सुस्नातादिभ्यः ।

सौस्नातिकः –

सुस्नातं पृच्छति सौस्नातिकः । सुस्नातं भवता सुस्नातो भवानित्येवं वा यः पृच्छति स सौस्नातिक इत्युच्यते । तथा च कालिदासीयप्रयोगः –

विन्ध्यस्य संस्तम्भयिता महाद्रेर्निश्शेषपीतोज्झितसिन्धुराजः ।
प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥[1]

सौखरात्रिकः –

एवं सुखरात्रिं पृच्छति सौखरात्रिकः । अपि सुखं व्यतीता रात्रिः ? इत्येवं प्रातः प्रबुद्धं यः पृच्छति स एवमुच्यते ।

सौखशायनिकः –

सुखशयनं पृच्छतीति सौखशायनिकः[2] । अपि सुखं शयितं भवता ? इत्येवं यः सुखशयनं पृच्छति सुप्तोत्थितं जनं स एवमुच्यते । तथा च कालिदासेन प्रयुज्यते–

योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥[3]

राजानः प्रायेणैवं सुस्नाततां सुखरात्रिं सुखशयनं च पृच्छ्यन्ते स्म । तत्र प्रच्छकानामेतान्यभिधानानि बभूवुः ।[4]

4. गच्छतौ परदारादिभ्यः ।

पारदारिकः –

परदारान् गच्छति पारदारिकः । परस्त्रीगमनं यः करोति स एवमुच्यते । तथा च प्रयोगाः –

---

1. रघु० 6.61,
2. अनुशतिकादीनां च (अष्टा० 7.3.20) इत्युभयपदवृद्धिः ।
3. रघु० 10.14,
3. द्र० - पाणि० भार० अ० 7, परि० 1, 393,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महाभारते–

तत्र माहिष्मतीवासे भगवान् हव्यवाहनः।
श्रूयते हि गृहीतो वै पुरस्तात् पारदारिकः ॥[1]

याज्ञवल्क्यस्मृतौ–

पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः।[2]

नैषधे–

"पारदारिकविलाससाहसं, देवभर्त्तुरुदटङ्कि भित्तिषु"[3]। इति ॥

गौरुतल्पिकः –

गुरुतल्पं गच्छति गौरुतल्पिकः। तल्पशब्देनेह भार्याऽभिधीयते। तथा चामरः–"तल्पं शय्याट्टदारेषु"[4] इति। अस्य प्रयोगस्तु मृग्योऽस्ति।

सूत्रम्-नौद्व्यचष्ठन्। (4.4.7)

तरत्यर्थे प्रत्ययविधानम्। इह बाहुक इत्युदाहरणमपि पठ्यते। बाहुभ्यां यस्तरति स बाहुक इत्युच्यते। बौधायनधर्मसूत्रेऽस्यं प्रयोगो दृश्यते–

"न नदीं बाहुकस्तरेत्[5]" इति।

---

1. म० भार० 2.31.25,
2. याज्ञ० 2.294,
3. नैष० 18.21,
4. अमर० 3.3.131,
5. बौधा० 2.3.26,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–उरसोऽण् च। (4.4.94)

उरश्शब्दोऽत्र हृदयवाचकः। यथा हि उरसिकृत्य मनसिकृत्य इत्यत्र वर्त्तते। उरसा हृदयेन निर्मित औरस पुत्रः, उरस्यः पुत्रः। तथा च श्रुतिः –

अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्॥[1]

प्रक्रिया-सर्वस्वकारस्य मतेनेह उरः-शब्द आत्मार्थः[2]। उरसा = आत्मना निर्मित इति तदभिप्रेतोऽर्थः।

---

1. निरुक्तम्, अध्यायः 3, पादः 1,
2. आत्मार्थादुरसो निर्मितेऽण् यच्च। प्र० सर्व० तद्धितखण्डः, तृतीयभागः पृ० 119,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षष्ठोऽध्यायः

काशिकावृत्ति-पञ्चमाध्यायगत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च ।

सूत्रम्–आत्मन्विश्वजनभोगोत्तरपदात् खः । (5.1.9)

इह भोगोत्तरपदान्युदाहरणानि—मातृभोगीणः, पितृभोगीणः आचार्यभोगीनः[1] इति। उदाहरणार्थं स्पष्टयन् स्वयमेवाह वृत्तिकारः – भोगशब्दः शरीरवाची इति[2]। तेन मातृशरीराय हितः पदार्थो मातृभोगीण इत्यर्थो भवति। एवं पितृभोगाय हितः पितृभोगीण इत्यादि। भट्टिकाव्ये खलु भोगोत्तरपदस्योदाहरणस्य प्रयोगो दृश्यते–

सौमित्रे मामुपायंस्थाः कम्रामिच्छुर्वशंवदाम्।
स्वभोगीनां सहचरीमशङ्कः पुरुषायुषम्॥[3]

स्वशरीराय हितामित्यर्थः। अन्यच्च–

अमितम्पचमीशानं सर्वभोगीणमुत्तमम्।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि॥[4]

---

1. "आचार्यादणत्वं च" (काशिका 5.1.9) इति णत्वाभावः।
2. काशिका 5.1.9,
भोगशब्दः शरीरवाचीति महाभाष्ये "अहिरिव भोगैःपर्येति बाहुम्" (ऋग्० 6.75.14, यजुः० 29.51) इति मन्त्रप्रमाणेन प्रतिपादितम्–"अहिरिव शरीरैरिति गम्यते" इति।
द्र०— म० भा० 5.1.9,
3. भट्टि० 4.20,
4. भट्टि० 6.98,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्जुनरावणीये च–

जयं स्वभोगीनमपेक्षमाणो रणं दशास्योऽकृत लुब्धबुद्धिः ।
तमर्जुनो विश्वजनीनमेकः परोपकारैकपरा हि सन्तः ॥[1]

इह भोगशब्दः शरीरवाची इत्युक्तम्। कोशकारास्तु भोगशब्दं सर्पशरीरपर्यायं पठन्ति,[2] स कथमिह मनुष्यशरीरवाची स्यादित्यत्र कैय्यटोपाध्यायस्य स्पष्टीकरणं सविशेषं ध्यातव्यमस्ति–"केचिदाहुः–भुजङ्गाङ्गमेव = (भुजङ्गशरीरमेव) भोगशब्देनोच्यते, न तु सर्वं शरीरमिति। तदयुक्तम्, अनन्तत्वात् प्रयोगविषयस्यावधारणस्य कर्त्तुमशक्यत्वात्"[3]। भाष्यप्रामाण्यात् कोशः प्रसिद्धतरार्थविषंय इति भावः।

अत्र वार्त्तिकम्–

पञ्चजनादुपसङ्ख्यानम्।

पञ्चजनीनम् इति। अत्रापि कर्मधारयादिष्यते[4]। पञ्च च ते जना पञ्चजनाः, तेभ्यो हितं पञ्चजनीनम् इति। पञ्चजना मनुष्या उच्यन्ते, चत्वारो वर्णा रथकारपञ्चमाः"[5] इति कैय्यटः। एतदेव हरदत्तोऽनुवदति[5]। हेमचन्द्राचार्येणापि पञ्चजनशब्दो मनुष्यपर्यायो निर्दिश्यते[6]।

ऋग्वेदे खलु–

---

1. अर्जुन० 16.4,
"भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः।
अमर० 3.3.23,
भोगो राज्ये धने सौख्ये पालनाभ्यवहारयोः।
फणे देहे च सर्पस्य वेश्यादीनां भृतावपि॥
वैज० 6.1.44,
2. प्रदीपः 5.1.9,
3. काशिका० 5.1.9,
4. प्रदीपः 5.1.9,
5. पद० 5.1.9,
6. "मर्त्यः पञ्चजनो भूस्पृक् पुरुषः पूरुषो नरः"।
अभि० 3.320,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"पञ्चजना मम होत्रं जुषध्वम्"[1] ।

इति पठ्यते। अत्र यास्काचार्य आह–"गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके। चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः"[2] इति। एवम् एतेभ्यो हितं पञ्चजनीनम् इत्युदाहरणार्थो व्याख्यातो भवति।

भाषावृत्तिकारस्त्वत्र–

"गायनवादकनर्त्तकदासीभण्डरतः खलु पञ्चजनीनः"[3] ।

इति क्वाचित्कं वचनमुदाहरणमर्थापयितुम् उपस्थापयति। भण्डः = लोकभाषायां भाँण्ड इति ख्यातः। पञ्चसु गायनवादकनर्त्तकदासीभण्डेषु यो रतः व्यापृतः स पञ्चजनीन इति भावः। हलायुधकोषेऽपि अस्योदाहरणपदस्यायमेवार्थो निर्दिष्टः[4]। अत्रार्थे तु मूलं खलु मृग्यम्। "तस्मै हितम्"[5] इत्येतस्मिन् विषये ख विधानात्।

सूत्रम्–सर्वपुरुषाभ्यां णढञौ। (5.1.10)

अत्र वार्त्तिकम्–

पुरुषाद् वधविकारसमूहतेनकृतेष्वति वक्तव्यम्।

पौरुषेयो वधः, विकारः, समूहो वा, तेन कृतः पौरुषेयो ग्रन्थ इति वृत्तिः[6]। पुरुषाद् वधविकारसमूहतेनकृतेष्वति वक्तव्यम्[7] इति वचनं भाष्यकारस्यास्ति।

---

1. ऋग्० 10.53.4,
2. निरुक्तम् 3.2.7;
3. भाषा० 5.1.9,
4. "असौ पञ्चजनीनः स्याद्यो भण्डादिरतो जनः"।
   हला० 368,
5. अष्टा० 5.1.5,
6. काशिका० 5.1.10,
7. म० भा० 5.1.10,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कात्यायनेन त्विह "पुरुषाद् वधे"[1] इत्येव व्रार्त्तिकं पठितम्। भाष्यकारेण तस्य परिवर्धनं कृतम्। वृत्तिकारेण च भाष्यकृद्वचनमेवात्र गृहीतम्। प्रक्रियासर्वस्वे त्वस्य भूयोऽपि परिवर्धनं दृश्यते। तत्र हीदम्—

"पुरुषाद्धितवधविकारावयवसमूहतेनकृतेषु ढञ् वाच्यः"[2]।

इत्येवं पठ्यते।

प्रक्रियासर्वस्वकारेण अधस्तने पद्ये सर्वेष्वेतेष्वर्थेषु मनोहारी प्रयोगो दर्शितः —

नो पौरुषेयमयमिच्छति पौरुषेये
सक्तो वधे पिशितमत्ति च पौरुषेयम्।
द्राक् पौरुषेयगलभिन्न च पौरुषेयै-
र्जय्यो विनिन्दति च वाचमपौरुषेयीम्[3]

अस्मिन् पद्ये क्रमेण हितवधविकारावयवसमूहतेनकृतेषु अर्थेषु ढञन्तः पौरुषेयशब्दः प्रयुक्तोऽस्तीति स्फुटम्।

अन्यत्राप्येष्वर्थेषु प्रयोगा दृश्यन्ते। तद्यथा समूहे माघस्य—

रत्नस्तम्भेषु सङ्क्रान्तप्रतिमास्ते चकाशिरे।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥[4]

अस्मिन्नेवार्थे भूमभट्टस्यापि—

"आरोहतेभं हतपौरुषेयम्"[5]।

रणाजिरे हतः पौरुषेयः पुरुषाणां समूहो येन तमिभमारोहतेत्यर्थः। तेन कृतमित्यर्थे चापि—

"भिन्नाः शरैः सम्प्रति पौरुषेयै रक्तोक्षिता नीलशरीरभासः"।
निशाचरा भान्ति पुरातपेन सान्ध्येन पृक्ता इव वारिवाहाः ॥[6]

---

1. म० भा० 5.1.10,
2. प्र० सर्व०, तृतीयभागः, तद्धितखण्डः, पृ०-124,
3. प्र० सर्व०, तृतीयभागः, तद्धितखण्डः, पृ० 124,
4. शिशु० 2.4,
5. अर्जुन० 16.10,
6. अर्जुन० 16.6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरुषैः कृताः पौरुषेयास्तैः शरैर्भिन्ना इत्यग्र्येणान्वयः तथा च "अपौरुषेया वै वेदाः" इति प्रसिद्धमेव, न हि पुरुषेण मनुष्येण कृता इत्यर्थः।

सूत्रम्-माणवचरकाभ्यां खञ्। (5.1.11)

इह माणवीनं चारकीणम् इत्युदाहरणद्वयम्। तस्मै हितम् इत्यर्थे प्रत्ययविधानम्। वासुदेवशरण-अग्रवालमहोदयेन सुविशदं प्रतिपादितं यत् पाणिनिकाले छात्रास्त्रिविधा अभवन्—माणवाः, अन्तेवासिनः चरकाश्चेति। तत्र माणवाः प्राथमकल्पिकाश्छात्राः, अन्तेवासिनस्ततो वरिष्ठाः कृतोपनयना गुरुसन्निधावधीयानाः, चरकाश्च आचार्यकुलात् समावृत्ता विद्याविशेषान्वेषणे भ्रमणपरायणा इति[1]। एतेषु द्वयोरिह ग्रहणम्। माणवाख्याय छात्राय हितं माणवीनम्। चरकाय हितं चारकीणम् इति।

व्याकरणचन्द्रोदयकारेण माणवाय हितं व्याकरणाध्ययनं माणवीनम् इति प्रयुज्यते[2]। इह प्रक्रियासर्वस्वकृता चरका भिषज इत्युक्तम्[3]। तन्मतेन चरकाय भिषजे हितं चारकीणम् इत्यर्थो भवति। व्याकरणचन्द्रोदयेऽप्येतन्मतमनूद्यते नामग्राहम्। तथा चायं प्रयोगः प्रदर्श्यते—"चरकेभ्यो हितो रोगविसर्पः = चारकीणः"[4] इति।

भट्टिकाव्य-सुभद्राहरण-वासुदेवविजयादिषूदाहरणकाव्येष्वनयोः प्रयोगो न दृश्यते। अर्जुनरावणीयमहाकाव्ये माणवीनम् इति प्रयोगो लभ्यते। तत्र त्वेष

---

1. द्र०-पाणि० भार०, पृ० 95, 272, 296-97, द्वितीयसंस्करणम्, 1969 ई०।
2. व्या० चन्द्रो०, तद्धितप्रकरणम्, द्वितीयखण्डः, पृ० 368,
3. प्र० सर्व०, तद्धितखण्डः, तृतीयभागः, पृ० 124,
4. व्या० चन्द्रो०, तद्धितप्रकरणम्, द्वितीयखण्डः, पृ० 368,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रयोगो माणवाय = (मनोरपत्याय) मानवाय[1] हितम् इत्यस्मिन्नर्थे कृत इति गम्यते तत्रत्यप्रसङ्गात् श्लोकपदस्वारस्याच्च। तथा हि प्रयोगः —

अमाणवीनानि समाचरन्तस्तदात्मनीनानि च रावणीयाः।
स्वभर्तृपिण्डप्रतिनिष्क्रयाय प्राणांस्तृणीयन्ति रणे स्म योधाः॥[2]

एकतो रावणस्य राक्षसी सेना, अपरतोऽर्जुनस्य मानुषी सेना। तत्र रावणीया राक्षसा आत्मनीनानि आत्मनां रक्षसां हितानि, अर्जुनसैनिकानां मानवानां चाहितानि अमाणवीयानि समाचारन्त इत्यर्थोऽत्र ज्ञायते।

सूत्रम् –शीर्षच्छेदाद्यच्च। (5.1.65)

यति सति शीर्षच्छेद्य इत्युदाहरणम्। शिरश्छेदं नित्यमर्हतीत्यर्थः। भवभूतिना चैतत् प्रयुक्तम् *उत्तररामचरिते*—

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम्॥[3]

रघुवंशेऽपि अस्मिन्नेव प्रसङ्गे—

तपस्यनधिकारित्वात् प्रजानां तमघावहम्।
शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रमाददे॥[4]

---

1. यद्यपि मनोरपत्ये कुत्सिते मूढे एव णत्वं भवति—
अपत्ये कुत्सिते मूढे मनोरौत्सर्गिको मतः।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः॥ (काशिका 4.1.161)
तथापि प्रस्तूयमाने इह पद्ये प्रसङ्गबलाद् माणव इत्यस्य मानव इत्यर्थः प्रतीयते अत उच्यते मानवायेति।
2. अर्जुन० 16.3,
3. उत्तर० 2.8,
4. रघु० 15.51,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्-स्थालीबिलात्। (5.1.70)

स्थालीबिलीयास्तण्डुलाः, स्थालीबिल्यास्तण्डुला इति द्वयम् उदाहरणम्। पाकपात्रं स्थालीत्युच्यते[1]। स्थाल्या बिलं विवरं मुखं वा स्थालीबिलम्। तदर्हन्तीति स्थालीबिलीया स्थालीबिल्या वा तण्डुलाः। पाकयोग्या इत्यर्थः। पाकार्थं ये सज्जीकृताः शोधितास्ते तण्डुलाः स्थालीबिलनिक्षेपार्हा भवन्तीत्येवमुच्यन्ते[2]। एवम् अन्यद् अपि यद् धान्यं पाकाय सज्जीकृतं शोधितं स्थालीबिलनिक्षेपार्हं भवति तदप्येवमुच्यते। तद्यथा स्थालीबिलीया स्थालीबिल्या वा मुद्गा माषा यवाश्चेति। अर्जुनरावणीयकाव्ये खल्वेतत्सूत्रोदाहरणस्य शोभनः प्रयोगो दृश्यते—

निशाचरान् खड्गविलूनकायान् कृतान्तवक्त्रं विशतो विशालम्।
तानैक्षत क्ष्माधिपतिः प्रहृष्टः स्थालीबिलीयानिव तण्डुलान् सः[3]॥ इति।

---

1. पिठरः स्थाल्यामुखा कुण्डम्। अमर० 2.9.31,
2. द्र० - पद० 5.1.70,
3. अर्जुन० 16.70,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–सम्पादिनि। (5.1.99)

गुणोत्कर्षः सम्पत्तिः[1]। आवश्यके णिनिः[2]। कर्णवेष्टकाभ्यां सम्पादि मुखं कार्णवेष्टकिकम्। कर्णवेष्टकाभ्यां विशेषतः शोभत इत्यर्थः। कर्णवेष्टकौ कर्णयोराभरणे कुण्डलाख्ये[3]। कर्णौ वेष्टयेते इति व्युत्पत्तेः[4]। अमरकोशे[5] वैजयन्तीकोषे[6] च कुण्डलपर्यायः "कर्णवेष्टनम्" इति शब्दः पठ्यते। तत्र कार्णवेष्टनिकम् इत्युदाहरणं स्यात्।

इह वृत्तौ द्वितीयमुदाहरणं वास्त्रयुगिकं शरीरम् इति। वस्त्रयुगेण सम्पादि विशेषतः शोभि शरीरमित्यर्थः। वस्त्रयुगम् = परिधानीयम् (अधोवस्त्रम्) उत्तरीयं चेति। वृत्तिगतं प्रथममुदाहरणं भट्टिकाव्ये सुभद्राहरणे च प्रयुक्तं दृश्यते–

"वपुश्चान्दनिकं यस्य कार्णवेष्टकिकं मुखम्"[7]। इति।

---

1. काशिका 5.1.99,
2. आवश्यकाधमर्ण्ययोर्णिनिः। अष्टा0 3.3.170,
3. ताटङ्कस्तु ताडपत्रं कुण्डलं कर्णवेष्टकः" इति हेमचन्द्राचार्यः, अभि॰ 3.320,
4. ण्वुल्तृचौ (अष्टा॰ 3.1.133) इति कर्त्तरि ण्वुल्।
5. "कुण्डलं कर्णवेष्टनम्"।
   अमर॰ 2.6.103,
6. "वालिका कर्णपृष्ठस्था कुण्डलं कर्णवेष्टनम्"।
   वैज॰ 4.3.135,
7. भट्टि॰ 4.25,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्य वपुश्चान्दनिकं चन्दनेन सम्पद्यते प्राप्तशोभं भवति, मुखं च कार्णवेष्टकिकम् = कर्णवेष्टकाभ्यां कर्णालङ्काराभ्याम् इति। सुभद्राहरणकारेण तु एतादृशान्यन्यान्यप्युदाहरणानि प्रयुक्तानि—

माणिमञ्जीरिकैर्मञ्जु शिञ्जानैः पादपल्लवैः ।
मेखलागुणिकैर्मध्यैरुरोजैर्हारयष्टिकैः ॥[1]
कार्णवेष्टकिकैः कर्णैर्नैष्किकैश्चारुभिर्गलैः ।[2]
तत्रालसन् सहाभीकैर्वालयिक्यं पुराङ्गनाः ॥[3]

सूत्रम्-**कर्मवेषाद्यत्।** (5.1.100)

कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत् प्रत्ययो विधीयते सम्पादिनि इत्येतस्मिन् विषये। अत्र वृत्तिकृदुदाहारति—कर्मणा सम्पद्यते कर्मण्यं शरीरम् वेषेण सम्पद्यते वेष्यो नट इति।

कर्मण्यं शरीरम्—

इह उदाहरणार्थं विशदयन् पदमञ्जरीकार आह—"कर्म = व्यायामः"[4] इति। सामान्येनात्र व्यायामः शरीरदार्ढ्याय क्रियमाणः चेष्टाविशेष[5] इति गम्यते।

---

1. सुभद्रा० 8.78,
2. निष्कोऽत्र उरोभूषणम्। तथा चामरः –
   साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री। 3.3.14,
   एतद्धि गले धारितमुरसि विलम्बत इति उरोभूषणमुक्तम्।
3. सुभद्रा० 8.79,
4. पद० 5.1.100,
5. शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी।
   देहव्यायामसङ्ख्याता मात्रया तां समाचरेत्॥
   चरक०, सूत्रस्थानम् 7.29,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्माद् कर्मणा = व्यायामेन सम्पादि शोभि (सुविभक्तगात्रत्वात्) कर्मण्यं शरीरम् इत्यर्थः प्रतीयते। परमिदमप्यत्र प्रतिभाति यद् व्यायाम इति न केवलं रूढिशब्द एव गृहीतः स्यात्, किन्तु "पृङ् व्यायामे"[1] इतिवत् यौगिकतया व्यापारमात्रं = कर्ममात्रमपि व्यायामः स्यात्, कार्यम् उद्योगः, पुरुषार्थ इति यावत्। तथा च "कर्मणा सम्पादि कर्मण्यं शौर्यम्"[2] इति सिद्धान्तकौमुदीगतमुदाहरणमपि व्याख्यातं भवति। भवन्ति चेत्थमन्येऽपि प्रयोगाः, तद्यथा ऋग्वेदे—

"सोमो वीरं कर्मण्यं ददाति"[3] । इति ।

यद्यपीह सायणाचार्येण कर्मण्यं कर्मसु साधुं कुशलम् इत्यर्थः कृतः "तत्र साधुः" इति यतं मत्वा[4] तथापीह "कर्मवेषाद्यत्" इति कर्मणा सम्पादिनं कर्मण्यं इत्येवमर्थोऽपि व्याख्यातुं सुशकः, उभयत्रापि समानस्वरत्वात्। भगवता दयानन्देन च "कर्मवेषाद्यत्" इति पुरस्कृत्यैवेदं व्याख्यातम्[5]। सङ्गच्छते चैतदिह व्याख्यायमानम् - कर्मण्यं = वीरोचितेनाचरितेन उद्योगेन पुरुषार्थेन वा सम्पादिनम् अवश्यं शोभिनं विभ्राजमानं वीरमिति यावत्। स हि कर्मणा वीरोचितचेष्टया उद्योगेन पुरुषार्थेन वा सम्पद्यते शोभते कर्मशूरत्वात्। लोकेऽपि यः खलु नैव कर्मणि शक्तो भवति, न हि पुरुषार्थमुद्योगं वानुतिष्ठति अकर्मण्योऽलसः किल स उच्यते, न हि स कर्मणा सम्पद्यते शोभते विभ्राजते, तत्राव्यापृतत्वाद् अशक्तत्वाद् वा।

अन्यत्र चापीदम् ऋग्वेदे प्रयुज्यते—

"यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः[6]" । इति ।

---

1. धातु०, तुदादिः 112, पृ० 39, (रामलालकपूरट्रस्टसंस्करणम्)
2. सि० कौ०, तद्धितठञधिकारप्रकरणम्।
3. ऋग्० 1.91.20,
4. "......कर्मण्यं लौकिककर्मसु कुशलम्। .... कर्मसु साधुः कर्मण्यः। "तत्र साधुः" (पा० सू० 4.4.98)
"ये चाभावकर्मणोः" (पा० सू० 6.4.168) इति प्रकृतिभावः।
"तित् स्वरितम्" (पा० सू० 6.1.179) इति स्वरितत्वम्।
ऋग्वेदसंहिता सायणभाष्यसमन्विता 1.11.20,
5. "सोमो वीरं विद्याशौर्यादिगुणोपेतं कर्मण्यं कर्मणा सम्पन्नम्"।
दयानन्दीयम् ऋग्वेदभाष्यम् (भागः 2) 1.9.20,
6. ऋग्० 3.4.9,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इहापि सायणाचार्येण "कर्मण्यः कर्मसु कुशलः"[1] इत्युक्तम् परं भगवता दयानन्देन तु – "कर्मण्यः यः कर्मणा सम्पद्यते सः[2] इत्येवं व्याख्यातम्। न चैतद् व्याख्यायमानमिह औचित्यपदात् प्रच्यवत इति निर्दिष्टपूर्वम्।

अथ रावणार्जुनीयप्रयोगः –

"कर्मण्यकाया गुरुकार्मुकास्ते सान्तापिकैर्बाणशतैस्तुदन्तः"[3]।

कर्मणा व्यायामेन युद्धाभ्यासश्रमेण वा सम्पादी कायो येषां ते—इत्यर्थोऽत्र गम्यते।

सुभद्राहरणकारेण चापि कर्म व्यायामः, कर्मणा सम्पादि कर्मण्यं शरीरमिति मत्वा प्रयोगः कृतः –

"स कर्मण्यवपुर्वेष्यो योषित्सान्तापिकीतनुः"[4]।

अत्राह काव्यकृत् स्वोपज्ञटीकायाम्—"कर्मणा व्यायामेन सम्पादि दृढं वपुर्यस्य सः"[5] इति। अथेह "कर्म = व्यायामः" इति हरदत्तवचनस्य यौगिकत्वेन योगरूढित्वेन चाप्यभ्युपगमे रावणार्जुनीये सुभद्राहरणे च प्रयुक्तमिदं सङ्गृहीतं जायते बहुप्रयोगव्यापि चेदं भवति, तेन पूर्वनिर्दिष्टाः ततोऽन्ये चापि प्रयोगा भवन्तीति दिक्।

वेष्यो नटः

"वेषः कृत्रिम आकारः"[6] वस्त्राभरणादिधारणाज्जायमान इति। तेन सम्पाद्यवश्यं शोभी वेष्यो नटः। वस्त्रमात्रधारणेनापि शरीरस्य या कृत्रिमा आकृतिर्जायते साऽपि वेष एवेति न केवलं नटे, सर्वत्रापि सुकरः प्रयोगः। यथा—वेषेण सम्पादी प्राप्तशोभः वेष्यो देवदत्तः, वेष्यो भूपतिरिति। नटो हि वासोभूषाजनितेन कृत्रिमाकारेण सविशेषं सम्पन्नो भवतीति प्रसिद्धार्थत्वाद् वृत्तिकृता तथोदाहृतम्। अथात्र सुभद्राहरणकारस्य प्रयोगः –

---

1. ऋग्वेदसंहिता सायणभाष्यसमन्विता 3.4.9,
2. ऋग्वेदभाष्यम् 3.4.9,
3. अर्जुन० 16.29,
4. सुभद्रा० 8.80,
5. सुभद्रा० 8.80,
6. पद० 5.1.100,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"स कर्मण्यवपुर्वेष्यो योषित्सान्तापिकीतनुः"[1] ।

वेष्यो वेषेण सम्पादी प्राप्तशोभः स इति स्फुटोऽर्थः । व्याकरणचन्द्रोदयकारेणापीदं प्रयुक्तम्—

"न खलु नटैरिव वेष्यत्वं कामनीयं विद्याकामैः कुमारैः"[2] इति ।

सूत्रम्–यथामुखसम्मुखस्य दर्शनः खः । (5.2.6)

"यथामुखशब्दात् सम्मुखशब्दात् षष्ठीसमर्थात् "दर्शनः" इत्येतस्मिन्नर्थे खः प्रत्ययो भवति । दृश्यतेऽस्मिन्निति दर्शनः[3] आदर्शादिः प्रतिबिम्बाश्रय उच्यते । निपातनात् सादृश्येऽव्ययीभावः । यथामुखं दर्शनः—यथामुखीनः । सर्वस्य मुखस्य दर्शनः सम्मुखीनः"[4] इति ।

यथामुखीनः

यथामुखीन आदर्शः, यथामुखीनं जलम् इत्याद्युदाहरणवाक्यं भवति । मुखस्य सदृशः यथामुखं प्रतिबिम्बः दृश्यतेऽस्मिन्नित्यर्थः । यादृशं मुखमस्ति तादृशमेवास्मिन् दृश्यत इति भावः । एतेन मुखसदृशः प्रतिबिम्बः यत्रादर्शादौ दृश्यते तदेवमुच्यते । इत्थं वृत्तौ योऽयमुदाहरणार्थो व्याख्यातः स भाष्यस्याप्यनुकूलः,[5] एष एव च न्यासकृता[6] पदमञ्जरीकारेण[7] च समर्थ्यते । सिद्धान्तकौमुदीप्रभृतिषु[8] व्याख्यानग्रन्थेष्वयमेवार्थः प्रतिपादितः । दृश्यन्ते चास्मिन्नर्थे कविप्रयोगाः—

---

1. सुभद्रा० 8.80,
2. व्या० चन्द्रो०, द्वितीयखण्डः, तद्धितप्रकरणम्, पृ० 388,
3. "करणाधिकरणयोश्च" (अष्टा0 3.3.117) इत्यधिकरणे ल्युट् ।
4. काशिका० 5.2.6,
5. म० भा० 5.2.6,
6. न्यासः 5.2.6,
7. पद० 5.2.6,
8. सि० कौ० तद्धितपाञ्चमिकप्रकरणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वासुदेवविजये–

"यथामुखीनं मुकुरं रमायाः श्रीकौस्तुभं प्रत्युरसं दधानम्"[1]।

अत्र काव्यकृतः पदचन्द्रिकाभिधा स्वोपज्ञव्याख्या–"प्रत्युरसम् उरसि श्रीकौस्तुभं दधानम्। रमाया यथामुखीनं मुखप्रतिबिम्बदर्शनाधिकरणं मुकुरम्"[2] इति।

अनर्घराघवे–

"देशकालव्यवहितस्यापि प्रमेयग्रामस्य यथामुखीनमादर्शतलं स्थविरबुद्धिः"[3]।

देशकालव्यवहितस्यापि प्रमेयसमूहस्य यथामुखीनं मुखस्य सदृशं दृश्यते यत्र तादृशमादर्शतलं भवतीत्यर्थः"[4] इति टीकाकृद् रुचिपतिरुपाध्यायः।

सुभद्राहरणे–

यथामुखीनसम्मृष्टमपरा मणिदर्पणम्।
अयानयीनशाराणां पूर्णमन्या तु भाजनम्॥[5]

अथेह काव्यकारस्य स्वोपज्ञा व्याख्या–"मुखस्य सदृशं यथामुखम्। मुखशब्दस्य सादृश्ये निपातनादव्ययीभावः। यथामुखं प्रतिबिम्बमुच्यते। तद्यत्र दृश्यते स यथामुखीनः। अधिकरणे ल्युट्। मणिदर्पणः"[6] इति।

भट्टिकाव्ये तु अतो भिन्न एवार्थे प्रयोगो दृश्यते–

ततश्चित्रीयमाणोऽसौ हेमरत्नमयो मृगः।
यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्॥[7]

इह कविना "पदार्थानतिवृत्तौ यथाशब्द अश्रितः"[8] इति हरदत्तः। तेन मुखमनतिक्रम्य = मुखस्य समक्षे = सम्मुखे पुप्लुवे इत्यर्थो भवति। एवं मते

1. वासु० 3.12, पृ० 101,
2. वासु० 3.12, पृ० 102,
3. अनर्घ० 6.17,
4. अनर्घ० (रुचिपत्युपाध्यायटीकोपेतं संस्करणम्) 6.17,
5. सुभद्रा० 8.94,
6. सुभद्रा० 8.94,
7. भट्टि० 5.48,
8. पद० 5.2.6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सति सूत्रगतस्य "दर्शनः" इति पदस्य कथं सङ्गतिरिति हरदत्तेनापि न ज्ञापितम्, भट्टिना च कथमस्य सङ्गतिः कृता स्याद् इति न विद्मः।[1]

यद्यपीह भट्टिकाव्यस्य टीकाकारेण जयमङ्गलेन—"........ असौ मारीचो मायामृगीभूतः सन् हेमरत्नमयः .... निर्मलत्वात् सीताया अग्रतो यथामुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म। इवशब्दलोपोऽत्र द्रष्टव्यः। यथामुखसम्मुखस्य दर्शनः खः[2]।" इति सूत्रानुसारितां दर्शयतेदं व्याख्यातम्। न च इत्थं व्याख्यायमानमिदं न सङ्गच्छत इति। अतिदुर्बोधतापि चेह न प्रतीयते। तथाप्यत्र सांमान्येन यथामुखीनः मुखमनतिक्रम्य मुखस्य सम्मुखे इत्येवार्थो गम्यते। अत एव हरदत्तमिश्रेण[3] तत्त्वबोधिनीकृता[4] व्याकरणचन्द्रोदयकारेण[5] चात्रायमेवार्थः कवेरभिमतो मतः। अथापरोऽपि यथामुखीनँ इति प्रयोगो दृश्यते भट्टिकाव्ये यत्रैवं सूत्रनुसारितापि साधयितुमशक्या। एतत् खलु हेत्वन्तरमत्र यद् अमुमेवार्थं स प्रकृतोदाहरणस्य मन्यत इति। अथैष स प्रयोगः —

मानेन तल्पेष्वयथामुखीना मिथ्याप्रसुप्तैर्गमितत्रियामाः।
स्त्रीभिर्निशातिक्रमविह्वलाभिर्दृष्टेऽपि दोषे पतयोऽनुनीताः॥[6]

इह अयथामुखीना मुखमतिक्रम्य वर्त्तमानाः पराङ्मुखाः सन्त इति स्फुटं कवेर्भावो द्योत्यते। अत्रापि जयमङ्गलेन दुरूहकल्पनया यथाकथमपि

---

1. अत्राचार्यचारुदेव आह—"भट्टिकाव्य में यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन् (5.48) इस पद्य में यथा शब्द का पदार्थानतिवृत्ति में समास मान कर "ख" प्रत्यय किया है। यह वृत्ति, न्यास, पदमञ्जरी आदि के विरुद्ध है। इस अर्थ में 'दर्शनः' पद की सङ्गति भी नहीं"।

   व्या० चन्द्रो०, द्वितीयखण्डः, तद्धितप्रकरणम्, पृ० 405,
2. भट्टि0 (जयमङ्गलोपेतम्) 5.48,
3. द्र० - पद० 5.2.6,
4. भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्द आश्रितः। तथा च मायामृगं प्रक्रम्योक्तम्—यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन् इति।

   सि० कौ०, तत्वबोधिनीयुता, तद्धितेषु पाञ्चमिकप्रकरणम्, पृ० 347, श्रीवेङ्कटेश्वर०।
5. व्या० चन्द्रो०, द्वितीयखण्डः, तद्धितप्रकरणम्, पृ० 405,
6. भट्टि० 11.4,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकृतप्रयोगस्य सूत्रानुसारितां साधयितुमायासः कृतः[1]। परमेतन्न सहजं प्रतीयते। आतश्च यथामुखीनः मुखमनतिक्रम्य वर्त्तमानः सम्मुखे विद्यमान इत्येवार्थोऽत्र भट्टिकवेरभिमत इति। तदेतद् भाष्यवृत्त्यादिव्याख्यानाद् भिद्यते। उत्सूत्रोऽयं प्रयोग इत्याचार्यचारुदेवः[2]।

अर्जुनरावणीयेऽपि भट्टिकाव्यसदृश एव प्रयोगो लभ्यते–

न सम्मुखीनं न यथामुखीनं संदृश्यते साश्वमहेभयोधम्।
रेणौ दिशः सर्वपथीनवृद्धौ पटायमाने स्थगयन्त्यशेषाः॥[3]

अत्रापि सम्मुखीनम् आभिमुख्यभाजम्, यथामुखीनं मुखमनतिक्रम्य वर्त्तमानं मुखस्य सम्मुखे एव स्थितमित्यर्थो गम्यते।[4]

सम्मुखीनः

सर्वस्य मुखस्य दर्शन इति वृत्तिकृत्[5]। समं मुखं सम्मुखमिति समानाधिकरणसमासः। इह समशब्दः सर्वपर्यायः, निपातनादन्त्यलोपः।

---

1. "पतयस्तल्पेषु शयनीयेषु मानेनायथामुखीनाः परावृत्तमुखाः।" "यथामुखसम्मुखस्य दर्शनः खः" (5.2.6) परावृत्तत्वात् प्रतिबिम्बाश्रयवत्तेषु योषितां प्रतिबिम्बमिव मनो न प्रसादीभवतीत्येवम्, मिथ्याप्रसुप्तैरलीकनिद्राभिः गमितत्रियामाः प्रेरितप्रथमादिप्रहराः ___।" इति।
   भट्टि० (जयमङ्गलोपेतम्) 11.4,
2. "___तेन प्रकृते यथामुखीन इति "यथामुखसम्मुखस्य दर्शनः खः" इति सूत्रस्य विषयतां नावगाहते। एवं "मानेन तल्पेष्वयथामुखीनाः" इत्यत्रापि यथामुखीन इति शास्त्राऽननुगृहीतः प्रयोगः।
   द्र० – चारुदेवशास्त्रिप्रणीतो भट्टिकाव्यविमर्शाख्यो निबन्धः, विश्वसंस्कृतम्, वर्षम् 3, ज्येष्ठ 2023 (मई 1966) अङ्क 3,
3. अर्जुन० 16.39,
4. अस्य श्लोकस्यार्थः सम्यक् स्पष्टो नास्ति। उत्तरार्धस्य पाठोऽप्यस्फुट इव प्रतीयते। तथापि अतः पूर्वस्मिन् पद्ये "रजश्चयः ___ बभूव भास्वत्करचक्ररोधी" (16.38) इत्युक्तम्। अत्रापि स एव प्रसङ्गः, तस्मात् समुत्थितेन रेणुराशिना दिशामाच्छादनात् न सम्मुखीनं सम्मुखे वर्त्तमानं न च यथामुखीनं मुखमनतिक्रम्य विद्यमानं सम्मुखे एव स्थितं साश्वमहेभयोधं संदृश्यते इति भावो गम्यते।
5. काशिका 5.2.6,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भाष्यवार्त्तिकयोश्चाप्येतदेव स्थितम्[1]। एतेन समस्य सर्वस्य मुखस्य दर्शन इत्युदाहरणार्थः। यस्मिन्नादर्शादौ सर्वं मुखं दृश्यते तदेवमुच्यते।

अनर्घराघवे यथामुखस्य दर्शन इत्यर्थे यथामुखीनम् इति प्रयुक्तम् तत्र पाठान्तरत्वेन सम्मुखीनम् इत्यपि वृत्तिसम्मतेऽर्थे दृश्यते[2]। सुभद्राहरणकारेण च यस्मिन् श्लोके यथामुखीनम् इति प्रयुक्तं तस्य स्वोपज्ञ-व्याख्यायाम्—"एवं सम्मुखीनः। सर्वस्य समग्रस्य मुखस्य दर्शनाधिकरणम्। निपातनात् ख-विषये सर्वपर्यायस्य समशब्दस्यान्तलोपः। दर्पणादिः प्रतिबिम्बाश्रय उच्यते"[3] इत्युक्तम्। अथान्यत्र प्राक्तनसाहित्येऽस्य प्रकृतेऽर्थे प्रयोगो मृग्यः।

कुमारसम्भवे तु अतो भिन्ने एवार्थे इदं प्रयुज्यते—

"संयुगे सम्मुखीनं तमुद्यन्तं प्रसहेत कः"[4] इति।

एतादृशमेव क्वचित् प्रयोगं दृष्ट्वा कथमित्थं प्रयोग इत्याशङ्क्य प्रकृतसूत्र-भाष्यव्याख्याने कैय्यटः "सम्मुखीनादर्शादिसादृश्याच्चान्योऽपि अभिमुखावस्थानः सम्मुखीन उच्यते इत्याहुः[5]" इत्येवमन्येषां कथन नैरपेक्ष्येणोद्धरति। हरदत्तस्तु प्रयोगमिमं पुरस्कृत्य स्वमतमिवैवतत् प्रस्तौति—"कथं तर्हि संयुगे सम्मुखीनं तमुद्यन्तं प्रसहेत कः" इति ? अभिमुखावस्थानात् साधर्म्याद् भविष्यति"[6] इति। एतेन प्रतीयते यत्तस्यापीदमभिमतम् इति। आचार्यचारुदेवस्तु प्रयोगमेनं प्रकृत्याह—उच्छृङ्खलतानिदर्शनमात्रमिदमिति।[7]

---

1. द्र० - म० भा० 5.2.6,
2. अनर्घ० (रुचिपत्युपाध्यायटीकोपेतं संस्करणम्) 6.17, पादटिप्पण्यां सम्मुखीनम् इति पाठान्तरनिर्देशः। पृ० 278,
3. सुभद्रा० 8.94,
4. कुमार० 2.58,
5. प्रदीपः 5.2.6,
6. पद० 5.2.6,
7. इसी प्रकार संयुगे सम्मुखीनं तमुद्यन्तं प्रसहेत कः—यहाँ भी सम्मुखीन का "प्रत्यक्ष सामने आया हुआ" अर्थ में प्रयोग उच्छृङ्खलता का निदर्शनमात्र है।
   व्या० चन्द्रो०, द्वितीयखण्डः, तद्धितप्रकरणम्, पृ० 405,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्जुनरावणीयेऽपि भट्टिकाव्यसदृश एव प्रयोगो लभ्यते–

"न सम्मुखीनं न यथामुखीनं संदृश्यते साश्वमहेभयोधम्"[1] इति।

इह सम्मुखीनम् अभिमुखम् इत्यर्थः। रघुवंशेऽपि एतादृशः प्रयोगो दृश्यते–

अपशूलं तमासाद्य लवणं लक्ष्मणानुजः।
रुरोध सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम्॥[2]

अत्राह मल्लिनाथः–लक्ष्मणानुजः शत्रुघ्नोऽपशूलं तं लवणमासाद्य रुरोध। तथा हि, रन्ध्रप्रहारिणां रन्ध्रप्रहरणशीलानाम्। अपशूलतैवात्र रन्ध्रम्। जयः सम्मुखीनो हि सम्मुखस्य दर्शनो हि। "यथामुखसम्मुखस्य दर्शनः खः" इति खप्रत्ययः। वधिकरणलक्षणार्थस्तु दुर्लभ एव"[3] इति।

सूत्रम्–आप्रपदं प्राप्नोति। (5-2-8)

आप्रपदीनः पट इत्युदाहरणम्। पादस्याग्रं प्रपदमुच्यते[4]। आप्रपदं पादाग्रं यावत् प्राप्नोतीति आप्रपदीनः पटः। धारणीयस्य वस्त्रस्य विशेषणमेतत्। यद्धि वस्त्रं पादाग्रपर्यन्तं प्राप्नोति धारितं तदाप्रपदीनम्। अधारितं चापि तद्योग्यत्वादेवमुच्यते। योग्यो ह्यसावाप्रपदं शरीरं प्राप्तुम् इति शरीरेणासम्बद्धस्यापि पटस्य प्रमाणमाख्यायते।[5]

इह पदमञ्जरीकारस्य न्यासकारस्यापि च व्याख्यानेन गम्यते यत् यः पटः पादाग्रपर्यन्तं सर्वशरीरं प्राप्नोति = व्याप्नोति स आप्रपदीन

---

1. अर्जुन॰ 16.39,
2. रघु॰ 15.17,
3. रघु॰ (सञ्जीवनीटीकोपेतम्) 15.17,
4. "पादाग्रे प्रपदम्"। अमर॰ 2.6.71,
5. काशिका 5.2.8,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति[1]। एतच्च प्रलम्बकञ्चुकादेरेव विशेषणं भवति, स हि पादाग्रपर्यन्तं सर्वशरीरं व्याप्नोति। एवं सति तन्मतेन पादाग्रपर्यन्तं धारितस्य अधोवस्त्रस्य = (परिधानीयस्य धौतवस्त्रस्य वा) आप्रपदीनम् इति विशेषणं न भवति। सर्वशरीरमभिव्याप्य पादाग्रान्तं प्रलम्बमानस्य कञ्चुकादेस्तद्वच्छशरीरं व्याप्य पादाग्रान्तलम्बिनः तनुत्रादेर्वेदं विशेषणं भवति। महाकवेर्बाणभट्टस्य प्रयोगोऽप्येतद्व्याख्यानानुगतो दृश्यते। हर्षचरिते कविर्मालत्या वेशभूषावर्णनप्रसङ्गेनाह—

"धौतधवलनेत्रनिर्मितेन निर्मोकलघुतरेणाप्रपदीनेन कञ्चुकेन तिरोहित-तनुलता"[2] इति।

सुभद्राहरणस्य प्रयोगेणाप्येतदेव सूच्यते—

वाससाप्रपदीनेन शरच्चन्द्रातपत्विषा।
भान्तीं कुमुदषण्डेन स्फुटेन यमुनामिव॥[3]

अथार्जुनरावणीयस्य प्रयोगोऽपि इत्थमेवानेन हरदत्त-जिनेन्द्रबुद्धिभ्यां व्याख्यातेनार्थेन संवदति—

भटोऽभ्यमित्रीयमवाप्य वाहमाकर्णजाहं प्रविकृष्टधन्वा।
तनुत्रमस्याप्रपदीनमाशु छित्वा शरैः सादिनामजघान॥[4]
अन्यो गजस्याप्रपदीनमङ्गे द्राक् सर्वचर्मीणमसिप्रहारैः।
लुलाव लूत्वा प्रथमं तनुत्रं स्तम्भं कदल्या इव गात्रमेवम्॥[5]

एवं सर्वं शरीरमभिव्याप्य पादाग्रलम्बी कञ्चुकादिपट आप्रपदीन इति पदमंजरीकृतो न्यासकर्त्तुश्च व्याख्यानेन बाणभट्टादीनां प्रयोगेण च गम्यते। तथा आप्रपदीनपट इव पादाग्रं प्राप्नुवन्ती लम्बमाना मालाऽपि आप्रपदीनेति पदेन

---

1. "आप्रपदं यथा स्यात् तथा सर्वशरीरं प्राप्नोतीत्यर्थः"।
   पद० 5.2.8,
   "प्राप्तियोग्यतामुपादाय हि योग्योऽसवाप्रपदाच्छरीरं प्राप्तुम्"। न्यासः 5.2.8,
2. हर्ष०, प्रथमोच्छ्वासः, पृ० 22,
3. सुभद्रा० 2.119,
4. अर्जुन० 16.42,
5. अर्जुन० 16.43,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विशेष्या भवतीत्येतदपि बाणभट्टस्य माघस्य च प्रयोगेण सम्यग् गम्यते। तथा हि बाणः प्रयुङ्क्ते–

"आप्रपदीनां कण्ठे यमदोलामिव गुणकुसुममालामिवाधिरूढाम्"[1] इति।

माघोऽपि चेत्थमेव प्रयुङ्क्ते–

मुक्तामयं सारसनावलम्बि भाति स्म दामाप्रपदीनमस्य।
अङ्गुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैस्त्रिस्त्रोतसः सन्ततधारमम्भः ॥[2]

इहापि गले धारितं तन्मुक्तादाम अधश्शरीरमभिव्याप्य पादाग्रपर्यन्तं लम्बमानं भातीति गम्यते। अथ पादाग्रपर्यन्तलम्बिनोऽप्यसर्वशरीरव्यापिनो धौतादिवस्त्रस्यापीदं विशेषणं मन्यते। तथा च वासुदेवशरण-अग्रवालमहोदयेन पादाग्रचुम्बिनो धौतवस्त्रस्येदं विशेषणं मतम्[3]। एतदेव च अमर-नाथशास्त्रिणाऽपि प्रतिपादितम्[4]। धौतवस्त्रविशेषणीभूतस्य आप्रपदीनशब्दस्य प्रयोगस्तु प्रत्नसाहित्ये मृग्यः।

---

1. हर्ष०, पञ्चमोच्छ्वासः, पृ० 138,
2. शिशु० 3.10,
3. जिस समय यूनानी इस देश में आए, वे वहाँ की सरल और सुन्दर वेशभूषा से प्रभावित हुए। अर्रियन ने लिखा है–"भारतीय प्रायः सूती वस्त्र पहनते हैं। वे नीचे पैर तक लटकती हुई धोती और ऊपर अङ्गों पर एक उत्तरीय डाल लेते हैं, जिससे कभी-कभी अपना सिर भी ढक लेते हैं"। अष्टाध्यायी में आप्रपदीन शब्द है, वह प्रपद अर्थात् पैरों के अग्रभाग तक लटकती हुई धोती के लिये प्रयुक्त होता था।
   पाणि भार०, अ० 3, परि० 7, पृ० 134-35,
4. "धौतवस्त्रपरिधाना जनाः पादाग्रपर्यन्तां लम्बमानां "धौतीं" परिदधति, आप्रपदं प्राप्नोति धौती तस्माद् आप्रपदीना उच्यते। भारतीयवेशभूषायाः प्राचीनतमायाः सूत्रमिदं निदर्शनम्"। द्र० –"स्वोपज्ञं पाणिनेः शास्त्रम्" इति निबन्धः विश्वसंस्कृतम्, वर्षम्-2, अङ्कः 3, मई 1965 ई०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। (5.2.9)

इह सर्वान्नीनो भिक्षुरित्युदाहरणं विमृश्यते। वृत्तिकारः सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुरित्याह[1]। इह "प्रकारकात्स्न्र्ये सर्वशब्दः। यानि अन्नानि लभ्यन्ते उष्णानि शीतानि सरसानि विरसानि तानि सर्वाणि भक्षयतीत्यर्थः"[2] इति हरदत्तः। एतदेव तत्वबोधिनीकारोऽनुवदति[3]।अमरकोशे "सर्वान्नीनस्तु सर्वान्नभोजी"[4] इति पठ्यते। तत्र क्षीरस्वामी अपि "सर्वाणि अन्नानि भक्षयति सर्वान्नीनः"[5] इत्येवाह। अमरविवेककारो महेश्वरस्तु—यः सर्वेषां वर्णनाम् अन्नानि भक्षयति स परमहंसादिरित्येवमर्थापयति[6]। व्याख्यासुधाकारो रामाश्रमोऽप्यत्र द्वे सर्ववर्णान्नभक्षकस्य इत्याह[7]।

164

---

1. काशिका 5.2.9,
2. पद० 5.2.9,
3. द्र०–सि०कौ०, तत्वबोधिनीसमेता, तद्धितपाञ्चमिकप्रकरणम्, पृ० 347; श्रीवेङ्कटेश्वर०
4. अमर० 3.1.22,
5. अमर० (अमरकोशोद्घाटनव्याख्योपेतः) 3.1.22, पृ० 165,
6. सर्वान्नीनः सर्वान्नभोजी द्वे यः सर्वेषां वर्णानाम् अन्नानि भुङ्क्ते तस्य परमहंसादेः। अमर० (अमरविवेकाख्यटीकोपेतः) 3.1.22, पृ० 257,
7. सर्वेषामन्नानि सर्वान्नानि भक्षयति। अनुपदसर्वान्न० इति खः। —— द्वे सर्ववर्णान्नभक्षकस्य।
   अमर० (व्याख्यासुधोपेतः) 3.1.22, पृ० 481,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह प्रथमे पक्षे कर्मधारयो मन्यते द्वितीये च षष्ठीसमास इति। उभयमिदम् उपपद्यते, सङ्गतत्वात् परस्परमविरुद्धत्वाच्च। कर्मधारयपक्षे प्रकारकात्स्न्र्ये वर्त्तमानत्वात् सर्वशब्दस्य सर्वाणि = सर्वविधानि इति। यानि उष्णानि शीतानि सरसानि विरसाानि वा लभ्यन्ते तानि सर्वाणि अन्नानि भक्षयतीति सर्वान्नीनो भिक्षुरित्यर्थः। इह स्वादुभोज्यनिरपेक्षः यथोपलम्भसर्वान्नभोजित्वात् स भिक्षुः "सर्वान्नीनः" इत्युक्तं भवति। षष्ठीसमासपक्षे च–सर्वेषाम् अन्नानि सर्वान्नानि, यः सर्वेषाम् वर्णानाम् अन्नानि भैक्ष्येण लब्धानि भक्षयति सर्वत्र समदर्शित्वात् स सर्वान्नीनो भिक्षुरित्येष भावो व्यज्यते। एवमिदं वृत्तिकृत्प्रदर्शितस्य सर्वान्नीनो भिक्षुरित्युदाहरणस्य विवरणम्।

न केवलं भिक्षुरेव यः कश्चिदपि सर्वाणि अन्नानि सर्वेषां वान्नानि भक्षयति स सर्वान्नीन इति।

सर्वाणीति न केवलं शीतोष्णसरसविरसान्येव। भिक्षुमुद्दिश्यैतत् तत्रोक्तम्। वस्तुतस्तु सर्वाणि सर्वविधानीत्येव। तेन सर्वाणि भक्ष्याभक्ष्याणि निषिद्धानिषिद्धानि अन्नानि भक्षयतीति "सर्वान्नीनो वृषलः" इत्याद्याः प्रयोगाः स्वयमुन्नेया भवन्ति।

सूत्रम्–साप्तपदीनं सख्यम्। (5.2.22)

साप्तपदीनम् इति निपात्यते सख्येऽभिधेये। सप्तभिः पदैरवाप्यते साप्तपदीनम्। इह वृत्तिकारः "सख्यं जनाः साप्तपदीनमाहुः"[1] इति क्वाचित्कं पद्यांशम् उदाहरणत्वेनोद्धरति। अथात्र सप्तभिः पदैः = पदनिक्षेपैरिति बालमनोरमाकारः[2]। सप्तभिः पदैः - उच्चरितैः शब्दैरिति मणलूर -

1. काशिका 5.2.22,
2. द्र०-सि० कौ० बालमनोरमोपेता (द्वितीयभागः) तद्धिते पाञ्चमिकप्रकरणम्, पृ० 851,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वीरराघवाचार्यो[1] वाचस्पत्यकारश्च[2]। उभयमिदमुपपन्नम्[3] सङ्गतत्वात् परस्परमविरोधित्वाच्च। अत एव भट्टक्षीरस्वामिना[3] नारायणभट्टेन[4] चोभयमप्येतत् प्रकृतोदाहरणपदस्य व्याख्याने निर्दिष्टम्। तथा च प्रयोगाः —

प्रयुक्तसत्कार-विशेषमात्मना न मां परं सम्प्रतिपत्तुमर्हसि।
यतस्सतां सन्नतगात्रि सङ्गतं मनीषिभिस्साप्तदीनमुच्यते॥[5]

एतत् कुमारसम्भवे पार्वतीब्रह्मचारिसंवादप्रसङ्गे कालिदासेन प्रयुक्तम्। इह प्रकरणेन सतां सप्तभिरेव पदैः संलापशब्दैरवाप्यत इति साप्तपदीनं सङ्गतं सख्यम् इत्यर्थो गम्यते।मल्लिनाथेनायमेवार्थोऽत्र निर्दिष्टः[6]। महाभारते[7] पञ्चतन्त्रेऽपि च[8] सप्तभिः पदैरुच्चारितैरवाप्यमानस्य सख्यस्य निर्देशो दृश्यते।

---

1. पा० सू० व्या० (प्रथमभागः) तद्धिते पाञ्चमिकप्रकरणम्, पृ० 559,
2. साप्तपदीनम् न० सप्तभिः पदैरुच्चारितैर्निर्वृत्तम्, खञ्। वाच०, षष्ठभागः, पृ० 5281,
3. "सख्यं साप्तपदीनं स्यात्" इत्यमरवचनं व्यावृण्वान आह क्षीरस्वामी "सप्त पदानि क्रमाः सुप्तिङन्तानि वा व्याप्नोति साप्तपदीनम्, "साप्तपदीनं सख्यम् इति साधु"।
   अमर० (अमरकोशोद्घाटनव्याख्योपेतः) 2.8.12, पृ० 124,
4. सप्तभिः पदन्यासैर्वचनैर्वा प्राप्यं साप्तपदीनं सख्यम्।
   प्र० सर्व० (तृतीयभागः) तद्धितखण्डः, पृ० 158,
5. कुमार० 5.39,
6. "सतां सङ्गतं सख्यं सप्तभिः पदैरापद्यते इति साप्तपदीनं सप्तपदोच्चारणसाध्यमुच्यते"।
   कुमार० (सञ्जीवनी-टीकोपेतम्) 5.39,
7. प्राहुः साप्तपदं मैत्रं बुधास्तत्वार्थदर्शिनः।
   मित्रतां च पुरस्कृत्य किञ्चिद् वक्ष्यामि तच्छृणु॥
   इति यमसावित्रीसंवादे प्रवृत्ते सावित्र्या वचनम्।
   म० भार० 397, 23 (गीता प्रेस)
8. सतां साप्तपदं मैत्रमित्याहुर्विबुधा जनाः।
   तस्मात्वं मित्रतां प्राप्तो वचनं मम तच्छृणु॥
   इति बिलं प्रविष्टं हिरण्यकं प्रति लघुपतनकवायसस्य तत्सख्यं प्रार्थयतो वचनम्।
   पञ्च० (मित्रसम्प्राप्तिः) श्लोकः 49, चौखम्बा० 1977 ई०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विवाहसंस्कारे वरकन्ययोः सप्तपद्या विधानमस्ति[1]। तत्र सप्तभिः पदैः (क्रमैः) अवाप्यमानं तयोः सख्यं साप्तपदीनम् इत्यपि व्याख्यातारः[2]। वासुदेवशरणअग्रवालमहोदयेनास्य समर्थनं कृतम्[3]। सुभद्राहरणकाव्ये चास्मिन्नर्थे प्रयोगो लभ्यते–

सख्यं साप्तपदीनत्वे रोचतेऽद्य सहानया।
तदस्याः पितरं द्रष्टुं यामि वो यदि रोचते॥[4]

अथैवं सप्तभिः पदैरवाप्यस्य दम्पत्योः सख्यस्य सादृश्यादन्येषां जनानामपि सख्यं साप्तपदीनम् इति वक्तुं शक्यम्।

अथेह यद्यपि सप्तभिः पदैरवाप्यते यत्तदेव साप्तपदीनं सख्यम् इति व्याख्यातम्, तथापि रूढ्या सख्यमात्रमेतेनाभिहितं भवति। तथा चामरः–"सख्यं साप्तपदीनं स्याद्"[5] इति सख्यस्य पर्यायत्वेनैतदाह। तेन सख्यसामान्येऽपि सुकरः प्रयोगः। तथाह्यर्जुनरावणीये–

---

1. द्र० - पार० गृ० 1.8.1,
2. तद्यथा ब्रह्मदत्तसूनुर्नारायणकविः – "सप्तभिः पदैरवाप्यते इत्यत्रार्थे साप्तपदीनं सख्यम् इत्यनेनं खो (?) निपात्यते। सख्ये विषये पाणिग्रहणमित्यर्थः"।
   द्र० - सुभद्राहरणमहाकाव्यस्वोपज्ञव्याख्या 8.107, पृ० 199, तथा च अमरनाथशास्त्री व्याकरणाचार्यः–"साप्तपदीनं सख्यम् (अष्टा0 5.2.22)। सप्तभिः पदैरवाप्यते तस्मात् सख्यं साप्तपदीनमुच्यते। पाणिनिना क्वचिद् विवाहोत्सवप्रसङ्गे एकम् इषे.....इति वरकन्ययोः सप्तपदक्रमा दृष्टाः, सप्तभिः पदैः (क्रमैः) चावाप्यते सख्यमिदम्–तस्मात् सूत्रं प्रणिनाय "साप्तपदीनं सख्यम् इति....."। द्र० - "स्वोपज्ञं पाणिनेः शास्त्रम्" इति निबन्धः, अमरनाथशास्त्रिव्याकरणाचार्यप्रणीतः, विश्वसंस्कृतम्, वर्षम्-2, ज्येष्ठः 2022 (मई 1965) अङ्कः 3, पृ० 226-36,
3. "गृह्यसूत्रों में विवाह-संस्कार के अन्तर्गत सप्तपदी का विधान है। उसी से साप्तपदीन या साप्तपद सख्य का आदर्श स्थिर हुआ"।
   पाणि० भार० अ० 3, परि० 4, पृ० 113,
4. सुभद्रा० 8.107,
5. अमर० 2.8.12,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कौपीनवासोऽपि शरीरभाजामाक्षेपि यैः साप्तपदीन-ह्रीनैः।
व्रातीनसङ्घः प्रकटं नरेन्द्रैस्ते राक्षसाः सङ्कटमाशु नीताः॥[1]

इहसाप्तपदीनहीनैः सख्यहीनैरिति गम्यते।

सूत्रकारेण साप्तपदीनं सख्यम् इत्युक्तम्। इदं चापि प्रयुक्तं दृश्यते साप्तपदीनः सखा, साप्तपदीनं मित्रमिति। एतद्धि लक्षणया धर्मधर्मिणोर-भेदोपचाराद् भवतीति वृत्तिकारेण प्रकृतसूत्रव्याख्याने स्फुटं निर्दिष्टम्।[2]

सूत्रम्-नेर्बिडज्बिरीसचौ। (5-2-32)

निबिडम्, निबिरीसम् इति द्वयमुदाहरणम्। अत्र वृत्तिकृदाह—"नते नासिकायाः इत्यनुवर्त्तते, सञ्ज्ञायाम् इति च। निशब्दान्नासिकाया नतेऽभिधेये बिडच् बिरीसच्—इत्येतौ प्रत्ययौ भवतः। निबिडम्, निबिरीसम्। तद्योगान्नासिकापि। पुरुषोऽपि निबिडः, निबिरीसः। कथं निबिडाः केशाः, निबिडं वस्त्रम् ? उपमानाद् भविष्यति"[3] इति। इह मुख्योऽर्थः वृत्तिकृता नासिकाया नतम् इत्येव प्रतिपादितः। यच्च निबिडाः केशा इत्याद्युपमानाद् भविष्यति इत्युक्तं तत्रैतन्न सम्यगवगम्यते यन्नासिकाया नतेन सान्द्रकेशादीनां कथमौपम्यं भविष्यति।

अथ ये प्राचीनाः प्रसिद्धाः कोशकारास्तेषां ग्रन्थेषु प्रकृतोदाहरणयोः नासिकाया नतम् इति वृत्तिकृता मुख्यत्वेन प्रतिपादितोऽर्थो न दृश्यते। आचार्य-हेमचन्द्रः खल्वनयोः पाठं घनसान्द्रनीरन्ध्रादिशब्दैः सह तत्पर्यायत्वेन करोति—

.... निबिडन्तु निरन्तरम्॥[4]

---

1. अर्जुन० 16.48,
2. द्र०-काशिका 5.2.22,
3. काशिका 5.2.32,
4. अभि० 6.82,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निबिरीसं घनं सान्द्रं नीरन्ध्रं बहलं दृढम्।
गाढमविरलं चाथ................................ ॥[1]

हलायुधोऽप्याह–

निरन्तरं घनं सान्द्रं बहुलं विरलेतरम्॥[2]
निबिडं निबिरीसं च दृढं गाढं प्रचक्षते॥[3]

अमरकोशे निबिडनिबिरीसशब्दौ सान्द्रादिभिः सह पठितौ न दृश्येते।[4] क्षीरस्वामी तु अमरकोशोद्घाटनाख्ये व्याख्याने कोशपठितानां सान्द्रादीनां पर्यायत्वेन एतावपि संयोज्य निर्दिशति।[5]

अथास्मिन् कोशकारैर्निर्दिष्टेऽर्थेऽनयोः प्रयोगः प्राचुर्येण दृश्यते।

तद्यथा वासुदेवविजये–

"अथार्धरात्रे निबिडैस्तमोभिः"[6]।

इह निबिडैः सान्द्रैः घनीभूतैरिति गम्यते।

आर्यासप्तशत्याम्–

"निबिडघटितोरुयुगलां श्वासोत्तब्धस्तनार्पितव्यजनाम्"।[7]

इह निरन्तरे निरवकाशेऽर्थे निबिडशब्दस्य प्रयोग इति व्यज्यते।[8]

---

1. अभि० 6.83,
2. हला० 717,
3. हला० 718,
4. इमौ शब्दौ कोशकारेण नैव स्वकोशे निर्दिष्टौ।
5. घनं निरन्तरं सान्द्रम् (अमर० 3.1.66) इत्यस्य व्याख्यानप्रसङ्गेनाह क्षीरस्वामी–"निबिडं निबिरीसं गाढं च" इति। द्र० – अमर० (अमरकोशोद्घाटनोपेतः) 3.1.66,पृ० 175,
6. वासु० 3.4,
7. आर्या० 320,
8. इह "अत्यन्तसङ्घटितोरुद्वयाम्" इति टीकाकृदनन्तपण्डितः। द्र०–आर्या० (अनन्तपण्डितकृतव्यङ्ग्यार्थदीपिकाटीकोपेता) 320, पृ०-115, निर्णय०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रघुवंशे–

"तस्यापरेष्वपि मृगेषु शरान् मुमुक्षोः कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः"[1]। निबिडोऽपि दृढोऽपि मुष्टिः — इत्यर्थ इति मल्लिनाथः[2]। माघे च–

गुरुनिबिडनितम्बबिम्बभाराक्रमणनिपीडितमङ्गनाजनस्य।
चरणयुगमसुस्रवत् पदेषु स्वरसमसक्तमलक्तकच्छलेन॥[3]

इहापि निबिडं दृढमिति मल्लिनाथः[4]। माघे एव च निबिरीसशब्दस्यापि प्रयोगो दृश्यते प्रकृतेऽर्थे–

"जघनमलघुपीवरोरुकृच्छ्रादुरुनिबिरीसनितम्बभारखेदि"[5]।

इह निबिरीसो निबिडः दृढः गाढो वेति गम्यते। तथा हि मल्लिनाथः–"निबिरीसो निबिडः" निबिडं निबिरीसं च दृढं गाढं प्रचक्षते" इति वैजयन्ती[6]।" "नेर्बिडज्बिरीसचौ" इति निशब्दाद् बिरीसच्प्रत्ययः"[7] इति।

एवं कोशनिर्दिष्टेऽर्थे बहवः प्रयोगा दृश्यन्ते। वृत्तिकारोक्ते मुख्येऽर्थे तु प्रयोगो न लब्धः। सम्भवत एतादृशप्रयोगानुपलम्भादेव भोजदेवेन सरस्वतीकण्ठाभरण-व्याकरणे–

"नेर्बिडज्बिरीसचौ नीरन्ध्रे"[8]।

---

1. रघु० 9.58,
2. द्र० - रघु० (सञ्जीवनीटीकोपेतम्) 9.58,
3. शिशु० 7.6,
4. द्र०–शिशु० (सर्वङ्कषोपेतम्) 7.6,
5. शिशु० 7.20,
6. साम्प्रतमुपलभ्यमाने मुद्रिते वैजयन्तीकोषे तु–"निबिडं निबिरीसं स्याद् घनं सान्द्रं निरन्तरम्" इत्येतद् लभ्यते। (द्र0-वैज0 5.4.126, पृ०-157, पण्डितहरगोविन्दशास्त्रिसम्पादितसंस्करणम्, चौखम्बा0 19) मल्लिनाथेनोद्धृतमिदं वचनं हलायुधकोषे (श्लोकः 718) याथातथ्येन प्राप्यते। तच्चेह पूर्वमुद्धृतम्।
7. शिशु० (सर्वङ्कषोपेतम्) 7.20,
8. सर० 5.2.40,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति सूत्रितम्। इह नारायणभट्टोऽप्येनद्भोजमतमेवावलम्बते। स खल्वेतत् समर्थयन् "नेर्बिडज्बिरीसचौ" इतीह वृत्तिकृदिव "नते नासिकायाः" इति नानुवर्त्तयति। "नेर्नीरन्ध्रार्थे एतौ स्तः"[1] इत्येवं च प्रकृतसूत्रमर्थापयति। इतोऽग्रिमे च "इनच्पिटच्चिकचि च" इति सूत्रे "नते" इतिमात्रमेवानुवर्तयति[2]। तत्र स्वाभिप्रायं चेत्थं स्पष्टयति–

एतत्सूत्रद्वयं वृत्तौ व्याख्यातं नासिकानते।
मया भोजानुसाराच्च प्रयोगाच्चैवमीरितम्।।[3] इति,

सम्भवतः अमुमेव हेतुं मनसिकृत्य भाषावृत्तिकारोऽपीह "नते नासिकायाः" इत्यनुवृत्तिं न दर्शयामास[4]। एतेन तन्मतेऽपि निबिडनिबिरीसशब्दौ प्रसिद्धार्थौ एव न तु नासिकाया नते स्त इति प्रतीयते। एवं वृत्तिनिर्दिष्टे मुख्येऽर्थे प्रयोगानुपलम्भात् तद्भिन्ने कोशनिर्दिष्टेऽर्थे च प्रचुरप्रयोगदर्शात् भोजराज-पुरुषोत्तमदेव-नारायणभट्टैश्च तस्यैव समर्थनादिह वृत्तिगतं व्याख्यानं पुनर्विचारणीयतां प्रपद्यते।

इहान्ये बहवो व्याख्यातारस्तु वृत्तिकारमतमेवानुवदन्ति।[5]

भाष्ये चेयं सूत्रद्वयी न व्याख्याता, तस्मादिह भाष्यकारस्याभिमतमविदितमेवास्ते।

---

1. प्र० सर्व० (तृतीयभागः) तद्धितखण्डः, पृ० 160,
2. प्र० सर्व० (तृतीयभागः) तद्धितखण्डः, पृ० 160,
3. प्र० सर्व० (तृतीयभागः) तद्धितखण्डः, पृ० 160,
4. द्र०–भाषा० 5.2.32,
5. द्र०–अष्टाध्यायी (भाष्य) प्रथमावृत्तिः (द्वितीयभागः) 5.2.32,
   पाणिनीयाष्टकम् (तत्वप्रकाशिकोपेतम्) 5.2.32,
   जैनेन्द्रमहावृत्तिः 3.4.152, पृ० 241,
   शाकटायनव्याकरण-अमोघावृत्तिः 3.3.106, पृ० 290,
   शाकटायनव्याकरण-चिन्तामणिवृत्तिः 3.3.106, पृ० 424,
   पाणिनीयमिताक्षरा 5.2.32,
   (सि०कौ०) बालमनोरमा - द्वितीयभागः - पाञ्चमिक-प्रकरणम्, पृ० 853,
   (सि०कौ०) तत्वबोधिनी।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्-तद्युक्तात् कर्मणोऽण्। (5.4.36)

व्याहृतार्थायां = सन्देशवाचि वाचिकम् इति भवति। तद्युक्तं च कर्म "कार्मणम्" इति विधीयते। कर्मैव कार्मणम्। वाचिकं श्रुत्वा तथैव यत् कर्म क्रियते तत्कार्मणम् इत्युच्यते। तथा च प्रक्रियासर्वस्वकार आह–

नृपस्य वाचिकं श्रुत्वा कार्मणं सचिवोऽकरोत्।[1]

तद्युक्तमेव कर्माकरोदित्यर्थः। सुभद्राहरणे चास्य प्रयोगो लभ्यते–

निशम्य कान्तदूतानां वाचिकं तद्गृहेऽङ्गनाः।
कान्तानानन्दयामासुः कार्मणैस्तदगारगाः॥[2] इति।

अमरकोश-वैजयन्तीकोषयोस्तु कार्मणम् इति मूलकर्मणः = (मूलैरोषधिभिर्वशीकरणात्मकस्य) पर्यायत्वेन पठ्यते[3]। एतदर्थकस्य कार्मणशब्दस्य साहित्ये प्रयोगोऽपि दृश्यते। तद्यथा माघे-

---

1. प्र० सर्व०, तद्धितखण्डः, तृतीयभागः, पृ० 210,
2. सुभद्रा० 9.58,
3. "वशक्रिया संवननं मूलकर्म तु कार्मणम्"। इह क्षीरस्वाम्याह– "मूलैरोषधिभिर्यद्वशीकरणं तत् कर्मैव कार्मणम्, तद्युक्तात् कर्मणोऽण्" इति। अमर० (अमरकोशोद्घाटनव्याख्योपेतः) 3.1.4, पृ० 183, हिंसाकर्माभिचारः स्यान्मूलकर्म तु कार्मणम्।
   वशीकारः संवननं विकर्माकार्यसेवनम्॥वैज० 3.6.11,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"चाटु चाकृतकसम्भ्रममासां कार्मणत्वगमद्रमणेषु"[1] इति।

काशीखण्डे च–

"काचित्कार्मणतत्वज्ञा काचिन्मौक्तिगुम्फिका"[2] इति।

भगवता सूत्रकारेण वाचिकयुक्तं कर्म कार्मणम् इत्युक्तम्, कथं पुनरिह मूलकर्म कार्मणम् उच्यते ? इह प्रक्रियासर्वस्वकारस्तु सङ्गतिमित्थं प्रदर्शयति–

"सन्देशवाग्यबोधितं यत्कर्मास्मात् स्वार्थिकोऽण् भवेत्।
नृपस्य वाचिकं श्रुत्वा कार्मणं सचिवोऽकरोत्॥

तद्युक्तमेव कर्माकरोदित्यर्थः। तच्च नृपवशीकरणमूलं भवतीति लक्षणया वशीकरणमूलं कर्म कार्मणम् उच्यते[3]" इति।

मेदिनीकरस्तु कार्मणशब्दस्य कर्मठ इत्यर्थमतिरिक्तमप्याह[4]। अत्र तु मूलं मृग्यम्।

सूत्रम्–सत्यादशपथे। (5.4.66)

सत्यशब्दाद् अशपथे डाच् प्रत्ययो विधीयते कृञो योगे। सत्यशब्दोऽनृतप्रतिपक्षवचनः। क्वचित्तु शपथे च वर्त्तते–"सत्येन शापयेद् विप्रम्"[5] इति। सत्याकरोति वणिग् भाण्डम् इत्युदाहरणम्। मयैतत् क्रेतव्यम् इति तथ्यं करोति। क्रेतव्यतायाः सत्यापनार्थं मूल्यांशदानेन भाण्डमावर्जयतीत्यर्थः। भाण्डं रत्नादिद्रव्यजातम्। अथार्जुनरावणीयकाव्येऽस्य प्रयोगः –

---

1. शिशु० 10.37,
2. शब्दकल्पद्रुमकोशे काशीखण्डस्येति कृत्वेदमुद्धरणमुद्धृतम्।
   द्र०–श० कल्प०, खण्डः 2, पृ० 107,
3. प्र० सर्व०, तद्धितखण्डः, तृतीयभागः, पृ०-210,
4. "कार्मणं मन्त्रतन्त्रादियोजने कर्मठेऽपि च"।
   मेदि० 48.41,
5. मनु० 8.113,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्यकृतां प्रीतिरसेन पूर्वं पश्चात्तनुं कामयुतां दधाना।
प्रियस्य काचित् समरागतस्य प्रियाकरोति स्म विचेष्टतानि ।।[1]

यथा पूर्वं मूल्यांशदानेन भाण्डादिकं कश्चित् सत्याकरोति तथा प्रियद्वारा प्रीतिरसदानेन सत्याकृतां तनुं दधाना काचित् प्रियेत्यादिरर्थः।

सुभद्राहरणे तु सत्याकरोति सत्यं वदतीत्येवार्थः स्थितः। तथा च तस्य प्रयोगः—

सत्याकुर्वन् बृहद्भानौ जुह्वञ्छूलाकृता वपाः।
मद्राकृतवपुर्यज्ञे तत्रे तेन द्विजव्रतः ।।[2]

सत्याकुर्वन्, बृहद्भानौ च शूलाकृता वपा जुह्वन्नित्यन्वयः। "सत्याकुर्वन् सत्यमाचक्षाणस्सदा" इतीयमत्र काव्यकृतः स्वोपज्ञा टीका।[3]

अनर्घराघवे च परिज्ञात इत्यर्थे सत्याकृत इति प्रयुज्यते—

अगस्त्याज्ञासद्यःशमितविपुलोच्छायविषमा-
नुदस्यन्तः सेतावलगितवतो विन्ध्यशिखरान्।
शिरस्सङ्ख्यासत्याकृतदशमुखालोकरभसा-
दुपेत्यातित्रस्ताश्चपलमपसर्पन्ति कपयः ।।[4]

अथेह पूर्वप्रदर्शितं वृत्तिकारसम्मतमुदाहरणं स एव च तस्यार्थो भाषावृत्तिकृता[5] तथाऽन्यैश्च भट्टोजिदीक्षित[6]-नारायणभट्ट[7]-नागेशभट्ट[8]-ओरम्भट्ट[9]-अन्नभट्ट[10]-प्रभृतिभिर्वैय्याकरणैर्ग्रन्थकारैरङ्गीक्रियते। सुभद्राहरणप्रणेतुरनर्घराघवकारस्य च प्रयोगौ तु तस्माद् भिद्यते, परस्परमपि च समानार्थतां न भजतः। एवं प्रतीयते—सत्यादशपथे—इति शपथभिन्नेऽर्थे प्रत्ययविधानम्, तेन तद्भिन्ने कस्मिंश्चिदपि सम्भवेऽर्थे प्रत्ययो भवतीति मनसिकृत्य ताभ्यां तथा प्रयुक्तं स्याात्।

---

1. अर्जुन० 17.52,
2. सुभद्रा० 9.77,
3. सुभद्रा० 9.77, पृ० 225,
4. अनर्घ० 6.32,
5. भाषा० 5.4.60,
6. सि० कौ०, तद्धितप्रकरणम्, पृ० 168, निर्णय०।
7. प्र० सर्व०, तद्धितखण्डः, तृतीयभागः, पृ० 217,
8. बृहच्छब्दे०, (द्वितीयभागः) तद्धितप्रकरणम्, पृ० 1549,
9. व्या० दी० 5.4.66,
10. पा० मिता० 5.4.66,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तमोऽध्यायः

काशिकावृत्ति-षष्ठाध्यायगत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च।

सूत्रम्-उष्ट्रः सादिवाम्योः। (6-2-40)

समासस्वरविधानप्रकरणमिदम्। उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकृतिस्वरं भवति। उष्ट्रसादिः, उष्ट्रवामी —इत्युदाहरणे भवतः। उष्ट्रशब्द उषेः ष्ट्रन्प्रत्ययान्त [1] आद्युदात्तः [2]। तेनेत्थं स्वरो भवति—उष्ट्रसादिः, उष्ट्रवामी इति।

उष्ट्रसादिः

इह षष्ठीसमासे मते उष्ट्रस्य सादिः—उष्ट्रसादिरित्यर्थो भवति। सादिशब्दोऽयम् इञन्तो[3] दृश्यते णिन्यन्तश्च[4]—सादिः—सादी—इति। इह सूत्रे द्वयोरपि ग्रहणम् इति व्याख्यातुं शक्यते विशेषनिर्देशाभावात्। एतस्मादेव उदाहरणम् अपि उभयथा लभ्यते—क्वचिद् उष्ट्रसादिः—इति इञन्तः, क्वचिच्च उष्ट्रसादी इति णिन्यन्तः[5]। उभयरूपोऽप्ययं शब्दः प्रायेण तुरङ्गमातङ्गरथारोहेषु

---

1. "उषिखनिभ्यां कित्"। उणा० 4.163,
2. ञ्नित्यादिर्नित्यम्। अष्टा० 6.1.191,
3. वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्। उणा० 4.126,
4. आवश्यकाधमर्ण्ययोर्णिनिः। अष्टा० 3.3.170,
5. काशिकायाम् उष्ट्रसादिरिति ह्रस्वान्तः पठ्यते।
   द्र०—काशिका 6.2.40,
   पाणिनीयमिताक्षरायाम् (6.2.40) अपि उष्ट्रसादिरिति ह्रस्वान्तः पठ्यते। सिद्धान्तकौमुद्यां तु "उष्ट्रसादी" इति पठ्यते।
   द्र०—सि० कौ०, समासस्वरप्रकरणम्, पृ० 362, निर्णय० 1929 ई०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृश्यते[1]। इह उष्ट्रसम्बन्धाद् उष्ट्रारोह इत्यर्थो व्यज्यते। उष्ट्रस्य सादः सादी वेति। सीदत्यवश्यम् अश्वादिकम् इति सादी[2]। एवम् इञन्तोऽपि सीदतीति सादिः[3]। अथवा सादयति गमयति अश्वादिकम् इति सादी, सदेर्ण्यन्ताण्णिनिः[4]। एवं · सादिरिति इञन्तोऽप्यन्तर्भावितण्यर्थ-एतदर्थकः स्यात्। अथैवं व्युत्पत्त्या अनयोर्द्वयोरप्यर्थः सारथिरित्यपि भवति। अत एव यादवप्रकाशाचार्यः "साद्यश्वारोहसूतयोः"[5] इत्याह।[6] हेमचन्द्रमेदिनीकराभ्यामपि[7] "सादी" इत्यस्य रथारोहः = (सारथिः) इत्यर्थोऽपि निर्दिष्टः। इञन्तश्च सादिरिति उणादिव्याख्यायां महादेववेदान्तिना सारथिपर्यायः प्रोक्तः[8]। भट्टोजिदीक्षितेन[9] स्वामिदयानन्देन[10] चाप्येतदेव प्रतिपादितम् अयमेव च

---

1. अमरस्तु अश्वारोहे पठति—"रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः" इति। अमर० 2.8.60,
मेदिनीकरस्तु—"सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते" इत्याह।
द्र०—मेदि० 20.52, पृ० 94,
सादिरिति ह्रस्वान्तोऽपि आश्वादेरारोहे सारथौ चेति समनन्तरमेव प्रतिपाद्यते।
2. आवश्यकाधमर्ण्ययोर्णिनिः (अष्टा० 3.3.170) इति णिनिः। यथाह रामाश्रमः "अश्वारोहास्तु सादिनः" इत्यमरवचनविवरणे–"सीदन्त्यवश्यम्। षद्लृ विशरणादौ। "आवश्यका"० इति णिनिः"। द्र० - अमर० (रामाश्रमीटीकोपेतः) 2.8.60, पृ० 373,
3. उणादिकोषः 4. 126,
4. आवश्यकाधमर्ण्ययोर्णिनिः। अष्टा. 3. 3. 170,
5. वैज० 6.1.65, पृ० 163,
6. सादी तुरङ्गमारोहे निषादिरथिनोरपि।
अनेकार्थसङ्ग्रहः 2.2.93, पृ. 25,
7. सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते।
मेदि० 20.52च पृ० 94,
8. "सादिस्तु सारथौ प्रोक्तः"।
उणादिकोशः (महादेववेदान्तिविरचितः) 4.124, पृ० 95,
9. द्र० – सि० कौ०, उणादिप्रकरणम्, चतुर्थः पादः, पृ० 312, निर्णय०।
10. सीदतीति सादिः, सारथिर्वा।
उणादि० (स्वामिदयानन्दकृतः) 4. 126,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सादिरिति इञन्तः शब्दो दशपाद्युणादिवृत्तौ अश्वारोहे निर्दिष्टः[1]। इत्थमेतत् सर्वं व्याख्यानं दृष्ट्वा सादिः सादी इत्यनयोरश्वादेरारोहः सारथिश्चेत्यर्थौ मन्तुं शक्यते। इह पुनरुष्ट्रसम्बन्धाद् उष्ट्रारोह इत्यर्थो गम्यते। यदि च लोके उष्ट्ररथो दृश्यते तर्हि प्रकृतोदाहरणस्य उष्ट्रसारथिरित्यर्थस्वीकरणेऽपि नहि कापि विप्रतिपत्तिरस्ति।

षष्ठीसमासे मतेऽयमर्थो लभ्यते। वृत्तौ त्विह–"कर्मधारयोऽयं षष्ठीसमासो[2] वा" इत्युक्तम्–कर्मधारयपक्षे कथमुदाहरणार्थसङ्गतिः भविष्यतीति वृत्तिकार एव वेत्तु। न्यासकृता पदमञ्जरीकर्त्रा च वृत्तिकारस्यैतत् कथनमधिकृत्य न काचिट्टिप्पणी कृता। स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवासयज्वमहाभागस्तु एतत्कथनं टीकयन्नाह–"कर्मधारयः षष्ठीतत्पुरुषो वेति वृत्तिः। आद्ये = (कर्मधारये) अश्वारोहे अश्वायां च प्रसिद्धयोः सादिवामीशब्दयोरुष्ट्रे गौणी वृत्तिरित्याहुः[3] इति। अथैवं मते सति उष्ट्रश्चासौ सादी च–इति कथमर्थसङ्गतिरिति न किञ्चित् स्फुटीकृतं यज्व–महाभागेन।

वासुदेवशरण-अग्रवालमहोदयेन प्रकृतोदाहरणस्य उष्ट्रस्य उष्ट्र्या वा आरोहः (सवार) इत्येवार्थो निर्दिष्टः[4]। श्रीराधारमणपाण्डेयेन त्विदमुदाहरणम् "उष्ट्राणां वधस्य कारयिता" इत्येवमर्थापितम्[5]। सदेर्विशरणार्थं पुरस्कृत्यायमर्थः कृत इति प्रतीयते।

---

1. सीदतीति सादिः अश्वारोहः। कर्त्ता।
   दशपाद्युणादिवृत्तिः 1.53, पृ० 33-34,
2. काशिका 6.2.40,
3. स्वर० चं० सूत्रसङ्ख्या 203, पृ० 222,
4. "ऊंट या सांडनी के सवार उष्ट्रसादि कहलाते थे"।
   पाणि० भार० अ० 3, परि० 12, पृ० 155,
   सांडनी सवारों का विशेष रूप से उल्लेख किया गया है। जिन्हें उष्ट्रसादि कहते थे।
   पाणि० भार०, अ० 7, परि० 4, पृ० 409,
   सांडनी सवार उष्ट्रसादि और ऊंट और खच्चर की मिलीजुली टुकड़ी उष्ट्रवामि कहलाती थी।
   पाणि० भार० अ० 4, परि० 3, पृ० 210,
5. उष्ट्रसादी = ऊंटों का वध कराने वाला।
   अर्थप्र० समासस्वरप्रकरणम, पृ० 221

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उष्ट्रस्वामी–

इत्यपरमुदाहरणमत्र। इहापि पूर्ववत् स्वरः–उष्ट्रवामी इति। वामीशब्दो ङ्यन्तः स्त्रियां वर्त्तमानोऽश्वायां प्रसिद्धः। अमरकोशेऽयमश्वापर्यायत्वेन पठितः[1]। वैजयन्तीकोषकारोऽप्येनमश्वापर्यायेषु परिगणयति[2]। हेमचन्द्राचार्यश्चास्य शब्दस्य शृगाली, करभी, रासभी, इत्यन्यानपि अर्थान् सङ्गृहणाति[3]। मेदिनीकोषकारोऽपि हेमचन्द्रनिर्दिष्टान् अर्थान् परिगणयति[4]। अथेह वामीशब्दस्य सर्वेष्वप्येतेष्वर्थेषु सत्सु षष्ठीतत्पुरुष-समासे–उष्ट्रस्य वामी इति न काचिद् अर्थसंगतिर्भवति। कर्मधारये चापि उष्ट्रश्चासौ वामी च इति नहि कश्चिदर्थ उपपद्यते। इह "कर्मधारयोऽयं षष्ठीसमासो वा"[5] इति वृत्तावुक्तम्। तत्र कर्मधारये कथमुदाहरणार्थसंगतिरिति विशद्ययितुकामः स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवासयज्वा प्राह–"आद्ये = (कर्मधारये मते) अश्वारोहे अश्वायां च प्रसिद्धयोः सादिवामीशब्दयोरुष्ट्रे गौणी वृत्तिरित्याहुः[6] इति। अथैवं मते सत्यपि कथमुदाहरणार्थो भवतीति न किञ्चित् स्फुटीकृतं यज्वमहाभागेन।

वासुदेवशरण–अग्रवालमहोदयेन त्वस्योदाहरणस्य उष्ट्राणां वामीनाम् = अश्वतराणां च समुदितो गण इत्यर्थः प्रतिपादितः, स गणः सेनाङ्गभूतः सेनायां शीघ्रप्रयाणार्थमुपयुज्यते स्म इति सम्भावितम्[7]। अत्रेदमवधेयं यद् वामीशब्दस्य

---

1. "वाम्यश्वा वडवा" (अमर. 2.8.46) इह रामाश्रम आह वामयतीति। टुवम उद्गिरणे। स्वार्थण्यन्तः अच्। "मितां ह्रस्वः" इत्यत्र वा इत्यनुवृत्तेर्न ह्रस्वः। गौरादिः।
   अमर० (रामाश्रमीटीकोपेतः) 2.8.46, पृ० 367,
2. "वाम्यश्वावडवाऽर्वती" वैज० 3.7. 107, पृ० 81,
3. वामी श्रृगाल्यां करभी रासभी वडवासु च।
   अनेकार्थ० 2. 341, पृ० 29,
4. वामी श्रृगालीवडवारासभीकरभीषु च।
   मेदि० 25.30, पृ. 110,
5. काशिका 6.2.40,
6. स्वर० चं० सूत्रसङ्ख्या 203, पृ० 222,
7. सांडनी सवार उष्ट्रसादि और ऊंट और खच्चर की मिली जुली टुकड़ी उष्ट्रवामी (उष्ट्रः सादिवाम्योः 6.2.40) कहलाती थी। ज्ञात होता है सेना में शीघ्र प्रयाण के लिये इनका उपयोग होता था। पाणि० भार० अ० 4, परि० 3, पृ० 210,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अग्रवाल-निर्दिष्टोऽयमर्थः कोशग्रन्थेषु नोपलभ्यते। द्वन्द्वसमासमाश्रित्य च उदाहरणार्थस्तेनात्र प्रतिपादितः[1]। वृत्तिकारेण त्विह द्वन्द्वसमासो न मतः, यत्स आह—"कर्मधारयोऽयं षष्ठीसमासो वा"[2] इति।

मङ्खकोशे वामीशब्दस्य "अश्वा" इत्यर्थेन सह गन्त्री इत्यपरोऽप्यर्थो निर्दिष्टः[3]। अस्मिन्नर्थे सति उष्ट्रस्य वामी = (गन्त्री) उष्ट्रवामी इति षष्ठीसमासे सम्यगर्थसङ्गतिर्भवति। अस्योदाहरणस्यायमेवार्थः प्रतीयते।

---

1. द्वन्द्वसमासाश्रयणे तु "उष्ट्रवाम्यः" इत्युदाहरणं स्यात् परम् अग्रवालमहोदयेन उष्ट्रवामीगणस्य सेनाङ्गतां सम्भाव्य—"द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (अष्टा० 2.4.2) इत्येकवद्भावमाश्रित्य "स नपुंसकम्" (अष्टा० 2.4.17) इति नपुसंकत्वे, "ह्रस्वो नपुंसके प्रातिपदिकस्य" (अष्टा० 1.2.47) इति ह्रस्वे च "उष्ट्रवामि" इति ह्रस्वान्तम् उदाहरणं मतम् इति प्रतीयते। उदाहरणस्यास्य ह्रस्वान्तो हि पाठस्तद्ग्रन्थे दृश्यते।
   उपलभ्यमानेषु काशिकापुस्तकेष्वपि "उष्ट्रवामि" इत्येवंरूपः पाठो दृश्यते। अथेह स्वहस्तगतानि कानिचित् संस्करणानि निर्दिश्यन्ते येष्वयं पाठो दृष्टः।
   1 चौखम्बा संस्कृत ग्रन्थमाला बनारस-1, तृतीयसंस्करणम्, 1925 ई० सम्पादकः—शोभितमिश्रः।
   2. चौखम्बासंस्कृतग्रन्थमाला बनारस- 1, चतुर्थसंस्करण, 1969 ई० सम्पादकः—श्री नारायणमिश्रः।
   3. न्यासपदमञ्जरीकाशिकासंस्करणम्, द्वारिकादासशास्त्रिकालिकाप्रसादशुक्लाभ्यां सम्पादितम् 1967 ई०, ताराप्रकाशन वाराणसी।
   4. उस्मानिया विश्वविद्यालयसंस्कृतपरिषदा प्रकाशितं संस्करणम् 1970 ई०।
   इहोदाहरणार्थविमर्शनप्रसङ्गेन "उष्ट्रवामी" इति ङ्यन्तस्य पाठस्य युक्तता गम्यते। सिद्धान्तकौमुद्या विविधसंस्करणेषु अयमेव पाठो दृश्यते। तद्यथा—
   1. निर्णयसागरसंस्करणम् पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्म-सम्पादितम्। दशमावृत्तिः। 1929 ई.।
   2. चौखम्भा ओरियन्टालिया, द्वितीयसंस्करणम्, कृष्णस्वरूपकाव्यतीर्थसम्पादितम्,
   3. बालमनोरमायुतसंस्करणम् (चतुर्थखण्डम्) श्रीगोपालशास्त्रिनेनेसम्पादितम्। 1979 ई०।
   4. वेङ्कटेश्वर—स्टीम-मुद्रणालयसंस्करणम्, पण्डितशिवदत्तदाधिमथसम्पादितम्। वि० संवत् 1971।
2. काशिका 6.2.40,
3. "वाम्याश्वा हार्यवस्त्वर्थवाहयुग्मकृते ऽपि सा"। इति मङ्ख, श्लोकः 581, इह कोशकृतः टीकासाराख्या स्वोपज्ञा व्याख्या—"वामी अश्वायाम्। तवामी वामीभिः सदनसविधा भान्ति सुचिरम्। हार्यवस्त्वर्थवाहयुग्मकृते नेतव्यपदार्थप्रयोजनवाहनद्वयसम्पादिते गन्त्र्यादौ। द्र०—मङ्ख; श्लोकः 581, पृ० 79,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कालिदासेन रघुवंशे उष्ट्रवामीशब्दः प्रयुज्यते—

अथोष्ट्रवामी[1] शतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः।
स्पृशन् करेणानतपूर्वकायं सम्प्रस्थितो वाचमुवाच कौत्सः॥[2]

मल्लिनाथेन त्विह—"उष्ट्राणां क्रमेलकानां वामीनां वडवानां च शतैर्वाहितार्थं प्रापितधनम्" इत्यर्थो व्याख्यातः[3]। भट्टक्षीरस्वामिनाऽप्यस्य प्रयोगस्यायमेवार्थो मतः[4]। परम् इह विपुलतरदक्षिणार्थप्रापणप्रसङ्गे उष्ट्रवामीनाम् = उष्ट्रगन्त्रीणां शतैरित्याद्यर्थः तदपेक्षया विशेषेण प्रसङ्गानुकूलः प्रतीयते। एवं च व्याख्यानेनार्थगौरवमप्यत्र सम्पद्यते। एतेनेयं सम्भावनापि व्यज्यते यत्काव्यकारेणामुमेवार्थमुद्दिश्यायं शब्दोऽत्र प्रयुक्तः स्यादिति।

श्रीराधारमणपाण्डेयेन "उष्ट्रवामी" इत्यस्य उष्ट्राणां वामयिता = वमनकारयिता इत्यर्थो मतः[5]। अयुक्तः खल्वयमर्थः।

सूत्रम्-गौः सादसादिसारथिषु। (6.2.41)

गोशब्दः पूर्वपदं साद सादि सारथि इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति। प्रकृतिस्वरेण चायमुदात्तः "गमेर्डोः[6]" इति डोस्प्रत्ययान्तत्वात्। अथास्योदाहरणानीत्थं प्रदर्शयति वृत्तिकारः - गोः सादः = गोसादः। गां सादयतीति वा गोसादः। गोः सादिः = गोसादिः। गोः सारथिः = गोसारथिः[7] इति।

---

1. वासुदेवशरण-अग्रवालमहोदयेन उष्ट्रवाम्योः सेनाङ्गतां सम्भाव्य तद्द्वन्द्वस्यैकवद्भावे नपुंसकत्वे ह्रस्वत्वे च कृते "उष्ट्रवामि" इत्युदाहरणं मन्यते—इत्युक्तम्। यदि उष्ट्रवाम्योः सेनाङ्गता प्रसिद्धा स्यात्तर्हि कालिदासो ऽप्यत्र ह्रस्वान्तं प्रयुञ्जीत, परं तेन तु दीर्घान्तमेव प्रयुक्तम् इति छन्दःस्थित्या सुस्पष्टमस्ति।
2. रघु० 5.32,
3. रघु० (सञ्जीवनो समेतम्) 5.32, पृ० 102, चौखम्बा- 1938 ई०।
4. "वाम्यश्वा वडवा" इत्यमरवचनं व्याख्यन्नाह क्षीरस्वामी—"वाम्यते गर्भं वामी, यल्लक्ष्यमथोष्ट्रवामीशत (हारि) वाहितार्थम्" इति। अमर० (अमरकोशोद्घाटन-व्याख्योपेतः) 2.8.47, पृ० 129,
5. ऊंटों को वमन करने वाला। अर्थप्र० समासस्वरप्रकरणम्, पृ० 221,
6. उणा० 2.68,
7. काशिका 6.2.41,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह सर्वेषूदाहरणेषु वृत्तिकृता षष्ठीसमासः प्रदर्शितः। प्रथमे तूपपदसमासोऽपि। इह सारथिरिति स्पष्टोऽर्थः। सादिरिति शब्दोऽपि सारथौ दृश्यत इति पूर्वसूत्रस्य उष्ट्रसादिरित्युदाहरणविवरणे स्पष्टम्[1]। अनयोः साहचर्येण सादशब्दो ऽपि एतदर्थक एवेति प्रतीयते, सादयति गमयतीति कृत्वा सदेर्ण्यन्तात् पचाद्यच्[2]। एवमेषां त्रयाणामप्युदाहरणानां गोः सारथिरिति समान एवार्थो लभ्यते। गां सादयति गमयतीति व्युत्पत्तेः सदेर्ण्यन्तात् कर्मण्यण्।[3]

सादिरितिशब्दोऽश्वादेराहरोहेऽपि प्रतिपाद्यमानो दृश्यत इति पूर्वसूत्रस्य उष्ट्रसादिरित्युदाहरणविवरणे वर्णितम्[4]। अथेहापि तस्मिन्नर्थे मते गोसादिरित्यस्य गवारोह इत्यर्थोऽपि लभ्यते। एवं साद इत्यस्याप्यपरोऽर्थः आरोहः = (सवार) इति मन्तुं शक्यते। सादयति गमयति गामारुह्येति सादः, सदेर्ण्यन्तात् पचाद्यच्। गोः सादो गोसादः गवारोहः (बैल का सवार) इत्यर्थः। एवम् उपपदसमासपक्षे ऽपि गां सादयति गमयत्यारूढः सन्निति गोसादः, (सदेर्ण्यन्तात् कर्मण्यण्) इत्ययमेवार्थो भवति। वासुदेवशरण-अग्रवालमहोदयेनास्य गोसादिशब्दस्य चाप्ययमेवार्थो मतः[5]।

सादिरिति वृत्तौ औणदिक इञन्तो गृहीतः। अत एव काशिकापुस्तकेषु गोसादिरिति पाठो दृश्यते। "गौः सादसादिसारथिषु" इति सूत्रविन्यासं दृष्ट्वा सादी इति णिन्यन्तोऽपि ग्रहीतुं शक्यते, विशेषनिर्देशभावात्। हरदत्तमिश्रेण तु सादी इति णिन्यन्त एवं गृहीतः[6]। णिन्यन्ते गृहीते गोसादी इत्युदाहरणं भवति। अस्यापि स एवार्थो यः पुरस्तादुक्तः। यतः सादी इति णिन्यन्तोऽपि अश्वादेरारोहे सारथौ च वर्तते इति उष्ट्रसादिरिति पूर्वसूत्रोदाहरणविवेचने स्थितम्[7]।

---

1. तथा हि तत्र निर्दिष्टम्–"सादिस्तु सारथौ प्रोक्तः" उणा० (महादेववेदान्तिकृतः) 4.124, "साद्यश्वारोहसूतयोः" वैज० 6.1.65, इत्यादि।
2. "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः, अष्टा० 3.1.134,
3. अष्टा० 3.2.1,
4. तथा हि तत्र निर्दिष्टम्–"सादिस्तु सारथौ प्रोक्तः"–उणा० (महादेववेदान्तिकृतः) 4.124, सीदतीति सादिः–अश्वारोहः कर्त्ता। दशपाद्युणादिवृत्तिः 1.53, पृ० 33-34,
5. बैलों पर सवारी करने वाले गोसाद, गोसादिन् (6.2.42) पाणि० भार० अ० 3, परि० 12, पृ० 155,
6. गां सादयति वेति। सदेर्ण्यन्तात् कर्मण्यण्। तस्मादेव णिनिः गोसादी। पद. 6.2.41,
7. तत्र हि–"साद्यश्वारोहसूतयोः" वैज० 6.1.65, इत्यादिभिरेतत् प्रतिपादितम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गोसाद इत्युदाहरणविवरणे षष्ठीसमासपक्षे पदमञ्जरीकार आह—"सदेर्घञ्, ततः षष्ठीसमासः"[1] इति। घञन्तस्य भावे वर्त्तमानत्वात् साद इत्यस्य धात्वर्थानुसारतो[2] विशरणं = विनाशो गतिरवसादनं चेत्यर्था लभ्यन्ते। एवं तन्मते गोसाद इत्यस्य गोर्विनाशो गतिरवसादनं चेत्यर्थाः स्वीकर्त्तव्या भवन्ति।

न्यासकारस्य मतेन चेह सदेर्विशरणार्थत्वात् षष्ठी समासे गोर्विशरणं = (विनाशः) उपपदसमासे च गोर्विशरणकर्त्ता = हिसंक इत्यर्थो भवति।[3]

---

1 पद० 6.2.41,

2. षद्लृ विशरणगत्यवसादनेषु।
मा० धातु० भ्वादि० 583, पृ०217,

3. सदेर्विशरणार्थत्वात् गोशब्दे कर्मण्युपपेद गोसाद इति भवति।
न्यासः 6.2.41,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–आज्ञायिनि च। (6-3-5)

आज्ञायिन्युत्तरपदे मनस उत्तरस्यास्तृतीयाया अलुग् विधीयते। मनसाज्ञायी इत्युदाहरणम्। एतत्स्पष्टयन् वृत्तिकार आह–"मनसाऽज्ञातुं शीलमस्य मनसाज्ञायी"[1]। इह ताच्छील्ये णिनिर्वर्त्तते[2]। मनसा आसमन्ताद् ज्ञातुं शीलं यस्य स मनसाज्ञायी इति गम्यते। भाषावृत्तिकार इह "मनसाज्ञायिनो योगिनः"[3] इति वाक्यमुदाहरणत्वेनोपस्थापयति। द्व्याश्रयकाव्ये मनसाज्ञायी इति विदुषो विशेषणत्वेन प्रयुज्यते इति तट्टीकायां स्पष्टम्[4]।

---

1. काशिका 6.3.5,
2. सुप्यजातौ णिनिस्ताच्छील्ये।अष्टा० 3.2.78,
3. भाषा० 6.3.5,
4. द्र०–द्व्या० (सटीकम्) प्रथम भागः 6.11, पृ० 451, काशिका 6.3.12

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–अमूर्धमस्तकात् स्वाङ्गादकामे। (6-3-12)

इह कण्ठेकालः उरसिलोमा, उदरेमणिः इति वृत्तिगतान्युदाहरणानि। अथैषामर्थो विमृश्यते—

कण्ठेकालः

"कण्ठे कालोऽस्य कण्ठेकालः" इति वृत्तिकार-सम्मतं विग्रहवाक्यम्[1]। कालशब्देनेह कालकूटो विषविशेषोऽभिप्रेत इति प्रतीयते। "पदेषु पदैकदेशाः प्रयुज्यन्ते"[2] इति नियमेनैतद् बोध्यम्। एवं सति कण्ठे विद्यते कालः कालकूटाख्यो गरो यस्य स कण्ठेकालः[3]। अथवा यस्य कण्ठे साक्षात् कालः कालरूपो गरलः स कण्ठेकालः। शङ्करश्च तथाभूतत्वाद् अनेनाभिधानेनाभिधीयते। यथाह हेमचन्द्र :—

"कण्ठेकालः शङ्करो नीलकण्ठः" इति।[4]

भोजराजप्रणीते शृङ्गारप्रकाशे तु "कण्ठे स्थिताः काला अस्य[5]" इति विग्रहवाक्यं दृश्यते। तत्र कालशब्दः कृष्णसर्पपर्यायोऽस्तीति गम्यते। दृश्यते चास्मिन्नर्थेऽस्य शब्दस्य प्रयोगः। यथा हि बाणभट्टः कादम्बर्यां (शुकनासोपदेशे) प्रयुङ्क्ते—

---

1. काशिका 6.3.12,
2. म० भा० 1.1.45,
3. कण्ठेकालः = शङ्करः समुद्रमन्थनोद्भूतं कालकूटाख्यं विषं निपीय कण्ठे धारितवानिति प्रसिद्धिमेव पौराणिकमाख्यानम्।
4. अभि० 2.109,
5. शृङ्गार० प्रथमप्रकाशः, पृ० 32, द्वितीयप्रकाशः, पृ० 63,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते"[1] इति।

एवमिहापि कण्ठे स्थिताः कालाः कृष्णसर्पा अस्येति कण्ठेकालः स एव महादेवः। चान्द्रवृत्तावपि शृङ्गारप्रकाशवाक्यसदृशमेव विग्रहवाक्यं लभ्यते[2]। वासुदेवविजये द्व्याश्रयकाव्ये च शङ्करपर्यायत्वेन कण्ठेकाल इति प्रयोगो दृश्यते। वासुदेवविजये तावत्—

"कः कालनेमेरितरो हि कण्ठेकालाङ्घ्रिभागी निपुणः सीमित्याम्"[3]।

द्व्याश्रयकाव्ये—

नृपं प्रणम्योरसिलोमकण्ठेकालोपमं मूर्धशिखो न्यषीदत्।[4]

उरसिलोमा—

उरसि लोमानि यस्य स उरसिलोमा इत्युच्यते। शृङ्गारप्रकाशेऽयमेवार्थः सङ्केत्यते[5]। उपर्युद्धृते द्व्याश्रयकाव्यस्य पद्ये चेदं प्रयुक्तं दृश्यते।

अर्जुनरावणीये एतत्सदृश एव उरसिबाण इति प्रयोगो दृश्यते—

"प्रसह्य राजा ततचारुचापश्शत्रुं चकारोरसिबाणमाशु[6]" इति।

भाषावृत्तावयं प्रयोगः प्रकृतसूत्रस्योदाहरणत्वेनोद्धृतो लभ्यते।[7]

उदरेमणिः—

उदरे मणयो यस्य स उदरेमणिरित्यर्थोऽत्र गम्यते। समुद्रस्य कृतेऽयं शब्दः प्रयुक्तः स्यादिति प्रतीयते। प्रमाणं त्वत्र मृग्यम्। अर्जुनरावणीये इदं समुद्रस्य विशेषणत्वेन प्रयुज्यते—

तिमिरप्रतानविनिरुद्धदिङ्मुखं गगनं परिस्फुरिततारकाशतम्।
विलसद्भुजङ्गतनुमेचकं बभावुदरेमणिं जलनिधिं व्यडम्बयत्[8]॥

---

1. शुकनासोपदेशः, पृ० 58,
2. चान्द्र० 2.2.46, पृ० 2.5
3. वासु० 3.31,
4. द्व्या० (प्रथम भागः) 6.15,
5. "उरसि जातानि लोमान्यस्य"। शृङ्गारप्रकाशे प्रथमप्रकाशः, पृ० 32,
6. अर्जुन० 19.5,
7. भाषा० 6.3.12,
8. अर्जुन० 5.33

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–प्रावृट्शरत्कालदिवां जे। (6.3.15)

अलुक्पक्षे प्रावृषिजः, शरदिजः, कालेजः, दिविज इत्युदाहरणानि भवन्ति।

प्रावृषिजः–

प्रावृषि वर्षासु जातः प्रावृषिजः[1]। यत् किञ्चिद् वर्षासु जायते तत्राविशेषेणेदं प्रयुज्यते। तद्यथा भट्टिकाव्ये–

एष प्रावृषिजाम्भोदनादी भ्राता विरौति ते।[2]

इहाम्भोदविशेषणत्वेन प्रयुक्तम्। अर्जुनरावणीये–

दशाननोऽप्यञ्जनशैलकान्तिर्मुमोच धारा इव बाणमालाः।
नराधिपस्योपरि वीतरन्ध्रा विडम्बयन् प्रावृषिजाम्बुवाहम्॥[3]

इहाप्यम्बुदविशेषणत्वेन प्रयुक्तम्। शिशुपालवधे–

इति पूर इवोदकस्य यः सरितां प्रावृषिजस्तटद्रुमैः।[4]

इह पयःपूरस्य विशेषणत्वेन प्रयुक्तम्। राजनिघण्टौ–

नद्यः प्रावृषिजास्तु पीनसकफश्वासार्त्तिकासप्रदाः।[5]

---

1. सप्तम्यां जनेर्डः। अष्टा० 3.2.97,
2. भट्टि० 5. 54,
3. अर्जुन० 19.6,
4. शिशु० 16.75,
5. रा० नि० पानीयादिवर्गः, श्लोकः 42,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह नदीविशेषणत्वेन इति।

पुरुषोत्तमदेवन तु त्रिकाण्डशेषकोषे प्रावृषिज इति झञ्झानिलस्य पर्यायत्वेन पठ्यते [1]। अस्मिन्नर्थेऽस्य प्रयोगो मृग्यः।

शरदिजः–

शरदि जातः शरदिजः। शरदि जातस्य विशेषणत्वेनेदं प्रयुज्यते। तद्यथा अर्जुनरावणीये–

क्षितिपतिर्विरराज शिलीमुखैः शरदिजाम्बुरुहाकरवच्चिरम्। [2]

इहाम्बुरुहविशेषणत्वेन प्रयुक्तम्। राजनिघण्टौ–

पथ्या वातकफापहाः शरदिजा हेमन्तजा बुद्धिदाः। [3]

इह नदीविशेषणत्वेन प्रयुक्तम्। उत्तररामचरिते–

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं, शरदिज इव धर्मः केतकी पत्रगर्भम्। [4]

इह घर्मस्य विशेषणत्वेन इति।

कालेजः–

काले जातः कालेजः। काले जातस्य विशेषणत्वेनेदं प्रयुज्यत इति गम्यते। अस्मिन्नेवार्थे द्व्याश्रयकाव्ये खल्वस्य प्रयोगो दृश्यते–

नीलं कुरोश्छत्रमिदं निरस्यत्कालेजमप्यातपशारदिज्यम्। [5]

दिविजः–

दिवि जातो दिविजः। दिवि द्युलोके जातस्य विशेषणत्वेनेदं प्रयुज्यते। तद्यथा ऋग्वेदे–

---

1. "झञ्झानिलः प्रावृषिजो वासन्तो मलयानिलः"।
त्रिकाण्ड०, प्रथमकाण्डम्, प्रथमः स्वर्गवर्गः, श्लोकः 80, निर्णय० 1889 ई०
2. अर्जुन० 19.8,
3. रा० नि०, पानीयादिवर्गः, श्लोकः 42,
4. उत्तर० 3.5,
5. द्व्या० (प्रथमभागः) 6.24,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात्।[1]

भागवते–

तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनय-नाह्लाददुघैर्गतिविहारव्रीडासुस्वराक्षरावयवैः........।[2]

इह दिविज इति दिवि जातानां, देवानां कृते प्रयुक्तम्। वासुदेवविजये–

"अवश्यलाव्या दिविजा ममाद्य ये खेचरीं वाचमुदैरिरंस्ताम्"।[3]

इहापि दिवि जाता दिविजा देवा इत्यर्थे प्रयोगः। अर्जुनरावणीये–

अभिमुखं दशवक्त्रविसर्जितैर्दिविजमारुतवेगविलङ्घिभिः।
क्षितिपतिर्विरराज शिलीमुखैः..॥[4]

इह स्वर्गजात-मारुतविशेषणत्वेन प्रयुक्तम् इति।

सूत्रम्–विभाषा वर्षक्षरशरवरात् (6.3.16)

वर्ष, क्षर, शर, वर, इत्येतेभ्य उत्तरस्याः सप्तम्या ज उत्तरपदे विभाषा लुग् विधीयते। वर्षेजः, वर्षजः। क्षरेजः, क्षरजः। शरेजः, शरजः। वरेजः, वरजः, इत्युदाहरणानि।

वर्षेजः–वर्षे जातो वर्षेजः। वर्षशब्दोऽयं बह्वर्थकः। तथाहि हेमचन्द्र आह–

"वर्षस्तु समाद्वीपाब्दवृष्टिषु, वर्षधरेऽपि"[5]।

एवं मेदिनीकरोऽप्यस्य बहूनर्थान् सङ्गृह्णाति–

---

1. ऋग्० 7.75.1,
2. श्रीमद्भागवतमहापुराणम् 5.2.6, पृ० 427,
3. वासु० 2.18,
4. अर्जुन० 19.8
5. अनेकार्थ० 2. 574-75, पृ० 46,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्षोऽस्त्री भारतादौ च जम्बुद्वीपाब्दवृष्टिषु।

प्रावृट्काले स्त्रियां भूम्नि,...................... ॥ [1] इति।

अविशेषेणेमे निर्दिष्टा अर्था अत्र गृहीताः स्युः। शिष्टप्रयोगानुसारतश्चेमे ऽर्था उन्नेयाः। अथ प्रयोगाः। वासुदेवविजये—

नूनं गृहेशूर इतीमके मां क्षिपन्ति वर्षेजजलानिर्वायम्। [2]

इह वर्षे वृष्टौ प्रावृट्काले वा जातो वर्षेज इत्यर्थो गम्यते। द्व्याश्रयकाव्ये—

अब्जान्यसायाह्नशयानिवर्षेजसेवयाप्तानि शरेजदेवात्।

स वर्षजे दण्ड इमान्यदात्तेऽप्सुजाक्ष राजा शरजाचलस्य॥ [3]

इह संवत्सरार्थे वर्षशब्दं मत्वा प्रयोग इति टीकाकृदभयतिलकगणी। [4]

क्षरेज :—

क्षरशब्दो मेघपर्यायो दृश्यते। क्षरति मुञ्चति जलम् इति क्षरो मेघः। जलपर्यायश्च क्लीबे—क्षरति स्रवतीति क्षरं जलम् इति। हेमचन्द्रेण[5] मेदिनीकरेण[6] च मेघशब्दस्य द्वावपीमावर्थौ निर्दिष्टौ। अविशेषेणेह द्वयोरपि ग्रहणं स्यात्। एवं क्षरेज इत्यस्य मेघे जले वा जात इत्यर्थो लभ्यते। अनयोरर्थयोरस्य प्रयोगस्तु मृग्यः।

शरेजः —

शरे जातः शरेजः। शरशब्दो ऽप्यनेकार्थः, तथाहि हेमचन्द्र आह—

शरं जले। शरः पुनर्दधिसारे काण्डतेजनयोरपि। [7]

---

1. मेदि॰ 31.24, पृ॰ 167,
2. वासु॰ 2.18,
3. द्व्या॰ (प्रथमभागः) 6.21, पृ॰ 457,
4. द्व्या॰ (प्रथमभागः) 6.21, पृ॰ 457,
5. क्षरो मेघे क्षरं जले। अनेकार्थ॰ 2.402, पृ॰ 33,
6. क्षरं नीरे क्षरोऽम्बुदे। मेदि॰ 27.11, पृ॰ 123
7. अनेकार्थ॰ 2.462-63, पृ॰ 38,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतानेवार्थान् मेदिनीकरोऽपि परिगणयति[1]। इह निर्दिष्टा इमेऽर्था अविशेषेणात्र गृहीताः स्युः। शिष्ट-प्रयोगानुसारतश्चेमे ऽर्था उदाहरणेषून्नेयाः। द्व्याश्रयकाव्ये शरेज इति प्रयोगो दृश्यते—

अब्जान्यसायाह्वशयानि वर्षेजसेवयाप्तानि शरेजदेवात्।[2]

शरे = शरवणे जातः शरेजदेवः स्कन्द इत्यर्थोऽत्र गम्यते।

वरेजः –

वरे जातो वरेजः। वरशब्दोऽपि बह्वर्थको दृश्यते। तथाहि हेमचन्द्र आह—

वरो वृतौ। विटे जामातरि श्रेष्ठे देवतादेरभीप्सिते।

वरं तु घुसृणे किञ्चिदिष्टे.................................[3]। इति।

मेदिनीकरोऽपि एतानर्थान् परिगणयति[4]। कोशे निर्दिष्टा इमेऽर्था अविशेषेणात्र गृहीताः स्युः। शिष्ट-प्रयोगानुसारतश्चेमेऽर्था उदाहरणेषून्नेयाः। द्व्याश्रयकाव्ये वरेज इति प्रयोगो दृश्यते—

सरोजवासावरजो महाकालिकावरेजश्च स पद्मरागान्।[5]

इह वरशब्दो देवतादेरभीप्सितेऽर्थे वर्तते। तत्र जात वरेज इति। तथा ह्यत्र टीकाकृद् व्याख्याति—"सरोजे वासो यस्याः सा सरोजवासा लक्ष्मीस्तस्या वरः प्रसादस्तत्र जातो महाकालिकावरेजश्च गौरीप्रसादे जातश्च स—-इति।[6]

---

1. शरस्तेजनके बाणे दध्यग्रे ना शरं जले। मेदि० 27.86, 129,
2. द्व्या० (प्रथमभागः) 6.21, पृ० 457,
3. अनेकार्थ० 2.453-54, पृ० 37,
4. वरो जामातरि वृतौ देवतादेरभीप्सिते।
   षिड्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्॥
   मेदि० 27.62, पृ० 127
5. द्व्या० (प्रथमभागः) 6.22, पृ० 457,
6. द्व्या० (प्रथमभागः) 6.22, पृ० 457-58

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्-हिमकाषिहतिषु च। (6-3-54)

हिमकाषिहतिषु उत्तरपदेषु पादस्य पद् आदेशो विधीयते। पद्धिमम् पत्काषि, पद्धतिः इत्युदाहरणानि भवन्ति।

पद्धिमम्-

पादस्य पादयोर्वा हिमं शीतं पद्धिममित्यर्थः। पादयोरनुभूयमानं शीतं पद्धिमम् इति भावः। पदमञ्जरीकारेण प्रकृतोदाहरणस्यायमेवार्थो निर्दिश्यते[1]। गमने खलु पादयोर्भूतलसंसर्गात् विशेषेण शीतमनुभूयते इति तदर्थम् पद्धिमम् इति प्रयुज्यते स्मेति गम्यते। द्व्याश्रयकाव्ये चास्मिन्नेवार्थेऽस्य प्रयोगो लभ्यते-

"पद्धिमार्ता इव विप्रवेषाः"[2] इति।

पादयोर्हिममवश्यायः पद्धिमम्, तेन ऋताः पीडिता यथा......[3]। इतीयमत्र अभयतिलकगणिव्याख्या।

पत्काषी-

पादौ कषतीति पत्काषी पादचारी इत्यर्थः ताच्छील्यकोऽत्र णिनिः[4]। महाभाष्य उद्धृते श्लोके खल्वस्य शोभनः प्रयोगो दृश्यते-

---

1. पादस्य हिमं शीतं पद्धिमम्। पदं० 6.3.54,
2. द्व्या० (प्रथमभागः) 6.76, पृ० 490,
3. द्व्या० (प्रथमभागः) 6.76, पृ० 490-91
4. सुप्यजातौ णिनिस्ताच्छील्ये। अष्टा० 3.2.78,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः ।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः ॥[1]

काशिकायमपीदं पद्यमुद्धृतं दृश्यते[2]। इह "हिमकाषिहतिषु च" इति प्रकृतसूत्रव्याख्याने च वृत्तिकृता—"अथ पत्काषिणो यान्ति" इत्येव पद्यांश उदाहरणत्वेनोपस्थापितः[3]। प्रकृतोदाहरणस्य भट्टिकाव्ये रावणार्जुनीये चापि प्रयोगो लभ्यते। भट्टिकाव्ये तावत्—

मानुषो नाम पत्काषी राजानं पुरुषाशिनाम्।
योधयिष्यति सङ्ग्रामे दिव्यास्त्ररथदुर्जयम् ॥[4]
प्रास्थापयत्.........पत्काषिणस्तीर्थजलार्थमाशु।[5]

अर्जुनरावणीये च—

पत्काषिणः सादिगणा हताश्वाः पदातिभिस्तत्र समं विचेरुः[6]। इति।

पद्धतिः –

गादाभ्यां हन्यत इति पद्धतिः। सूत्रनिर्दिष्टेन क्तिन्नन्तेन हतिशब्देन सह तृतीयातत्पुरुषसमासः[7]। गमनागमनप्रसङ्गेन पादाभ्यां हन्यत इति पद्धतिर्मार्ग उच्यते। प्रसिद्धश्चायं शब्दोऽस्मिन्नर्थे,[8] प्रचुरप्रयोगविषयश्चास्ति।

---

1. म० भा० 3.1.48,
2. काशिका 3.1.48,
3. काशिका 6.3.53,
4. भट्टि० 16.28,
5. भट्टि० 3.4,
6. अर्जुन० 19.26,
7. कर्तृकरणे कृता बहुलम्। अष्टा० 2.1.31,
8. तथा हि अमरकोशे पठ्यते—
   अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः।
   सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥
   अमर० 2.1.15,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–वा घोषमिश्रशब्देषु। (6.3.56)

घोषमिश्रशब्देषु चोत्तरपदेषु पादस्य वा पद्‌आदेशो विधीयते, इह घोष-शब्द-शब्दाभ्यां षष्ठीसमास इति न्यासकारस्य निर्देशः[1]। तेन पादस्य घोषः पद्घोषः, पादघोषः। एवं पादस्य शब्दः पच्छब्दः, पादशब्द इति स्पष्टार्थान्युदाहरणानि। इह पादनिक्षेपादिजो ध्वनिरित्यर्थो गम्यते। पन्मिश्रः, पादमिश्रः, इत्यत्र तृतीयासमास इति न्यासकारेण निर्दिष्टम्[2]। ततो पादेन पादाभ्यां वा मिश्र इति विग्रहो भवति। हेमचन्द्राचार्यस्य मतेन पादाभ्यां मिश्रं संश्लिष्टं सङ्कीर्णत्वान्मिलितं यत् तत् पन्मिश्रं पादमिश्रं वा उच्यते। तथा हि द्व्याश्रयकाव्ये तस्य प्रयोगः —

पद्घोषि पन्मिश्रमपादमिश्रं प्रोज्झ्याश्वमुष्ट्रैरपपादघोषैः।[3]

पद्घोषि पन्मिश्रम् अपादमिश्रम् आश्वम् (आश्वानां समूहम्) प्रोज्झ्य अपपादघोषैरुष्ट्रैस्ते भटा जग्मुरित्युत्तरेणान्वयः। तथा चात्र टीका–"किं कृत्वा जग्मुः ? पन्मिश्रं बंहीयस्त्वेन मिथः पादसङ्करात् पादेषु मिश्रं सङ्कीर्णं तथापादमिश्रं सुलक्षणत्वान्न पादेषु स्वकीयाङ्घ्रिषु मिश्रं मिलितम्, उपलक्षणत्वादन्यैरप्यपलक्षणै रहितम् आश्वम् अश्वौघं प्रोज्झ्य त्यक्त्वा"[4]। इति।

---

1. द्र०–न्यासः 6.3.56,
2. मिश्रशब्दे च पूर्वसदृश० (अष्टा० 2.1.30) इत्यादिना तृतीयासमासः। न्यासः 6.3.56,
3. द्व्या० (प्रथमभागः) 6.77, पृ० 491,
4. " "

इह सूत्रे वार्त्तिकं पठ्यते–

"निष्के चेति वक्तव्यम्" इति।

निष्के चोत्तरपदे पादस्य वा पद्- आदेशो विधीयते। पन्निष्कः, पादनिष्क इत्युदाहृतं भवति। वृत्तावस्योदाहरणस्यार्थनिर्देशो न दृश्यते। पदमञ्जरीकारस्त्वेतत् स्पष्टयन्नाह —"निष्कशब्दः सुवर्णजातिवचनः, पादशब्दः परिमाणवचनः, कर्मधारयः समासः[1]" इति। एवं पदमञ्जरीकारस्य मतेन पादपरिमाणश्चासौ निष्कः= सुवर्णजातिविशेषः पन्निष्कः पादनिष्को वा इत्यर्थो भवति।

वासुदेवशरण-अग्रवालमहोदयेन तु निष्को मुद्राविशेष इत्यर्थं पुरस्कृत्य पादः (चतुर्थभागः) निष्कस्य (निष्काख्यस्य स्वर्णमुद्राविशेषस्य) पन्निष्कः पादनिष्को वा इत्यर्थोऽनुमानेन प्रतिपाद्यते। पन्निष्कः पादनिष्को वेति निष्कस्य चतुर्थांशात्मकं मुद्रान्तरं भवति स्मेति तेनानुमीयते[2]। वाचस्पत्यकारेणापि पादो निष्कस्य पन्निष्कः पादनिष्को वेत्ययमेवार्थो निर्दिश्यते।[3]

द्व्याश्रयकाव्ये पन्निष्कः, पादनिष्क इत्यनयोः प्रयोगो लभ्यते—

"त्यक्तात्मपन्निष्ककलत्रपादनिष्काश्च नस्तोऽसुषु जग्मुरन्ये"[4]।

---

1. पद० 6.3.56,
2. निष्क नाम के जिस सोने के सिक्के का वर्णन मिलता है क्या उसी के मेल में उससे छोटे फुटकर सिक्के भी थे। अंगरेजी पौंड सोने का सिक्का है। उसी के फुटकर सिक्के में आधे पौंड का सिक्का भी सोने का है। इसी तरह पहले समय में निष्क के बाद अर्धनिष्क और पादनिष्क के अस्तित्व का अनुमान होता है। पाणिनि ने इनका उल्लेख नहीं किया। हाँ, पतंजलि ने "निष्के चोपसङ्ख्यानम्" वार्त्तिक (सूत्र 6.3.56) के उदाहरण में पादनिष्क का उल्लेख किया है। इसे बोलचाल में पन्निष्क भी कहते थे। पाणि० भार० अ० 4, परि० 9, पृ० 249,
3. पन्निष्क पु० नं० पादो निष्कस्य एकदेशिस0 वा पदादेशः। निष्कस्य चतुर्थभागे। पदादेशाभावे पादनिष्कोऽप्यत्र।
   वाच०, भागः 5, पृ० 4231,
4. द्व्या० (प्रथमभागः) 6.77, पृ० 491,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह पादस्य = चरणस्य पादयोर्वा निष्कः अलङ्काररूपं सुवर्णमित्यर्थः काव्यकारस्याभिमत इति व्यज्यते। तथाह्यत्र टीकाकृदाह—"अन्ये भटा .... उष्ट्रैर्जग्मुर्नष्टाः। .... किम्भूताः सन्तः ? त्यक्ता मरणभयेनैव व्युत्सृष्टा आत्मनः स्वस्य पन्निष्काः पादयोर्निष्का वीरकटकाद्यलङ्कारीकृतानि सुवर्णानि कलत्राणां पादनिष्काश्च पादयोर्नूपुराद्यलङ्कारीकृतानि सुवर्णानि च यैस्ते तथा[1]" इति। अथैवं विमतौ स्थितायां वार्त्तिककारस्येह कोऽर्थोऽभिप्रतोऽस्तीति भूयोऽप्यन्वेषणीयमस्ति।

पन्निष्कः पादनिष्क इत्यनयोः प्रयोगो भट्टिकाव्य-रावणार्जुनीय-वासुदेवविजय-सुभद्राहरण-प्रभृतिषूदाहरणकाव्येष्वपि न दृश्यते।

सूत्रम्–पेषंवासवाहनधिषु च। (6.3.58)

पेषंवासवाहनधिषु चोत्तरपदेषु उदकस्य उद इत्ययमादेशो विधीयते। तत्रादेशपक्षे उदपेषं पिनष्टि, उदवासः, उदवाहनः, उदधिरित्युदाहरणानि भवन्ति। असञ्ज्ञार्थं चेदं वचनम्; तेनेमा सञ्ज्ञा न भवन्तीत्यवधेयमिह।

उदपेषं पिनष्टि

"स्नेहने पिषः"[2] इति णमुल्। उदकेनोपस्निह्य पिनष्टीत्यर्थः। यथा—"उदपेषं शुण्ठीं पिनष्टि[3]" इति। पारस्करगृह्यसूत्रे च—

"उदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चिति"[4] इति।

उदवासः

उदकस्य वास उदवास इति वृत्तिकारेण षष्ठीसमासः प्रदर्शितः[5]। तेन उदकस्य जलस्य वास इत्यर्थो गम्यते। जले वास इति भावोऽस्ति। अथवा

---

1. द्व्या० (प्रथम भागः) 6.77, पृ० 491,
2. अष्टा० 3.4.38,
3. भाषा० 6.3.58,
4. पार० गृ० प्रथमकाण्डम्, कण्डिका 13, पृ० 164,
5. काशिका 6.3.58,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदके वास उदवास इति सप्तमीतत्पुरुष एव मन्तव्यः[1]। तथाहि कालिदासस्य प्रयोगः कुमार सम्भवे—

"निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा"[2]।

इह तपश्चरणमुद्दिश्य क्रियमाण उदके वास उदवास इति प्रसङ्गात् स्फुटं गम्यते।

अन्यच्च—

अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत्।
सततं चैकशायी यः स लभेतेप्सितां गतिम्॥[3]

अत्रापि व्रताचरणप्रसङ्गेन उदके वास उदवास इति स्पष्टं गम्यते।

उदवाहनः

अत्रापि वृत्तिकृता षष्ठीसमासः प्रदर्शितः —"उदकस्य वाहन उदवाहनः"[4] इति। वहतीति वाहनः कर्त्तरि ल्युः[5]। अथवा वहन्त्येनेति वाहनं शकटादिः[6]। इहैव सूत्रे निपातनाद् वृद्धिः, अथवा "वाहनमाहितात्"[7] इति निपातनात्। प्रयोगश्च उदकं वहतीति उदवाहनो मेघः, उदकं वहन्त्यनेनेति उदवाहनं शकटम् इत्येवंविधः स्यात्। उदवाहन इत्युर्जुनरावणीये प्रयुक्तं दृश्यते—

"उदवाहनजालसन्निकाशा जनतां रुद्धविवस्वदंशुचक्राः"[8]।

उदकं वहतीत्युदवाहनोऽत्र मेघोऽभिप्रेत इति प्रसङ्गाद् गम्यते। द्व्याश्रयकाव्ये उदकं वहन्त्यनेनेति कृत्वा उदवाहनशब्द उदकवहनार्थे शकटे प्रयुक्तो दृश्यते—

"प्रिया विहायोदधिकुम्भचारूदवाहनाः"[9] इति।

---

1. "सप्तमी शौण्डैः" (अष्टा॰ 2.1.39) इह सप्तमीति योगविभागात् समासः।
2. कुमार॰ 5.27,
3. कस्यचित् प्रलग्रन्थस्येदमुद्धरणं वाचस्पत्ये प्रस्तुतम्।
   द्र॰-वाच॰ द्वितीयभागः, पृ॰ 1151,
4. काशिका 6.3.58,
5. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। अष्टा॰ 3.1.134,
6. करणाधिकरणयोश्च (अष्टा॰ 3.3.117) इति करणे ल्युट्।
7. अष्टा॰ 8.4.8,
8. अर्जुन॰ 19.30,
9. द्व्या॰ (प्रथमभागः) 6.79,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदकं धीयत एष्वति उदधयो जलवत्कुम्भास्तैश्चारूण्युदवाहनानि जलवाहनानि शकटानि यासां ताः प्रिया विहायेत्यर्थः[1]।

उदधिः

उदकं धीयतेऽस्मिन्निति उदधिः[2]। तच्चेदं घटादेर्विशेषणत्वेन प्रयोक्तव्यम्, न समुद्रार्थे, उदधिर्घटोऽयम्। उदकं धीयतेऽस्मिन्नसौ घट इति भावः। तदिदमस्य सूत्रस्यासञ्ज्ञार्थत्वाल्लभ्यते। "उदधिः समुद्रः" इति सञ्ज्ञायां तु "उदकस्योदः सञ्ज्ञायाम्"[3] इति पूर्वसूत्रेणैव सिद्धत्वात्। एतद्धि न्यासकृता[4] पदमञ्जरीकारेण[5] चापीह वृत्तिव्याख्याने सङ्केतितम्।

द्व्याश्रयकाव्ये खलु उदधिशब्दो घटस्य विशेषणत्वेन प्रयुक्तो दृश्यते—

> द्राक्शैर्षिकाः केऽप्युदपेषमेणमदेन पिष्टेन सुगन्धयोऽयुः।
> प्रिया विहायोदधिकुम्भचारूदवाहना अप्युदवासजस्त्री॥[6]

उदकं धीयत एष्वति उदधयो जलभृत्कुम्भास्तैश्चारूदवाहनाः प्रिया विहाय इत्युत्तरेणान्वयः। अस्मिन् पद्ये—उदपेषम्, उदवासः, उदवाहनः, उदधिरिति सर्वाण्युदाहरणानि प्रयुक्तानि दृश्यन्ते[7]।

---

1. द्र०-अभयतिलकगणिकृता द्व्याश्रयटीका (प्रथमभागः) 6.79, पृ० 493,
2. "कर्मण्यधिकरणे च" (अष्टा० 3.3.93) इति किप्रत्ययः।
3. द्र०—काशिका 6.3.57,
4. न्यासः 6.3.58,
5. पद० 6.3.58,
6. द्व्या० (प्रथमभागः) 6.79, पृ० 497,
7. तथा चात्र अभयतिलकगणिकृता टीका—"उदपेषं पिष्टेनोदकेन घृष्टेनैणमदेन कस्तूरिकया सुगन्धयो विलेपनात् सौरभाढ्याः केऽपि भटा अप्युदवासजस्त्रि। उदके वास उदवासस्तस्माज्जाता याः स्त्रियोऽप्सरसस्तासु द्रागयुर्द्रवीभूता इत्यर्थः। यतः शैर्षिकाः शिरसा दीव्यन्तो जयन्तो वा। महाशूरत्वाद्रणे शिरःपणीकारकाः। किं कृत्वा? प्रियाः स्वभार्या विहाय। किम्भूताः ? उदकं धीयत एष्वित्युदधयो रणश्रान्तकान्तानां पानाय जलभृतो ये कुम्भास्तै-श्चारूण्युदवाहनानि जलवाहनानि शकटानि यासां ताः"।
   द्व्या० (द्वितीयभागः) 6.79, पृ० 497,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च।
(6.3.60)

इहापि मन्थादिषु उत्तरपदेषु उदकस्य उद इत्ययमादेशो वा विधीयते। आदेशपक्षे चेमान्युदाहरणानि भवन्ति—उदमन्थः, उदौदनः, उदसक्तुः, उदबिन्दुः, उदवज्रः, उदभारः, उदवीवधः, उदगाह इति। अथैतानि क्रमेण विविच्यन्ते—

उदमन्थः

इह वृत्तिकृता तृतीयातत्पुरुषसमासो दर्शितः—"उदकेन मन्थ उदमन्थः" इति[1]। अस्यार्थं स्पष्टयन् न्यासकार आह—"द्रवद्रव्यसम्पृक्ताः सक्तवो [illegible] इत्युच्यते"[2] इत्थम् उदकेन मन्थ इति विग्रहे-उदकेन = उदकात्मना द्रवद्रव्येण सम्पृक्ताः सक्तव उदमन्थ इत्युदाहरणार्थो भवति। वासुदेवशरण-अग्रवालमहोदयेन[3] राधारमणपाण्डेयेन[4] चाप्ययमेवार्थः प्रकृतोदाहरणस्य स्वीकृतः। एतस्मिन्नर्थे चरकसंहितायामपि उदमन्थशब्दस्य प्रयोगो दृश्यते।[5]

---

1. काशिका 6.3.60,
2. काशिका 6.3.60,
3. पानी के सत्तू को उदमन्थ या उदकमन्थ कहा जाता था।
   पाणि॰ भार॰ अ॰ 3, परि॰ 5, पृ॰ 114,
4. उदमन्थः - उदकमन्थः = जल मिलाया हुआ सत्तू।
   अर्थप्र॰ समासाश्रयविधिप्रकरणम्, पृ॰ 54,
5. वर्जयेदन्नपानानि लघूनि वातलानि च।
   प्रवातं प्रमिताहारम् उदमन्थं हिमागमे॥
   चरक॰, सूत्रस्थानम् 6.18,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्जुनरावणीये तु खलु उदकस्य मन्थनम् उदमन्थ इत्यस्मिन्नर्थे इदम् उदाहरणं प्रयुज्यते—

"क्षिप्तोदबिन्दूनि सरांसि दूरं धृतोदमन्थानि च पल्वलानि"[1] इति।

इह धृत उदमन्थ[2] = उदकस्य मन्थनं यैस्तानि पल्वानीत्यर्थः स्फुटं गम्यते।

हेमचन्द्राचार्येणापि उदकस्य मन्थनम् इत्यस्मिन्नर्थे उदकमन्थ इति प्रयोगः कृतः। अथ मन्थशब्दोऽयं मन्थनदण्डपर्यायोऽप्यस्ति,[3] अतो हेमचन्द्रेण उदकस्य मन्थः = (मन्थनदण्डः) उदमन्थः - इत्यर्थेऽपीदं प्रयुज्यते। तथाहि तस्य प्रयोगः—

"सिन्धूदमन्थोदकमन्थजेभोदवज्रनादोऽर्युदकौदनादी"[4] इति।

इह अभयतिलकगणिटीका—.......सिन्धोरब्धेर्य उदकं मथ्यतेऽनेन उदमन्थो मन्दरस्तेन य उदकमन्थो जलविलोडनम्[5]".........इति। इह उदमन्थः = वैशाखः, उदकमन्थः = उदकस्य मन्थनं विलोडनम् इत्युभयार्थे प्रयोगः। अथैवम् अर्थापने रावणार्जुनीयकारस्य द्व्याश्रयमहाकाव्यकर्त्तुश्च षष्ठी-समासोऽभिमतोऽस्ति। वृत्तिकृता तु तृतीयासमासो मत इति निर्दिष्टपूर्वम्।

उदौदनः—

इहापि वृत्तिकृता तृतीयासमासः प्रदर्शितः—"उदकेनौदन उदौदन"[6] इति। उदकेन सिद्ध ओदन इत्यर्थोऽत्र गम्यते। जलमात्रसाधित इति भावः। वासुदेवशरण अग्रवालमहोदयेन प्रकृतोदाहरणस्य उदकेन सिद्ध ओदन इत्येवार्थः सम्यक् प्रतिपादितः[7]। वाचस्पत्येऽर्थ[8]प्रकाशिकायां[9] चाप्ययमेवार्थः स्वीकृतः।

---

1. अर्जुन० 19.31,
2. इह मन्थशब्दो भावे घञ्-प्रत्ययान्तः, मन्थनं मन्थ इति।
3. "वैशाखमन्थमन्थानमन्थानो मन्थदण्डके"।
   अमर० 2.9.74,
   मथ्यतेनेन इति मन्थः। पुंसि सञ्ज्ञायां घः प्रायेण (अष्टा 3.3.118) इति घप्रत्ययः।
4. द्व्या० (प्रथमभागः) 6.81, पृ० 494,
5. द्व्या० (प्रथमभागः) 6.81, पृ० 494-95,
6. काशिका 6.3.60,
7. जल में उबालकर बनाये गये शुद्ध चावल को उदकौदन या उदौदन कहते थे। (6.3.60) मांस के साथ बनाया हुआ पुलाव मांसौदन कहलाता था। (4.4.67) पाणि० भार० अ० 3, परि० 5, पृ० 120,
8. द्र०— वाच०, भागः 2, पृ० 1167,
9. उदौदनः = जल में पकाया गया भात। अर्थप्र० समासाश्रयप्रकरणम्, पृ० 54,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदसक्तुः –

उदकेन सक्तुरुदसक्तुरिति वृत्तिकारः[1]। उदकेन सम्पृक्तः सक्तुरित्यर्थो गम्यते। वासुदेवशरणअग्रवालमहोदयेनापि प्रकृतोदाहरणस्यायमेवार्थो निर्दिष्टः[2]

उदबिन्दुः –

उदकस्य बिन्दुः — उदबिन्दुः इति वृत्तिकारः[3]। स्फुटोऽर्थः। तथा च

कालिदासस्य प्रयोगः –

"वलीषु तस्याः स्खलिताः प्रपेदिरे, चिरेण नाभिं प्रथमोदबिन्दवः"[4]।

शिशुपालवधे च–

"हिमलवसदृशः श्रमोदबिन्दूनपनयता किल नूतनोढवध्वाः"[5]।

अर्जुनरावणीयेऽपि–

क्षिप्तोदबिन्दूनि सरांसि दूरं धूतोदमन्थानि च पल्वलानि[6]।

उदवज्रः –

इह वृत्तिकृता षष्ठीसमासः प्रदर्शितः—"उदकस्य वज्र उदवज्रः"[7] इति। हरदत्तमिश्रश्चैतत् स्पष्टयन्नाह—"उदकस्य वज्रं क्रूरम्, यदपां क्रूरम् इति दर्शनात्"[8]। हेमचन्द्राचार्येण च उदकस्य वज्रो विद्युदाख्य इत्यर्थोऽस्य मत इति प्रतीयते। तथाहि तस्य प्रयोगः —

"सिन्धूदमन्थोदकमन्थजेभोदवज्रनादोऽर्युदकौदनादी"[9] इति।

---

1. काशिका 6.3.60,
2. पानी में घोल कर बनाये सत्तू को उदकसक्तु या उदसक्तु कहा जाता था। पाणि० भार०, अ० 3, परि० 5, पृ० 122,
3. काशिका 6.3.60,
4. कुमार० 5.24,
5. शिशु० 7.73,
6. अर्जुन० 19.31,
7. काशिका 6.3.60,
8. पद० 6.3.60,
9. द्व्या० (प्रथमभागः) 6.81, पृ० 494,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह टीकाकृदाह—"सिन्धोरब्धेर्य उदकं मथ्यतेऽनेन उदमन्थो मन्दरस्तेन य उदकमन्थो जलविलोडनं तस्माज्जातौ याविभोदवज्रौ = ऐरावणविद्युतौ, तयोरिव नादोऽरिजयसूचकः सिंहनादो यस्य सः ....[1]" इति। एतेन हेमचन्द्राचार्यस्य उदवज्रशब्देनेह विद्युद् इत्यर्थोऽभिप्रेत इति स्पष्टम्।

इह वृत्तिव्याख्यानप्रसङ्गे हरदत्तमिश्रेण निर्दिष्टं यत् न केवलमिह वृत्तिकारप्रदर्शित एव समासः, अन्येऽपि यथाम्भवं समासा भवन्त्येव। यथा उदकं वज्रमिव उदवज्रम् इत्युपमितसमासो भवति। अस्य लक्ष्यत्वेन मिश्रमहाभागेन माघस्येदं पद्यं सङ्केतितम्[2]—

रागान्धीकृतनयनेन नामधेयव्यत्यासादभिमुखमीरितः प्रियेण।
मानिन्या वपुषि पतन् निसर्गमन्दो भिन्दानो हृदयमसाहि नोदवज्रः[3]

अर्जुनरावणीयेप्येतादृश एव प्रयोगो दृश्यते—

परितः पतिता रयेण पृथ्वीमुदवज्रा इव मेघजालमुक्ताः।
उपला बिभिदुर्भटव्रजानां तरसा संयति मस्तकानदुष्टाः॥[4]

इहापि उदकं वज्रमिव उदवज्रः (उदकमयो वज्रः) इत्यर्थो गम्यते।

उदभारः –

वृत्तिकारेणेहोपपदसमासः प्रदर्श्यते—उदकं बिभर्तीति उदभारः[5] इति। कर्मण्यण्[6]। एतेन य उदकं बिभर्ति धारयति स मेघः समुद्रः सरो वेत्थं विशिष्येत। प्रयोगस्तु मृग्यः।

उदकस्य भार उदभार इति षष्ठीसमासोऽप्यत्र सम्भवति। अस्मिन्नर्थे च माघस्य प्रयोगो दृश्यते—

1. द्व्या० (प्रथमभागः) 6.81, पृ० 494-95,
2. द्र० - पद० 6.3.60,
3. शिशु० 8.39,
4. अर्जुन० 19.32,
5. काशिका 6.3.60,
6. अष्टा० 3.2.1,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स इन्द्रनीलस्थलनीलमूर्त्ती रराज कर्चूरपिशङ्गवासाः ।
विसृत्वरैरम्बुरुहां रजोभिर्यमस्वसुश्चित्र इवोदभारः ॥[1]

उदकस्य भारः पूर उदभार इत्यर्थोऽत्र गम्यते। मल्लिनाथेनायमेवार्थः सर्वङ्कषायां निर्दिष्टः[2] । हेमचन्द्राचार्येणाप्यस्मिन्नेवार्थे एतादृश एव प्रयोगः क्रियते–

"रणोदगाहाद्रुधिरोदभाराः' केऽपि क्षणेनोदकगाहमीयुः"[3] इति ।

अत्राह टीकारः–"रुधिरमेवातिबाहुल्याद् उदभारो जलप्रवाहो येषां ते...[4] ।

उदहारः–

इहापि उपपदसमास एव वृत्तौ प्रदर्शितः – "उदकं हरतीति उदहारः[5]" इति। एतेन उदकहरणकर्त्तरि शब्दोऽयं प्रयुज्येत। मेघः कहारः (कम् उदकं हरतीति कृत्वा) अथवा यः कश्चिदुदकहरणकर्त्ता सोऽनेन विशिष्येत। तथाहि प्रयोगः रामायणे–

"प्रविविक्तां नदीं रात्रावुदहारोऽहमागतः"[6] इति ।

स्त्रियाम् उदहारीति भवति। तथा च यजुर्वेदे प्रयोगो दृश्यते–

"उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः"[7] ।

वाचस्पत्ये तु उदकस्य हरणम् उदहार इत्यर्थोऽपि प्रदर्शितः षष्ठीसमासमाश्रित्य ।[8] वासुदेवशरण-अग्रवाल-महोदयेन "कहार" इति लोकप्रसिद्धेऽर्थे उदहारशब्दो निर्दिष्टः[9] ।

---

1. शिशु० 3.11,
2. रजोभिः परागैश्चित्रचित्रवर्णः यमस्वसुर्यमुनाया उदकस्य भारः पूर उदभारः स इव रराज, "मन्थौदन" इत्यादिना उदकस्योदादेशः। शिशु० (सर्वङ्कषोपेतम्) 3.11,
3. द्व्या० (प्रथमभागः) 6.82, पृ० 495,
4. द्व्या० (प्रथमभागः) 6.82, पृ० 495,
5. काशिका 6.3.60,
6. रामा०, अयोध्याकाण्डम् 66.26,
7. यजु० 16.7,
8. वाच० भागः 2, पृ०-1151,
9. द्र०–पाणि० भार०, अ० 3, परि० 4, पृ०-113,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उदवीवधः–

"उदकस्य वीवध उदवीवधः"[1] इति वृत्तिकारः। बह्वर्थोऽयं वीवधशब्दो दृश्यते। स खल्विह किमर्थकोऽभिप्रेत इति वृत्तिकृता स्वस्याभिमतं न दर्शितम्। हरदत्तमिश्रजिनेन्द्रबुद्धिभ्यामपि नेह किञ्चित् निर्दिष्टम्। कोशकारैर्हि वीवधशब्दो विहङ्गिका, भारः, अध्वा इत्येतेष्वर्थेषु स्मर्यते[2]।

बालमनोरमाकारेण तु प्रकृतोदाहरणस्य उदकविहङ्गिका इत्येवार्थो दर्शितः[3]। वासुदेवशरण-अग्रवालमहोदयेनाप्ययमेवार्थो मन्यते[4]।

उदगाहः –

वृत्तिकारेणेह उपपदसमासो दर्शितः–"उदकं गाहत इति उदगाहः"[5]। य उदकं गाहते विलोडयति स्नानकेल्यादिप्रसङ्गेन स एवमुच्यते। इह षष्ठीसमासोऽप्यभ्युपगम्योऽस्ति। उदकस्य गाहः[6] उदगाह इति। अस्मिन्नर्थे च माघस्य प्रयोगोऽपि दृश्यते–

"रामाणामनवरतोदगाहभाजां, नारावं व्यतनुत मेखलाकलापः"[7] इति।

हेमचन्द्रेणाप्यस्मिन्नेवार्थे उदाहरणमिदं प्रयुज्यते–

"रणोदगाहाद् रुधिरोदभाराः केऽपि क्षणेनोदकगाहमीयुः"[8]।

इह टीकाकृदाह–"रणमेव दुष्करत्वादुदगाहो जलविलेडनम्[9]" इति।

वासुदेवशरण-अग्रवालमहोदयेन तु कूपानां शोधका उदगाहा इत्यभिधीयन्ते स्म इति मतम्[10]। अस्यार्थस्योपोद्बलकं प्रमाणं मृग्यमस्ति।

---

1. काशिका 6.3.60,
2. "विवधो वीवधो भारे पर्याहाराध्वनोरपि"। अनेकार्थ० 3.378,
   "विवधो वीवधश्चापि पर्याहारेऽध्वभारयोः"। मेदि० 19.35,
3. वीवधस्तु जलाद्याहरणयोग्य उभयतश्शिक्यः स्कन्धवाह्यः काष्ठविशेषः। सि०कौ० बालमनोरमायुता, भागः 2, पृ० 648, चौखम्बा संस्कृत संस्थान, 1978 ई०।
4. पाणि० भार०, अ०-3, परि० 10, पृ०-148-49,
5. काशिका 6.3.60,
6. गाहनं गाहः, भावे घञ्।
7. शिशु० 8.45,
8. द्व्या० (प्रथमभागः) 6.82, पृ०-495,
9. द्व्या (प्रथमभागः) 6.82, पृ०-495,
10. कुओं की सफाई करने वाले उदगाह या उदकगाह (6.3.60) कहलाते थे। पाणि० भार०, अ० 3, परि० 9, पृ० 145,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–कोः कत् तत्पुरुषेऽचि। (6.3.101)

इह वार्त्तिकं पठ्यते–"कद्भावे त्रावुपसङ्ख्यानम्" इति। कुत्सितास्त्रयः "कत्रयः" इत्युदाहरणम्। भाषावृत्तिकारेणास्य शोभनः प्रयोगः जानकीहरणादुद्धृत्य प्रस्तूयते–

कृतशस्त्रो न यो जिष्णुर्यश्चाद्यो यज्ञनिस्पृहः।
कामी यश्च जरन्नेते क्षत्रवंशेषु कत्रयः॥[1]

तद्धितप्रकरणे "कत्र्यादिभ्यो ढकञ्"[2] इति कत्रिशब्दात् शैषिको ढकञ् विधीयते। तत्राप्येवमेवार्थः—कुत्सिताः त्रयः कत्रयः, तेषामिदं कात्रेयकम् इति। न्यासकृत्पदमञ्जरीकाराभ्यामिह बहुव्रीहिसमासोऽपि निर्दिष्टः[3]–कुत्सिताः त्रयो यस्य स कत्रिः, तस्येदं कात्रेयकम् इति। इह ताभ्यां "कत्र्यादिभ्यः" इत्यस्मादेव निपातनात् कोः कद्भाव इत्यप्युक्तम्[4]।

---

1. भाषा० 6.3.101, जानकीहरणं महाकाव्यम्, 10.9,
2. काशिका 4.2.95,
3. न्यासः 4.2.95,
   पद० 4.2.95,
5. " " "

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—रथवदयोश्च। (6.3.102)

रथवदयोरुत्तरपदयोः कोः कदादेशो विधियते। कद्रथः, कद्वद इत्युदाहरणे। कु इत्यस्य स्थाने कदादेशो विहितः कुशब्दश्च कुत्सितार्थः। तेन कुत्सितो रथः इत्यर्थो भवति। एवं कुत्सितो वदः कद्वद इति। वदतीति वदः पचाद्यच्[1]। कुत्सितं वदतीति कद्वदः गर्ह्यभाषीत्यर्थः। प्रकृतोदाहरणस्यायमेवार्थोऽमरकोशेऽप्युक्तः[2]। तथाहि च प्रयोगा दृश्यन्ते। अर्जुनरावणीये—

भङ्क्त्वा रथान् कद्रथवत्पतन्तस्ते कद्वदेन प्रहिताः परेण[3]।

भट्टिकाव्ये—

पिशाचमुखधौरेयं सच्छत्रकवचं रथम्।
युधि कद्रथवद् भीमं बभञ्ज ध्वजशालिनम्॥[4]
सर्वत्र दयिताधीनं सुव्यक्तं रामणीयकम्।
येन जातं प्रियापाये कद्वदं हंसकोकिलम्॥[5]

---

1. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। अष्टा० 3.1.134,
2. "गर्ह्यवादी तु कद्वदः —अमर० 3.1.37,
3. अर्जुन० 19.51
4. भट्टि० 5.103
5. भट्टि० 6.75

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वासुदेवविजये–

ये कद्वदाः कोष्णवधूकुचैकश्राद्धाः कवोष्णानि पलान्यदन्तः ।[1]

सूत्रम्–अष्टनः संज्ञायाम् । (6.3.125)

अष्टन् इत्यस्योत्तरपदे सञ्ज्ञायां दीर्घो विधीयते। इह वृत्तौ–अष्टावक्रः, अष्टाबन्धुरः, अष्टापदम् इति त्रीण्युदाहरणानि प्रदर्शितानि।

अष्टावक्रः–

अष्टौ वक्राण्यस्येति बहुव्रीहिः। सञ्ज्ञा चेयम् ऋषिविशेषस्य। कथन्नु स ऋषिरष्टावक्र इत्यभिधानो बभूवेति महाभारते कथा श्रूयते–

उद्दालकस्य महर्षेः कहोडेतिनामा किलैकः शिष्यसत्तमो बभूव। स खलु दीर्घं कालं गुरोरन्तिकेऽध्ययनं चकार। तं वै सतीर्थ्याश्चान्ये विप्राश्च पर्यभवन्। तथा तस्य विप्रकारं ज्ञात्वा गुरुस्तस्मै सद्य एव श्रुतं प्रादात् स्वां च दुहितरं सुजातां भार्यात्वेन ददौ। तस्यामग्निकल्पो गर्भः समभवत्। सोऽधीयानं पितरं कदाचिदुवाच–पितः ! सर्वां रात्रिमध्ययनं करोषि, नेदं सम्यगिवोपवर्त्तते। इत्थं शिष्यमध्ये उपालब्धः स महर्षिः कोपादुदरस्थं तं शशाप–यस्मात् त्वं कुक्षौ वर्त्तमानो ब्रवीषि तस्माद् अष्टकृत्वो वक्रो भवितासि। एवं शप्तः स खलु तथा वक्र एवाभ्यजायत, अष्टावक्र इति च प्रथितिं जगाम।[2]

अष्टाबन्धुरः–

अष्टौ बन्धुराणि यस्येति बहुव्रीहिः। सञ्ज्ञेयं कस्यचित्, बन्धुरम् उन्नतानतमुच्यते[3]। अष्टौ बन्धुराणि नतोन्नतस्थानानि यस्य स अष्टाबन्धुर स्यात्[4]। कस्येयं सञ्ज्ञेति ज्ञातव्यमवशिष्यते। वृत्तौ न्यासे पदमञ्जर्यां चाप्यस्य न कश्चिदर्थो

---

1. वासु० 3.16,
2. म० भार० 3.132, 6-10, (पूना)
3. "बन्धुरं तून्नतानतम्"। अभि० 6.104,
4. बन्धुरशब्दोऽयं नते सुन्दरे चापि दृश्यते–"बन्धुरौ नम्रसुन्दरौ। (वैज0 7.4.21) तेन अष्टौ सुन्दराणि तथा नम्राणि अष्टौ निम्नस्थानानि वा यस्य–इत्यादिरर्थः स्यात्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निर्दिश्यते। अमरकोश—अभिधानचिन्तामणि—वैजयन्ती—हलायुधप्रभृतिषु प्राचीनकोशग्रन्थेषु वाचस्पत्यशब्दकल्पद्रुमादिषु चार्वाचीनकोषग्रन्थेषु अष्टाबन्धुर इति शंब्दो न लभ्यते।

अष्टापदम्–

अष्टसु लोहेषु (=धातुषु) पदं प्रतिष्ठा यस्य तद् अष्टापदम्, सञ्ज्ञेयं सुवर्णस्य। सुवर्णार्थकश्चायम् अर्धर्चादित्वाद्[1] उभयलिङ्गः[2]–अष्टापदम् अष्टापद इति। वृत्तौ नपुंसकम् उदाहरणत्वेनोपस्थापितम्—अष्टापदम् इति। सुवर्णस्य सञ्ज्ञात्वेन प्रचुरप्रयोगविषयं चेदमुदाहृतपदम्। तथा हि कालिदासस्य प्रयोगः–

"आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयाम्बभूवुः[3]। इति।

माघस्य च–

"अचेष्टताष्टापदभूमिरेणुः पादाहतो यत्सदृशं गरिम्णः[4]।

अष्टापदम् इति पदं शारीणां फलकेऽपि सञ्ज्ञात्वेन प्रसिद्धम्। तत्रापीदम् उभयलिङ्गम्[5]–अष्टापदः अष्टापदम् इति। पङ्क्तौ पङ्क्तौ अष्टौ पदानि यस्य तद् अष्टापदं शारिफलकम्। अस्मिन्नर्थे च रामायणस्यायं प्रयोगो दृश्यते—

चित्रामष्टापदाकारां वरनारीगणैर्युताम्।
सर्वत्नसमाकीर्णां विमानगृहशोभिताम्॥[6]

चित्राम् अष्टापदाकारां पुरीम् अयोध्यां राजा दशरथः पालयामास इत्यग्रिमेणान्वयः। अष्टापदाकारां = शारिफलकसदृशसन्निवेशाम् इत्यर्थः। अयमेवार्थो गोविन्दराजेन रामायणभूषणाभिधानायां टीकायां स्फुटं निर्दिष्टः[7]।

---

1. "अर्धर्चाः पुंसि च" द्र० – काशिका 2.4.31,
2. "अष्टापदोऽस्त्री कनके —मेदि0 18.44,
3. कुमार० 7.10,
4. शिशु० 3.28,
5. अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च।
   मेदि० 18.44,
6. रामा० 1.5.16, (बडोदा)
7. "चित्रामिति—अष्टौ पदानि स्थानानि यस्य तद् अष्टापदम् अष्टनः संज्ञायाम् इति दीर्घः। "अष्टापदं शारिफलम्" इत्यमरः (2.10.46)। तदाकारां तत्सदृशसंस्थानामित्यर्थः, मध्ये राजगृहं चतुर्दिक्षु राजवीथयः तन्मध्येष्ववकाशाश्चेत्येवंविधसंस्थानामित्यर्थः"।
   रामा० (टीकात्रयोपेतम्) प्रथमभागः, 1.5.16, पृ० -96,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शरभस्य मर्कटस्य = (लूतायाः) च संज्ञायात्वेनाप्ययं शब्दो दृश्यते, तयोरष्टपदत्वात्, तत्रायं पुंसि[1] वर्तते। अष्टापदः शरभो (मृगविशेषः) मर्कटः (मकड़ी) चेति।

सूत्रम्–अनिदितां हल उपधायाः क्ङिति। (6.4.24)

इह वार्त्तिकम्–

"अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसङ्ख्यानं कर्त्तव्यम्"।

विलगितः, विकपित इत्युदाहरणे। वृत्तौ उदाहरणार्थस्य निर्देशो न दृश्यते। कैय्यटस्य मतेन उपतापोऽत्र कृच्छ्रप्राप्तिरस्ति न तु रोगः, तस्य शरीरविकार इत्येतावतैव सिद्धत्वात्[2]। लङ्गेर्गत्यर्थत्वाच्च विलगित इति कर्त्तरि क्तः[3]। एतेन कृच्छ्रप्राप्तो यो जनः स विलगित इति प्रथमस्योदाहरणस्यार्थो भवति। कृच्छ्रप्राप्तिरत्र मानसं दुःखम् इति नागेशः[4]।

कम्पेः शरीरविकारेऽर्थे विकपित इत्युदाहरणम्। कैय्यतमतेन "शरीरविकारोऽत्र व्याधिरुच्यते न स्थौल्यादि। कम्पतेरतद्विषयत्वात्"[5]। गत्यर्थत्वाच्च कम्पतेः "गत्यर्थाकर्मक"[6] इति कर्त्तरि क्तः। एतेन विकपित इत्यस्य तन्मतेन व्याधिं प्राप्तो जन इत्यर्थो भवति। नागेशेन अयमेवार्थः समर्थ्यते[7]। हरदत्तमिश्रोऽपि पदमञ्जर्याम् उपाध्यायकैय्यटस्य मतमेवानुवदति।[8]

---

1. "शरभे मर्कटे पुमान्"

   मेदि० 18.44,
2. प्रदीपः 6.4.24,
3. "गत्यर्थाकर्मक०" अष्टा० 3.4.72,
4. उद्योतः 6.4.24,
5. प्रदीपः 6.4.25,
6. अष्टा० 3.4.72,
7. उद्योतः 6.4.24,
8. पद० 6.4.24,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धातुवृत्तौ "कपि चलने" इत्यत्र विकपित इत्यस्य विकृतशरीर इत्यर्थ उक्तः[1]। "लगि" इत्यत्र च विलगित इति प्रकृतवार्त्तिकोपन्यासपुरस्सरमुदाहृतम्[2], अर्थस्त्वत्र न दर्शितः। परं विकपित इत्यस्य तथार्थापनेन ध्वन्यते यद् धातुवृत्तिकारस्यात्र कैय्यटव्याख्यानमेवाभिमतम् इति। व्याकरणदीपिकाकृतापि कैय्यटनिर्दिष्ट एवार्थ उद्धृतः[3]।

अथातो विपरीतं न्यासकारस्त्वत्र उपतापो व्याधिरित्येव मन्यते, शरीरविकारश्च तेन उपतापाद् = रोगाद् भिन्नजातीयकं शरीरस्यान्यथात्वं मतम्[4]। अन्येषु पाणिनीय-व्याकरणसम्प्रदायग्रन्थेषु एतन्मतस्य समर्थनं न दृश्यते। हेमचन्द्राचार्येण न्यासकारप्रतिपादितं मतम् अङ्गीकृतम्, एतन्मतामाश्रित्य च तेन द्व्याश्रयकाव्ये प्रकृतयोरनयारुदाहरणयोः प्रयोगो दर्शितः —

"तेनाविकपितेनाविलगितैः स्वैर्निषीदता"[5] इति।

इह टीकाकृदाह—"तेन दूतेन......अविकपितेन संक्षोभोत्थस्तम्भादिविकाररहितेन। तथा अविलगितैः स्वैः रोगादिना अनुपतप्तैः स्वैरात्मीयैर्भटैः सह निषीदता चेदिसभायाम् उपविशता"[6] इति।

वैय्याकरणसिद्धान्तकौमुद्याम् इदं वार्त्तिकमेव न पठ्यते। अमरसिंह-हेमचन्द्र-यादवप्रकाशादिभिः प्राचीनकोषकारैः तारानाथतर्कवाचस्पति-राधाकान्तदेवभूपतिप्रभृतिश्चार्वाचीनकोषकारैरनयोरुदाहृतपदयोरर्थौ न प्रदर्शितः। अथानयोः प्रयोगोऽपि प्राक्तनवाङ्मये मृग्यः खल्वस्ति। द्व्याश्रयादन्यत्र भट्टिकाव्य-रावणार्जुनीय-वासुदेवविजय-सुभद्राहरणप्रभृतिषूदाहरणकाव्येषु त्वनयोः प्रयोगो न लभ्यते।

---

1. मा० धातु० भ्वादि० 256, पृ० 118,
2. मा० धातु० भ्वादि० 91, पृ० 83,
3. व्या० दी० 6.4.24,
4. "उपतापो व्याधिः। शरीरविकारः शरीरस्यान्यथात्वम्। स पुनरिहोपतापादन्यो गृह्यते, अन्यथा उपताप इत्येव सिद्धे शरीरविकारग्रहणम् अनर्थकं स्यात्"। न्यासः 6.4.24,
5. द्व्या० (प्रथमभागः) 9.29, पृ० 678,
6. द्व्या० (प्रथमभागः) 9.29, पृ० 678,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रापरं वार्त्तिकं पठ्यते–

रञ्जेर्णौ मृगरमण उपसङ्ख्यानं कर्त्तव्यम्॥[1]

रजयति मृगान् इत्युदाहरणम्। उदाहरणार्थं विशदयन् न्यासकार आह मृगरमणम् = मृगक्रीडा। रजयति मृगानिति। रममाणान् मृगान् प्रयुङ्क्ते इत्यर्थः[2]। भाषावृत्तिकृतापि प्रकृतोदाहरणस्यायमेवार्थः स्वीकृतः[3]। धातुवृत्तौ चाप्ययमेवार्थः स्पष्टं निर्दिष्टः[4]। दृश्यन्ते चास्मिन्नर्थे महाकविप्रयोगाः। किरातार्जुनीये तावत्–

धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयन् शुचिभिः।
रजयाञ्चकार विरजास्स मृगान् कमिवेशते रमयितुं न गुणाः॥[5]

सोऽर्जुनो मृगान् रजयाञ्चकार रमयामास इत्यर्थः। इह मल्लिनाथेनायमर्थो वैशद्येन व्याख्यातः[6]।

शिशुपालवधे च–

मधुकरैरपवादकरैरिव स्मृतिभुवः पथिका हरिणा इव।
कलतया वचसः परिवादिनीस्वरजिता रजिता वशमाययुः॥[7]

---

1. काशिका 6.4.24,
2. न्यासः 6.4.24,
3. यद्यपि भाषावृत्तिकृता शब्दशः अयमर्थो न निर्दिष्टः किन्तु माघेन यः प्रयोगः कृतोऽस्मिन्नर्थे स ग्रन्थकृता इह रजिता मृगा इत्येवं कृत्वा उदाहरणत्वेन उपस्थापितः। एतेन भाषावृत्तिकर्तुरयमेवोदाहरणार्थोऽभिमत इति स्फुटं व्यज्यते।
   द्र०–भाषा० (रञ्जेश्च) 6.4.26,
4. रजयति मृगान् रमयतीत्यर्थः।
   मा० धातु०, भ्वादि० 721, पृ0 293,
5. किरा० 6.24,
6. धृतहेतिः धृतायुधोऽपि अधृता जिह्ममतिः कुटिलबुद्धिर्येन सः। शुचिभिः निर्मलैः चरितैः मुनीन् अधरयन् अधः कुर्वन् वेषेणैव भीषणो न तु कर्मणेति भावः। कुतः? विरजाः रजोगुणरहितः सोऽर्जुनः मृगान् रजयाञ्चकार रमयामास। रञ्जेर्णौ मृगरमणे न लोपो वक्तव्य इति वक्तव्यादनुनासिकलोपः। तथा हि गुणाः शमादयः कमिव रमयितु नेशते, कं वशीकर्तुं न शक्नुवन्तीति भावः। अन्तश्शुद्धिरेव हि वरं विश्वासबीजं परस्य न वेषो नापि संस्तव इति भावः।
   किरा० (घण्टापथव्याख्योपेतम्) 6.24,
7. शिशु० 6.9,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपवादकरैः हरिणा यथा रजिताः तथा मधुकरैः पथिकाः रजिताः रञ्जिता इत्यर्थः। इह मल्लिनाथोऽप्यमुमेवार्थं विशदयति।[1]

आचार्यहेमचन्द्रेणापि प्रकृतोदाहरणस्यायमेवार्थो मतः, द्व्याश्रयकाव्ये चास्मिन्नेवार्थे प्रयोगः प्रदर्श्यते–

"स्यदिनां रजयन्त्येव मृगास्तेऽपि त्वदाज्ञया"[2]।

टीकाकार एतत् स्पष्टयन्नाह–"तेऽपि व्याधा अपि मद्देशे केनापि मृगा न घात्या इति त्वदाज्ञया कृत्वा स्यदिनस्ते त्वरावतो मृगान् रजयन्त्येव रमयन्त्येव न तु मारयन्तीत्यर्थः"[3]।

सिद्धान्तकौमुदीकारस्तु "मृगरमणम् आखेटकम्"[4] इत्याह। बालमनोरमाकारः[5] तत्वबोधिनीकृच्चापि[6] एतदेव समर्थयतः। एतन्मतेन

---

1. "मधुकरैरिति। मधुकरैः। कर्तृभिः। अपवादं मृगवंचनाय घण्टादिकुत्सितवाद्यं कुर्वन्तीत्यपवादकरा व्याधास्तैरिव पथिका हरिणा इव परिवादिनीस्वरजिता वीणाविशेषध्वनिजयिन्या। सप्तभिः परिवादिनी इत्यमरः। जयतेः क्विपि तुक्। वचसो गीतस्य कलतया माधुर्येण करणेन। रजिता आकृष्टाः सन्त इत्यर्थः। रञ्जेर्ण्यन्तात् कर्मणि क्तः "रञ्जेर्णौ मृगरमणे" इति उपधानकारलोपः। इहोपमानमृगसादृश्यादौपचारिकं मृगत्वम् उपमेयेषु पथिकेष्वस्तीत्यविरोधः। स्मृतिभुवः स्मरस्य मृगपातचिन्ताविषयत्वान्मृगग्रहणगर्त्तदेशस्य च वशमाययुः। यथा व्याधगानासक्त्या गर्त्ते मृगाः पतन्ति तद्वन्मधुकरहुङ्काराकृष्टाः पान्थाः स्मरपारवश्यं भेजुरित्यर्थः। अनेकैवेयमुपमा"। शिशु० (सर्वङ्कषोपेतम्) 6.9,
2. द्व्या० (प्रथमभागः) 9.31, पृ० 679,
3. द्व्या० (प्रथमभागः) 9.31, पृ० 679,
4. सि० कौ०, णिच्प्रकरणम्, चतुर्थखण्डः, पृ० 302, चौखम्बा०।
5. आखेटकम् इति। मृगयेत्यर्थः। रजयति मृगानिति। रजयन्ति मृगा ग्राह्या भवन्ति। तान् तादृग्व्यापारविषयान् करोति मृगवधासक्तो राजादिरित्यर्थः।
   सि० कौ० (बालमनोरमायुता) णिच् प्रकरणम्, चतुर्थखण्डः पृ० 302, चौखम्बा, सन् 1979,
6. आखेटकमिति। मृगयेत्यर्थः। रजयतीति। रजन्ति मृगा ग्रहणमरणाद्यनुकूलव्यापार-विषया भवन्ति, तान् मृगान् तादृग्व्यापारविषयान् करोतीत्यर्थः।
   सि० कौ० (तत्वबोधिनीव्याख्योपेता) ण्यन्तप्रक्रिया, पृ० 500, श्रीवेङ्कटेश्वर०, सन् 1959,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकृतोदाहरणस्य मृगान् व्यापादयतीत्यर्थो लभ्यते। व्याकरणदीपिकाकारोऽप्येनमेवार्थं स्वीकरोति[1]। नागेशस्तु अत्राह—"अत्र मृगरमणम् आखेट इत्येके। परे तु रजयाञ्चकार विरजाः स मृगान् इति भारविप्रयोगान्मृगरमणं यथाश्रुतमेव। अत एव भगवता रञ्जयति वस्त्राणीति प्रत्युदाहृतमित्याहुः"[2]। इहैतद् ध्वन्यते यन्नागेशमनीषया न्यासकारादीनां प्राचामेव मतं वरम् इति। एतदेव समर्थयन् दाधिमथपण्डितशिवदत्तशर्मा "मृगरमणमाखेटकम्" इत्यत्र टिप्पणीं कुर्वन्नाह—"वस्तुतस्तु परे तु रजयाञ्चकार विरजाः स मृगान् इति भारविप्रयोगान्मृगरमणं यथाश्रुतमेव। अत एव भगवता[3] मृगरमण इति किमर्थम् ? रंजयति वस्त्राणि इति प्रत्युदाहृतम् इति उद्योतोक्तमेव वरम्, तथा रमणं स्वसमीपीकरणमेव विश्वासदानेन पाशादिबन्धनादिना वेत्यन्यदेतत्"[4]।

इह न्यासकारादीनामभिमतेऽर्थे प्रयोगाः प्रदर्शिताः। मृगरमणम् आखेटकम् इति भट्टोजिदीक्षितप्रतिपादितेऽर्थे तु प्रयोगो मृग्यः खल्वस्ति।

इह प्रकृतोदाहरणार्थप्रसङ्गे प्रदीपकृता पदमञ्जरीकारेण च न किमपि स्वाभिमतं प्रदर्शितम्।

---

1. व्या० दी० 6.4.24,
2. उद्योतः 6.4.24,
3. भगवता = भाष्यकारेणेत्यर्थः। द्र० म० भा० 6.4.24,
4. द्र० - सि० कौ० (तत्त्वबोधिनीव्याख्योपेता) दाधिमथपण्डितशवदत्तशर्मकृतटिप्पणी-समन्विता। ण्यन्तप्रक्रिया, पृ०-500, श्री वेंङ्कटेश्वर, सन् 1959,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—अवोदैधोद्मप्रश्रथहिमश्रथाः ।। (6.4.29)

अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ—इत्येतें निपात्यन्ते ।

अवोदः –

अवोद इति उन्दी क्लेदने इत्यस्य अवपूर्वस्य घञि नलोपो निपात्यते इति वृत्तिः[1] । अवोदः = किञ्चिदार्द्र इति भाषावृत्तिकारः[2] । आर्द्र इति जटाधरः[3] । क्लेदनम् इति सिद्धान्तकौमुदीकारः[4] । वस्तुतस्तु भावे घञि सति क्लेदनम् ईषत् क्लेदनं वा—इत्येवार्थः । तत अर्शआद्यचि[5] किञ्चिदार्द्र आर्द्रः वा—इत्येवमर्थाप्यते इति गम्यते । प्रयोगस्त्वस्य मृग्यः ।

द्वितीयमुदाहरणम् एध इन्धनम् इति स्पष्टम् ।

ओद्मः –

---

1. काशिका 6, 4, 29,
2. भाषा० 6.4.29,
3. अयमर्थो जटाधरस्य नाम्ना शब्दकल्पद्रुमे उद्धृतः ।
   द्र०—शकल्प० भागः - 1, पृ० 134,
4. सि० कौ०, उत्तरकृदन्तप्रकरणम्,
5. "अर्शआदिभ्योऽच्" अष्टा० 5.2.127,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च निपात्यते इति वृत्तिः[1]। अत्रापि धात्वर्थानुरोधाद् उन्दनं = क्लेदनम् इत्यर्थो लभ्यते। सिद्धान्तकौमुदीकारेण चायमर्थः स्फुटं निर्दिष्टः[2]।

भाषावृत्तिकृता ओद्म क्लिन्नम् इत्यर्थार्पितम्[3]। एतच्च तेन उन्देर्मनिन्प्रत्ययान्तं निर्दिष्टम्[4]। एवं सति ओद्मन् इति नकारान्तः शब्दो भवति। अयं च यजुर्वेदे प्रयुज्यते–

"अपां त्वोद्मन्त्सादयामि"[5] इति।

अपां त्वा ओद्मन् = ओषधिषु सादयामि स्थापयामि[6] इत्यर्थः। इह सप्तम्या लुकि नलोपाभावः।

प्रश्रथः –

प्रश्रथ इति प्रपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते इति वृत्तिः[7]। अस्योदाहरणस्यार्थो वृत्तौ न्यासपदमञ्जर्योश्चापि न निर्दिष्टः। सिद्धान्तकौमुद्यादिषु ग्रन्थेषु प्राच्यार्वाच्यकोशग्रन्थेषु चाप्यस्यार्थो न दृश्यते। प्रकर्षेण श्रथः शैथिल्यं प्रश्रथ इत्यर्थोऽत्र प्रतीयते। श्रथि शैथिल्ये भ्वादिः[8]। इह न्यासकृता श्रन्थमोचनप्रतिहर्षणयोः[9] इत्येवम्, पदमञ्जरीकारेण च श्रन्थ मोचनहर्षयोः[10] इत्येवं कृत्वा क्रैय्यादिको धातुर्निर्दिष्टः। इह मोचनं शिथिलीकरणं

---

1. काशिका 6.4.29,
2. सि० कौ०, उत्तरकृदन्तप्रकरणम्,
3. भाषा० 6.4.29,
4. " " "
5. यजु० 13.53,
6. द्र०-दयानन्दीययजुर्वेदभाष्यम् 13.53, सायणभाष्यं च।
7. काशिका 6.4.29,
8. मा० धातु० भ्वादिः - 29, पृ० 63-64,
9. न्यासः 6.4.29,
10. पद० 6.4.29,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यात्। एवं मते स एवार्थो लभ्यते। धातुवृत्तिकृता तु इह निपातने श्रन्थधातुः अथवा श्रथ प्रयत्ने इति धातुर्निर्दिष्टः[1]।

प्रकर्षेण शैथिल्यं प्रश्रथ इत्युक्तम्। इह अर्शआद्यचि प्रकर्षेण श्रथः शिथिल इत्यर्थोऽपि स्यात्। अर्जुनरावणीये चास्मिन्नर्थे प्रयोगो दृश्यते—

बद्धस्यदमञ्चितं दशास्यं प्रश्रथवत्तमथो भ्रमन्तमाजौ।[2]

बद्धस्यदं = रुद्धवेगम् अत एव प्रश्रथवत् शिथिलवद् आजौ भ्रमन्तं तं दशास्यमित्यर्थः। अयं प्रयोगः पुरुषोत्तमदेवेन भाषावृत्तावपि उद्धृतः[3]।

द्व्याश्रयकाव्ये तु श्रन्थ ग्रन्थ सन्दर्भे इत्येतमाश्रित्य सन्दर्भेऽर्थे प्रश्रथ इति प्रयुज्यते—

"दग्धैधाभो यतैर्विन्ध्यस्त्वद्यशः प्रश्रथैस्ततैः"[4] इति।

इह टीकाकृदपि—"त्वद्यशःप्रश्रथैः = भवदीयकीर्तिसन्दर्भैः[5] इत्येवमेनमेवार्थं स्पष्टयति।

हिमश्रथः –

हिमं श्रथ्नाति मुञ्चति हिमश्रथश्चन्द्र इति भाषावृत्तिकारः[6]। अस्मिन्नेवार्थे च भट्टिकवेः प्रयोगो दृश्यते—

चन्दनद्रुमसञ्छन्ना निराकृतहिमश्रथाः।
दर्शितारस्त्वया ताश्च मलयोपत्यकाः शुभाः॥[7]

---

1. श्रथि शैथिल्ये इत्यत्र प्रश्रथः, हिमश्रथः – इति निपातने प्रदर्श्य आह धातुवृत्तिकारः गणान्तरपठितस्य वा निपातनम्। श्रन्थ विमोचप्रतिहर्षयोरिति क्र्यादिः। श्रन्थ ग्रन्थ सन्दर्भे इति च। इमावाधृषीयावपि। श्रथ प्रयत्न इति चुरादिः। दौर्बल्ये कथादिः आधृषीयो भोक्षणे।
   मा० धातु, भ्वादिः 29, पृ० 64,
2. अर्जुन० 20.19 (शोधितपाठः)
3. भाषा० 6.4.29,
4. द्व्या० (प्रथमभागः) 9.32, पृ० 679,
5. द्व्या० (प्रथमभागः) 9.32, पृ० 680,
6. भाषा० 6.4.29,
7. भट्टि० 22.4,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इह जयमङ्गलो[1] भरतमल्लश्चामुमेवार्थं समर्थयतः।[2]

हेमचन्द्राचार्येण तु अतो भिन्ने एवार्थे हिमश्रथ इति प्रयुज्यते। तथाहि तस्य प्रयोगः—

दग्धैधाभो यतैर्विन्ध्यस्त्वद्यशः प्रश्रथैस्ततैः।
गतो हिमश्रथाद्रित्वमव्याहतमतेरपि ॥[3]

"हिमश्रथाद्रित्वं हिमेन श्रथ्यते व्याप्यते हिमश्रथो हिमवान् योऽद्रिस्तद्भावं गतः[4]" इति टीकाकृत्।

---

1. चन्दनेत्यादि। ताश्च पूर्वं दृष्टा मलयोपत्यकाः मलयासन्नभुवः शुभाः चन्दनद्रुमसञ्छन्नत्वात् निराकृतहिमश्रथाः तिरस्कृतचन्द्राः त्वया दर्शितारः श्वो द्रष्टव्याः। कर्मणि लुट्। चिण्वदिट् चेति सकारलोपः। हिमं श्रथ्नातीति हिमश्रथश्चन्द्रः। श्रन्थ सेचनप्रतिहर्षयोः" इति कर्मण्यण् (3.1.11) अवोदै० (6.4.29) इत्यादिना अनुनासिकलोपो निपात्यते।
भट्टि० (जयमङ्गलाटीकोपेतम्) 22.4,
2. चन्दनद्रुमेत्यादि। त्वया ताः पूर्वं दृष्टा मलयाद्रेरासन्नभूमयो द्रष्टव्याः— कीदृश्यः ? चन्दनवृक्षव्याप्ता अत एव शुभाः सुखदत्वात् निराकृतो हिमश्रथश्चन्द्रो याभिः। हिमं श्रथ्नाति मुञ्चतीति हिमश्रथः, श्रन्थ मोक्षे इत्यस्य घञन्तस्य स्यदैधावोदेत्यादिना निपातनाद्रूपम्।
भट्टि० (जयमङ्गला-मुग्धबोधिनीटीकाद्वयोपेतसंस्करणम्; श्रीभुवनचन्द्रसाकेन" संस्कृतम्) 22.4; अत्रेदमवधेयं यद् जयमङ्गलेन हिमं श्रथ्नातीति हिमश्रथश्चन्द्र इत्युपपदसमासेन कर्मण्यणन्तं दर्शितम्। मुग्धबोधिनीकारेण भरतमल्लेन, काशिकाकारेण चापि श्रथशब्दो घञन्तो निर्दिष्टः। अस्मिन् पक्षे श्रन्थनं श्रथः, हिमस्य श्रन्थनं हिमश्रथः, तदस्यास्तीति अर्शआद्यचि हिमश्रथश्चन्द्र इत्येवमर्थो बोध्यः।
3. द्व्या० (प्रथमभागः) 9.32, पृ० 679,
4. द्व्या० (प्रथमभागः) 9.32, पृ० 680,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टमोऽध्यायः

काशिकावृत्ति-सप्तमाध्यायगत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च।

सूत्रम्–अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। (7.1.51)

असुगागमोऽत्र विधीयते। कथम्भूता अत्रात्मप्रीतिरिति वार्त्तिकद्वारा निर्दिश्यते–

अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम्[1]।

क्षीरलवणयोर्लालसायामिति वक्तव्यम्[2]।

अथेमान्यत्रोदाहरणानि वृत्तौ–अश्वस्यति वडवा, क्षीरस्यति माणवकः, वृषस्यति गौः, लवणस्यति उष्ट्र[3] इति। एवमेवेमान्युदाहरणानि भाष्येऽपि दृश्यन्ते[4]।

अश्वस्यति वडवा, मैथुनेच्छया अश्वमिच्छतीत्यर्थः। एवं वृषस्यति गौः, मैथुनेच्छया वृषम् इच्छतीत्यर्थः। तथा च अर्जुनरावणीये प्रयोगः –

अश्वस्यन्तीव वडवा वृषस्यन्ती च गौरिव।
क्षीरस्यन्ती रुदन्तीव बाला मन्दोदरी मुहुः ॥[5]

---

1. काशिका 7.1.51,
2. काशिका 7.1.51,
3. काशिका 7.1.51,
4. म० भा० 7.1.51,
5. अर्जुन० (हस्तलेखः) सर्गः 21, पृ० 63,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अश्वस्यति वडवा, वृषस्यति गौः—इत्युदाहरणद्वयम् अधिकृत्य कैय्यट आह—"मैथुनेच्छाप्रतिपादनपरत्वाद् योगस्य अश्ववृषोपादानमतन्त्रम् इति मानुष्यादावपि कवयः प्रयुञ्जते"[1] इति। एतेन गम्यते यत् सामान्येन या स्त्रीजातीया व्यक्तिः मैथुनेच्छावती भवति तत्रेदं प्रयुज्यते—अश्वस्यति, वृषस्यतीति। अश्वस्यति वडवा, वृषस्यति गौः इति भाष्यप्रयोगस्तु प्रसिद्धार्थपरः। अमरकोशे च—

"वृषस्यन्ती तु कामुकी"[2]।

इत्युक्तम्। एतेनापीदं समर्थ्यते। इत्थम्भूताः कवीनां प्रयोगा अपि दृश्यन्ते—तद्यथा रघुवंशे—

कलत्रवानहं भद्रे कनीयांसं भजस्व मे।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम्॥[3]

भट्टिकाव्ये—

"लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागता"[4]।

नीतिवाक्यामृते—

"नावृषस्यन्तीं स्त्रियमभियायात्"[5]।

एभिरत्रोद्धृतैः प्रयोगैर्गम्यते यत् कविसम्प्रदाये वृषस्यतीति प्रयोगो मैथुनं या इच्छति मानुष्यादिस्त्री तस्याः कृते प्रायेण प्रचलित इति। अथैवमप्यस्योदाहरणस्य व्याख्यानं कर्तुं शक्यम्—वृष इति शुक्रसेचनसमर्थः पुमान् तं वृषं पुरुषमात्मन इच्छतीति वृषस्यति कामुकी इति। विश्वप्रकाशकोशे च शुक्रलःपुमान् वृषः इत्युक्तम्[6]। एतेनाप्ययमर्थः सङ्गतो भवति।

---

1. प्रदीपः 7.1.51,
2. अमर० 2.6.9,
3. रघु० 12, 34,
4. भट्टि० 4.2,
5. नीतिवाक्यामृतम्, दिवसानुष्ठानसमुद्देशः, सूत्रम्−100,
6. "वृषः स्याद् वासके धर्मे सौरभेये च शुक्रले"।
   विश्वप्रकाशकोशः, (षद्विकम्-षान्तवर्गः) पृ०-171, चौखम्बा।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यच्च भाष्ये काशिकायां च "वृषस्यति गौः" इत्युदाहरणं दृश्यते तत् प्रसिद्धार्थपरम्, मानुष्यादावपि वृषस्यतीति कविप्रयोगादेतद् व्यज्यते।

नागेशस्तु मन्यते यद् मानुष्यादिविषयाणामेतेषां प्रयोगाणां भाष्यकारस्य मतेन असाधुत्वमेवास्तीति[1]।

वृषस्यतिवत् अश्वस्यति इत्यपि सामान्येन कामुकीमात्रविषये प्रयोक्तव्यम् इति पूर्वोद्धृतेन कैय्यटव्याख्यानेन ध्वन्यते।हेमचन्द्राचार्यस्तु स्वशब्दानुशासनस्य स्वोपज्ञबृहद्वृत्तौ एतदेव सुतरां स्पष्टमाचष्टे प्रयोगप्रदर्शनपुरस्सरम्—

"वृषाश्वाशब्दावत्र मैथुने वर्त्तेते, मानुष्यादावपि हि प्रयुज्येते। मैथुनेच्छापर्यायौ वृषस्याश्वस्येति।

'सा क्षीरकण्ठकं वत्सं वृषस्यन्तीन लज्जिता'

"शुनी गौश्च स्वमश्वस्यति"

"लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत्[2]"।

भट्टमल्लस्तु आख्यातचन्द्रिकायाम् "अश्वस्यति" इतीमं प्रयोगं तु अश्वाविषयकमेव मन्यते—

रिरंसते कामयते यियप्सति वृषस्यति।

अन्यं स्त्री चेदथाश्वा यद्यश्वस्यत्यथ चुम्बने॥[3]

इहापरम् उदाहरणयुगलम्-क्षीरस्यति माणवकः, लवणस्यति उष्ट्र इति वृत्तौ भाष्ये च प्रदर्शितम्। तच्चेदं द्वयं लालसायामर्थे भवतीति वार्त्तिकद्वारा निर्दिष्टम्। लालसा तृष्णातिरेक इति वृत्तिकारः[4]। अतिशयेनाभ्यवजिहीर्षा इति कैयटः[5]। उभयमिदमुपपन्नं विषयसामान्यात्। एतेन क्षीर-लवणेच्छायां लालसारूपायामित्यर्थलाभात् क्षीरलवणे विशेषेणाभ्यवहर्तुमिच्छति इत्यर्थो भवति। क्षीरस्यति माणवकः, लवणस्यति उष्ट्र इति। इह माणवकः, उष्ट्र इत्यनयोरुपादानं

---

1. कवय इति। इति रामो वृषस्यन्तीम् इत्यादि। भाष्यस्वरसस्त्वेषाम् असाधुत्वे। अत एव वडवा गौरिति च कर्तृपदमुपात्तम्। उद्योतः 7.1.51,
2. सिद्धहेम॰ (बृहद्वृत्तिलघुन्याससवंलितसंस्करणम्) 4.3.114, पृ॰ 169,
3. आख्य॰ द्वितीयकाण्डम् (मनुष्यचेष्टावर्गः) श्लोकः 43,
4. काशिका 7.1.51,
5. प्रदीपः 7.1.51,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसिद्धार्थपरम्। एतेन तत्सदृशाः क्षीरस्यति वत्सः, लवणस्यति गौः इत्याद्याः प्रयोगा अपि शक्याः कर्तुम्। अर्जुनरावणीये प्रकृतयोरनयोरुदाहरणयोः प्रयोगो लभ्यते—

"क्षीरस्यन्ती रुदन्तीव बाला मन्दोदरी मुहुः"।[1]

उष्ट्रीव लवणस्यन्ती पतीयन्ती वराङ्गना।
शुकेन शोचता वाक्यमित्यूचे चतुरेक्षणा॥[2]

इह क्षीरस्यन्ती रुदन्ती बालेव, लवणस्यन्ती उष्ट्रीव इति प्रसिद्धार्थपर एव प्रयोगः। भाष्यकाशिकागतोदाहरणानुकरणेनैवेतत् काव्यकृता प्रयुक्तमिति गम्यते।

1. अर्जुन० 21.22 (हस्तलेखः)
2. अर्जुन० 21.23 (" ")

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नवमोऽध्यायः

काशिकावृत्ति-अष्टमाध्यायगत-विशिष्टोदाहरणानाम् अर्थः प्रयोगश्च।

सूत्रम्–पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः। (8.1.67)

पूजनेभ्यः काष्ठादिभ्यः उत्तरपदं पूजितनुदात्तं भवति इति वृत्तिः। काष्ठाध्यापकः, दारुणाध्यापक इत्यादीन्युदाहरणानि इह वृत्तौ प्रदर्शितानि।

काष्ठाध्यापकः –

यो ह्यध्याप्यमानस्य विषयस्य काष्ठाम् अन्तिमसीमानं यावद् अध्यापयति, तं विषयं कात्स्न्येंन शिष्यस्य हृदयङ्गमं करोति स काष्ठाध्यापक इति कुमारी प्रज्ञादेवी[1]। श्रीराधारमणपाण्डेयेन तु प्रकृतोदाहरणस्य काष्ठशाखाया उपाध्याय इत्यर्थो निर्दिष्टः[2]।

दारुणाध्यापकः –

कुमारीप्रज्ञादेव्या मतेन यः खलु दारुणम् अतिक्लिष्टं ग्रन्थम् अध्यापयति स दारुणाध्यापक इति[3]। वासुदेव शरण-अग्रवालमहोदयेन तु निर्दिष्टं यः कठोरतया नियमपालनं कारयति स्म, शारीरिकदण्डं वा विदधाति स्म स दारुणाध्यापक इति[4]। अर्थप्रकाशिकायामपीदृश एवार्थः स्वीकृतः[5]।

---

1. अष्टाध्यायी– भाष्य– प्रथमावृत्तिः, तृतीयभागः, 8.1.67,
2. अर्थप्र० वैदिकप्रकरणम्, पृ० 332,
3. अष्टाध्यायी-भाष्य-प्रथमावृत्तिः, तृतीयभागः, 8.1.67,
4. पाणि० भार०, अ० 5, परि० 1, पृ० 283,
5. द्र०–अर्थप्र० वैदिकप्रकरणम्, पृ० 232,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्–अधःशिरसी पदे। (8.3.47)

अधस् शिरस् इत्येतयोर्विसर्जनीयस्य सकारो विधीयते। अधस्पदम् शिरस्पदम् इत्युदाहरणे भवतः। अधो नीचैः पदं स्थानम् अधस्पदम् इत्यर्थो गम्यते। एवं शिरसः पदं स्थानं शिरस्पदम् इत्यर्थो लभ्यते। अर्जुनरावणीये अनयोरुदाहरणयोः शोभनः प्रयोगो दृश्यते–

शिरस्पदं येन न पादपीठं कृतं त्वदीयं नमतादरेण।
अधस्पदं तस्य निरस्तभूतेः करोषि राजन् वसुधाधिपस्य॥[1]

अधस्पदम् इत्युदाहरणं भट्टिकाव्ये अपि प्रयुज्यते–

चकाराधस्पदं नासौ चरन् वियति मारुतिः।[2]

इह अधः पदं चरणनिक्षेपं न चकार इत्यर्थे प्रयोगः।

---

1. अर्जुन० सर्गः 26, पृ० 157, (हस्तलेखः)
2. भट्टि० 9.66,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रम्—भीरोः स्थानम्। (8.3.81)

इह मूर्धन्यादेशे कृते भीरुष्ठानम् इत्युदाहरणं भवति। षष्ठीसमासोऽत्र विज्ञायते। तेन भीरूणां स्थानं भीरुष्ठानम् इत्यर्थो लभ्यते। तथाहि अर्जुनरावणीये प्रयोगः —

"भीरुष्ठाने संश्रिता देहभाजो यूयं चौरा सत्यमेवालविद्ध्वम्"[1]।

भट्टिकाव्येऽपि अस्मिन्नेवार्थे प्रयोगो लभ्यते—

"गतमङ्गुलिषङ्गं त्वां भीरुष्ठानादिहागतम्"[2]।

सूत्रम्—गवियुधिभ्यां स्थिरः। (8.3.95)

इह गविष्ठिर इत्युदाहरणं विमृश्यते। गविष्ठिर इति अत्रिकुलजस्य ऋषिविशेषस्याभिधानम् इति अर्थप्रकाशिकाकारः[3]। अथ गवि वाचि स्थिरः

---

1. अर्जुन॰ सर्गः 26, पृ॰ 163,
2. भट्टि॰ 9.78,
3. अर्थप्र॰ अलुक्समासप्रकरणम्, पृ॰ 51,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्यसन्धः सत्यवादी इत्यर्थोऽप्यस्य विज्ञायते। भट्टिकाव्ये खल्वस्मिन्नर्थे प्रयोगो दृश्यते–

"वरनारीगुणैः प्रष्ठां विष्टरस्थां गविष्ठिराम्"[1]।

इह गवि वाचि स्थिरां सत्यसन्धां सत्यवादिनीं वेत्यर्थो गम्यते। वासुदेवविजये चाप्यस्मिन्नर्थे प्रयोगो लभ्यते–

"प्रष्ठस्य शिष्टेषु गविष्ठिरस्य"[2]।

"शिष्टेषु प्रष्ठस्य पुरोगमस्य गवि वाचि स्थिरस्य"[3] इतीयमत्र काव्यकारस्य स्वोपज्ञा पदचन्द्रिकाभिधा टीका। अर्जुनरावणीयेऽप्येतादृशः प्रयोगो दृश्यते–

"गविष्ठिरो वेदचतुष्टयं यो वपुष्टमेनोद्वहते पुनान्नम्"[4]।

सूत्रम्–सुषामादिषु च। (8.3.98)

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति। इह सुषामादिषु प्रतिष्णिका इति शब्दोऽप्युदाहरणत्वेन पठ्यते। प्रतिष्णाशब्दादयं कन्-प्रत्यय इति वृत्तिकारः[5]। प्रतिस्नान्त्यस्याम् इति प्रतिष्णिका द्रोणी इति वर्धमानसूरिः।[6] एतेन स्नानयोग्या विवृता द्रोणी इत्यर्थो गम्यते। प्रयोगस्त्वस्य मृग्यः।

।इति।

---

1. भट्टि० 9.84,
2. वासु० 2.15, पृ० 81,
3. " " "
4. अर्जुन० सर्गः 26, पृ० 165, (हस्तलेखः)
5. काशिका ८.३.९५,
6. गणरत्नमहोदधिः 8.3.98,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपसंहारः

काशिकागतविशिष्टोदाहरणानाम् अर्थः प्रयोगश्चेति विषयम् अवलम्ब्य लिखितोऽयं शोधप्रबन्धः नवसु अध्यायेषु विभक्तः। अथास्य शोध-प्रबन्धस्य विवेच्यं वस्तु संक्षेपेणेह समुपसंह्रियते।

इह प्रथम उपक्रमाध्यायः परिचयात्मकः। तत्र समासतः पाणिनीयव्याकरणपरम्परानिर्देशपूर्वकं काशिकावृत्तेः तत्कर्तुश्च परिचयो वैशद्येनोपस्थापितः। पण्डितवामन-जयादित्याभ्यां प्रणीताया अस्या वृत्तेः कालः 500 ख्रिष्टाब्दतः 600 ख्रिष्टाब्दपर्यन्तं मन्यते इति निरूपितम्। ततः काशिकावृत्तेः वैशिष्ट्यं तद्गतोदाहरणानां प्राच्यपरम्परानुसारिता, तेषाम् उदाहरणानाम् अर्थप्रयोगयोर्विवेचनीयता इत्यादि वर्णितम्।

द्वितीये अध्याये काशिकावृत्तिप्रथमाध्यायगतलक्ष्यविशेषाणामर्थस्य प्रयोगस्य च विमर्शः। तत्र प्रथमं जिह्वाकात्यः, हरितकात्य इत्यनयोरर्थमीमांसा। हरितकात्य इत्यस्य कैय्यटादीनां प्राचां मान्योऽर्थः भट्टोजिदीक्षितकृतोऽर्थश्च समीक्षापुरस्सरं निर्दिष्टः। ततः अनुक्रीडते सङ्क्रीडते परिक्रीडते, इत्येतेषाम् उदाहरणानाम् अर्थविमर्शपूर्वकं प्रयोगा उपस्थाप्यन्ते। अस्मिन्नेव प्रसङ्गे आनुते इत्यस्यार्थमीमांसा क्रियते प्रयोगाश्चोपस्थाप्यन्ते। अस्योदाहरण—उत्कण्ठापूर्वकं शब्दं करोति इति कैय्यटादिसम्मतोऽर्थः। मल्लिनाथस्तु स्तुतिं कुरुते इत्यर्थं प्रतिपादयति। अत्र द्वे अपीमे मते समीक्षापुरस्सरं समुपस्थापिते। तत आपृच्छते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यस्य विशिष्टार्थनिर्देशेन सह प्राच्यसाहित्यिकग्रन्थेभ्यः प्रयोगाः सङ्गृह्य दर्शिताः। अस्मिन्नेव अध्याये कणेहत्य पयः पिबति, मनोहत्य पयः पिबति इत्यनयोरर्थ-प्रयोगविमर्श-प्रसङ्गेन श्रद्धाप्रतिघातरूपस्य अर्थस्य मतभेदनिर्देशसहितं विवेचना कृता। ततश्च हस्तेकृत्य पाणौकृत्य इत्यनयोरुदाहरणयोः वृत्तिकारसम्मतम् अर्थं निर्दिश्य अपरेषां मतमपि प्रयोगसहितं प्रस्तूयते। अन्ते च उपनिषत्कृत्य, जीविकाकृत्य इत्यनयोरर्थं विशदय्य प्रयोगाः प्रदर्श्यन्ते।

तृतीयेऽध्याये काशिकावृत्तिद्वितीयाध्यायगतानां लक्ष्यविशेषाणाम् अर्थप्रयोगयोर्विमर्शो विधीयते। तत्र प्रथमम् अव्ययीभाव-समासप्रकरणे इतिपाणिनि, सकिखि, पञ्चनदम्, सप्तङ्गम् इत्यादीनाम् उदाहरणानाम् अर्थं विविच्य प्रयोगा निर्दिश्यन्ते। ततश्च गिरिकाण इत्यस्य पाठभेद-निर्देशपुरस्सरं कोशादिप्रमाणेनार्थो विमृश्यते। अस्मिन्नेव प्रकरणे गलेचोपकः, पादहारकः, कल्पनापोढः, साङ्काश्यसिद्धः, काम्पिल्यसिद्धः, शस्त्रीश्यामा, हंसगद्गदा, न्यग्रोधपरिमण्डला इत्यादीनां समासप्रकरणगतानाम् उदाहरणानाम् अर्थ-प्रयोगयोर्विमर्शो विहितः। यथासम्भवमेषाम् उदाहरणानां प्रयोगा अपि साहित्यिकग्रन्थेभ्य उद्धृत्य प्रदर्शिताः।

चतुर्थेऽध्याये काशिकावृत्ति-तृतीयाध्यायगतानां विशिष्टानाम् उदाहरणानाम् अर्थप्रयोगयोर्विमर्शोऽस्ति। तत्र ओजायते इत्यस्य विमर्शप्रसङ्गे ओजश्शब्दो वृत्तौ तद्वति वर्तते इति प्रतिपाद्य तादृशप्रयोगोऽपि दर्शितः। अस्मिन्नेव प्रकरणे अवगल्भते, अवगल्भायते, क्लीबते, क्लीबायते, होडते, होडायते इत्यादीनाम् उदाहरणानाम् अर्थः प्रयोग-प्रदर्शनसहितं व्याख्यातः। ततश्च सुदिनायते, दुर्दिनायते, सञ्चीवरयते, सम्भाण्डयते इत्यादीन्युदाहरणानि प्रयोगसहितं वर्णितानि। अस्मिन्नेव प्रकरणे विपूयः विनीयः जित्य इत्येतेषां लक्ष्याणाम् अर्थ-प्रयोगप्रदर्शनं कृतम्। अत्र जित्य इत्यस्यार्थे वैमत्य-प्रदर्शनं तत्समीक्षा च कृता। इह बलेनाक्रष्टव्या महाहलिर्जित्येति प्रयोगोपस्थापनपुरस्सरं प्रतिपादितम्। ततो दिग्धसहशय इत्यस्यार्थो महाभारतस्य प्रमाणेन निर्दिष्टः। तदनन्तरं कारकरः, आदिकरः, नान्दीकरः, कर्तृकरः, क्षेत्रकरः, जङ्घाकरः, धनुष्कर इत्येतेषाम् उदाहरणानामर्थो विविधमतप्रदर्शनपुरस्सरं विमृष्टः। यथासम्भवम् एतेषां प्रयोगाश्चापि प्रदर्शिताः। अत्रैव फलेग्रहिरित्यस्य फलप्रसवक्षमोऽबन्ध्यो वृक्ष इति रूढार्थं प्रतिपाद्य तत्रार्थे प्रयोगा दर्शिताः।, ततश्चास्यैवोदाहरणस्य फलानि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गृह्णन्तीति फलेग्रहयः फलभोजना मुनय इति भट्टिकवेरभिमतोऽर्थः समीक्षापूर्वकमुपस्थापितः। ततो वहंलिहो गौरित्यस्यार्थो विशदय्य प्रदर्शितो महाभारतप्रमाणपुरस्सरम्, अपमित्य याचते इत्येतच्चार्थापितं प्रयोगप्रदर्शनसहितम्।

पञ्चमे अध्याये काशिकावृत्तिचतुर्थाध्यायगत-लक्ष्यविशेषाणाम् अर्थप्रयोगयोर्विमर्शो विहितः। तत्र जानपदी वृत्तिः, संहितोरूः, शफोरूः, वामोरूः, सहितोरू, सहोरूः इत्येतान्युदाहरणानि प्रयोगप्रदर्शनसहितं विवेचितानि। इहैव आस्तेयम् इत्यस्यार्थप्रयोगौ निर्दिष्टौ। ततश्च माशब्दिकः, कार्यशब्दिकः, नैत्यशब्दिकः, प्राभूतिकः, सौस्नातिकः, सौखशायनिकः, पारदारिकः, गौरुतल्पिकः, बाहुकः, उरस्य इत्येतान्युदाहरणानि अर्थ-प्रयोगसहितं विवेचितानि।

षष्ठे अध्याये काशिकावृत्ति-पञ्चमाध्यायगतलक्ष्यविशेषाणामर्थ-प्रयोगयोर्विमर्शो विहितः। इह मातृभोगीणः, पितृभोगीणः इत्यनयोर्थो महाभाष्यप्रमाणेन निर्दिष्टः। ततो माणवीनम्, चारकीणम् इत्यनयोरर्थो मतभेदपुरस्समुपस्थापितः, अत्रैव स्थालीबिलीयास्तण्डुला इत्याद्युदाहरणं वैशद्येनार्थापितम्। तदनन्तरम् आप्रपदीनम् इत्युदाहरणम् अर्थापयित्वा तस्योपलब्धानां प्रयोगाणां मीमांसा कृता। ततो यथामुखीन-सम्मुखीनेत्येतयोरर्थनिर्देशः, तत्र मतभेदप्रदर्शनं च समीक्षासहितं कृतम्। साप्तपदीनं सख्यम् इत्येतस्यार्थद्वयं निर्दिश्य प्रयोग-प्रदर्शनं कृतम्। अत्रैव सर्वान्नीनो भिक्षुः, निबिडम्, निबिरीसम् इत्यादीन्युदाहरणानि अर्थप्रयोगसहितं विवेचितानि।

सप्तमे अध्याये काशिकावृत्ति-षष्ठाध्यायगतानां लक्ष्यविशेषाणामर्थप्रयोगयोर्विमर्शो विहितः। इहादौ उष्ट्रसादिः, उष्ट्रवामीति उदाहरणद्वयं विवेचितम्। तत्र उष्ट्रवामीत्येतस्य उष्ट्रगन्त्री इत्यर्थो निर्दिष्टो मङ्खकोशप्रामाण्येन। तत्र च "अथोष्ट्रवामीशतवाहितार्थम्" इत्यादि कालिदासीयप्रयोगोऽपि उद्धृतः। इतोऽग्रे च मनसाज्ञायी, कण्ठेकालः, उरसिलोमा, उदरेमणिः, प्रावृषिजः, शरदिजः, दिविज इत्यादीन्यलुक्समासप्रकरणगतान्युदाहरणानि विवेचितानि। तत उदमन्थः, अष्टापदम्, अष्टाबन्धुरः, अष्टावक्रः, विलगितः, विकपित इत्यादीनामुदाहरणानाम् अर्थ-प्रयोगयोर्विवेचनं कृतम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टमे अध्याये काशिकावृत्ति-सप्तमाध्यायगतलक्ष्यविशेषाणामर्थप्रयोगौ विविच्येते। तत्र अश्वस्यति, क्षीरस्यति, वृषस्यति लवणस्यति इत्येतेषाम् उदाहरणानां प्रयोगोपस्थापन-सहितम् अर्थ-विवेचनं कृतम्।

नवमे अध्याये काशिकावृत्ति-अष्टमाध्यायगतविशिष्टोदाहरणानाम् अर्थप्रयोगयोर्विवेचनं कृतम्। तत्र काष्ठाध्यापकः, दारुणाध्यापकः, अधस्पदम्, शिरस्पदम्, भीरुष्ठानम्, गविष्ठिरः, प्रतिष्णिका इत्येतेषाम् उदाहरणानाम् अर्थं निर्दिश्य यथासम्भवं प्रयोगा अपि प्रदर्शिताः। एवमेभिर्नवभिरध्यायैः शोधप्रबन्धोऽयं समाप्यते।

जाटवंशावतंसो यो मनस्वी सज्जनाग्रणीः।
ढाणीभालोठग्रामस्य प्रधानपुरुषोऽर्चितः।
प्रीयेत स्वर्गस्थो मे सुलतानः पितामहः॥

वात्सल्यलालितोऽन्वभवं ब्रह्मानन्दसहोदरम्।
सुखं यदङ्के तुष्येत् सा स्वपौत्रस्य मनीषया।
मामकोराभिधाना मे स्वर्गस्था च पितामही॥

आर्यस्यार्चित-शिवचन्द-पुण्यनाम्नः
पुत्रेणारचि भगवानीगर्भजेन।
ग्रन्थोऽयं नु विजयपाल-शास्त्रिणास्या
ल्लक्ष्याणामवगमने प्रदीपतुल्यः॥

इति श्रीयुत-शिवजीजाटस्य प्रपौत्रेण श्रीसुलतानसिंहस्य पौत्रेण आर्यशिवचन्दमहाभागस्य [illegible]ेण जाट्कुलसम्भवेन जांघुगोत्रेण भालोठिया इति गोत्रोपनामकेन राजस्थानीय-झुंझुनूमण्डलान्तर्गत-ढाणी भालोठग्रामे लब्धजन्मना हरियाणाप्रान्तीय-झज्जरस्थ-गुरुकुलाधिगत संस्कृत-विद्येन डा० विजयपालशास्त्रिणा साहित्य-व्याकरणाचार्येण विरचिते "काशिकागत-विशिष्टोदाहरणानामर्थः प्रयोगश्च" इति शोध-ग्रन्थे नवमोऽध्यायः समाप्तः, समाप्तश्चायं ग्रन्थ इति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सन्दर्भ-ग्रन्थसूची

अथर्ववेदसंहिता : सम्पा०–श्रीपाद दामोदर सातवलेकर, स्वाध्यायमण्डल पारडी, 1957 ई० ।

अनर्घराघवम् : रुचिपत्युपाध्यायटीकायुतम्, सम्पा०–दुर्गाप्रसादशर्मा, वासुदेवशर्मा, निर्णयसागर मुम्बई, 1937 ई० ।

अनर्घराघवम् : रामचन्द्रमिश्रव्याख्यायुतम्, चौखम्बा विद्याभवन वाराणसी, 1960 ई० ।

अनेकार्थसङ्ग्रहकोशः : (हेमचन्द्रकृतः) सम्पा० जगन्नाथशास्त्री होशिङ्ग चोखम्बा संस्कृत सीरिज वाराणसी, 1969 ई० ।

अभिधानचिन्तामणि कोषः : सम्पा०–पं० हरगोविन्दशास्त्री, चौखम्बा संस्कृत संस्थान, 1982 ई० ।

अमरकोशः : (क्षीरस्वामिकृत मरकोशोद्घाटन-व्याख्योपेतः) सम्पा०–श्रीकृष्णजी गोविन्द ओक, उपासना प्रकाशन 165 डी कमलानगर, दिल्ली-110007, 1981 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अमरकोशः : दाक्षिणात्यव्याख्योपेतः (लिंग्यासुरिकृत अमरपद विवृतियुक्तः, मल्लिनाथकृत-अमरपदपारिजातयुक्तश्च) सम्पा०-प्रो० ए० ए० रामानाथन्, अडियार लायब्रेरी एण्ड रिसर्च सेन्टर अडियार, प्रथमभाग 1971 ई०, द्वितीय भाग 1978 ई० ।

अमरकोशः : (महेश्वरकृतामरविवेकसहितः) सम्पा०—थत्तोपाभिधः चिन्तामणि शास्त्री, प्रकाशकः—मुम्बापुरीवर्तिराजकीय ग्रन्थशालाधिकारी, 1882 ई० ।

अमरकोशः : रामाश्रमीटीकोपेतः, सम्पा0—हरगोविन्दशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, 1982 ई० ।

अर्थप्रकाशिका : लेखक—आचार्य राधारमण पाण्डेय, मोतीलाल बनारसीदास दिल्ली, 1966 ई० ।

अर्जुनरावणीयम् : (भट्टभूमविरचितम्) सम्पा०—पण्डितशिवदत्त शर्मा, निर्णयसागर मुद्रणालय मुम्बई, 1900 ई० ।

अष्टाध्यायी : सम्पा०—ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट बहालगढ़ (सोनीपत) 1982 ई० ।

अष्टाध्यायी प्रकाशिका : देवप्रकाश पातञ्जल, पाणिनि अनुसन्धान मन्दिर, 1 जी, जवाहर नगर, देहली, संवत् 2012 वि० ।

अष्टाध्यायीप्रथमावृत्तिः (प्रथमभागः) : पं० ब्रह्मदत्तजिज्ञासु, पाणिनिमहाविद्यालय, मोतीझील बनारस-6, 1964 ई० ।

अष्टाध्यायीप्रथमावृत्तिः (तृतीयभागः) : कु० प्रज्ञादेवी, रामलाल कपूर ट्रस्ट बहालगढ़ (सोनीपत) 1977 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टाध्यायीभाष्यम् (द्वितीयभागः) : स्वामीदयानन्द सरस्वती, परोपकारिणी सभा अजमेर, संवत् 1997 वि० ।

आख्यातचन्द्रिका : भट्टमल्लविरचिता, सम्पा०—पण्डितहरगोविन्दमिश्र, चौखम्बा संस्कृत ग्रन्थमाला, बनारस, 1936 ई० ।

आर्यासप्तशती : अनन्तपण्डितकृतव्यङ्ग्यार्थदीपिकासहिता, सम्पा०—पण्डित दुर्गाप्रसाद, काशीनाथ शर्मा, निर्णयसागरमुद्रणालय मुम्बई, 1886 ई० ।

उणादिकोशः : वेदान्तिमहादेवकृतः, सम्पा०—डॉ० कुञ्जुण्णिराजः, मद्रपुरीयविश्वविद्यालयः, 1956 ई० ।

उणादिकोषः : स्वामीदयानन्दसरस्वती, सम्पा०–युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट बहालगढ़ (सोनीपत) 1974 ई० ।

उत्तररामचरितम् : (भवभूतिकृतम्) सम्पादक—व्याख्याता—डॉ0 कपिलदेव द्विवेदी, साहित्य संस्थान, 37 कचहरी रोड़, इलाहाबाद-2, 1974 ई० ।

ऋग्वेदसंहिता : वैदिक यन्त्रालय अजमेर, 1974 ई० ।

ऐतिहासिक स्थानावली : विजयेन्द्रकुमार माथुर, वैज्ञानिक एवं तकनीकी शब्दावली आयोग, शिक्षा मंत्रालय भारत सरकार, नई दिल्ली ।

काव्यादर्शः : दण्डी, सम्पा0–रङ्गाचार्य शास्त्री, भाण्डारकर रिसर्च इन्स्टीट्यूट, 1938 ई० ।

काशिका : सम्पा०—शोभितमिश्र, चौखम्बा संस्कृत पुस्तकालय बनारस-1, 1952 ई० ।

काशिका (2 भागौ) : सम्पा०–आर्येन्द्र शर्मा, संस्कृत परिषद् उस्मानिया विश्वविद्यालय हैदराबाद, 1969-70 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

काशिका का समालोचनात्मक अध्ययन : डॉ० रघुवीर वेदालंकार, नाग प्रकाशन, जवाहर नगर, दिल्ली-7, 1977 ई० ।

काशिका—वैयाकरण—सिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम् : डॉ० महेशदत्त शर्मा, संस्कृतप्रगताध्ययनकेन्द्रम्, पुण्यपत्तनविश्वविद्यालय, पुण्यपत्तनम्, 1974 ई० ।

काशिका (हिन्दी व्याख्या) (प्रथम भाग) : डॉ० रघुवीर वेदालंकार, नागप्रकाशन, जवाहरनगर, दिल्ली, 1979 ई० ।

किरातार्जुनीयम् : घण्टापथव्याख्योपेतम्, सम्पा०—वाविल रामशास्त्रुलु, रामशास्त्रुलु एण्ड संस मद्रास, 1954 ई० ।

कुमारसम्भवम् : (सञ्जीवनीटीकोपेतम्) सम्पा0—वासुदेव पणशीकर निर्णयसागर मुद्रणालय मुम्बई, 1927 ई० ।

कौटलीयार्थशास्त्रम् (खण्डत्रयम्) : श्रीमूलासंवलितम्, त० गणपतिशास्त्री, भारतीयविद्या प्रकाशन, दिल्ली, 1984 ई० ।

कौमुदीकथाकल्लोलिनी : रामशरणशास्त्री एम० ए०, चौखम्बा विद्याभवन वाराणसी-1, 1961 ई० ।

गणरत्नमहोदधिः : सम्पा०–भीमसेन शर्मा, सरस्वतीयन्त्रालय प्रयाग, 1894 ई० ।

चम्पूभारतम् (अनन्तकविकृतम्) सम्पा०–नारायणराम आचार्य, मुंशीराम मनोहरलाल पब्लिशर्स प्रा० लि०, रानी झांसी रोड, नई दिल्ली, 1983 ई० ।

चरकसंहिता (मूल) : सम्पा०–प्रियव्रत शर्मा, चौखम्बा ओरियन्टालिया बनारस, 1983

चरकसंहिता (चक्रपाणिदत्तटीकायुता) : सम्पा०–यादवशर्मा, निर्णयसागर मुद्रणालय 1941 ई० ।

चान्द्रव्याकरणम् (स्वोपज्ञवृत्तियुतम्) (प्रथमभागः) : सम्पा०–क्षितीशचन्द्र चटर्जी, डेक्कन कालेज, पूना, 1953 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जैनेन्द्रव्याकरणमहावृत्तिः : सम्पा० शम्भुनाथ त्रिपाठी, भारतीय ज्ञानपीठ काशी, 1956 ई० ।

त्रिकाण्डशेषकोशः : शीलस्कंन्ध महानांयकयतिवरकृतसारार्थचन्द्रिका समन्वितः, श्रीखेमराज कृष्णदास वेङ्कटेश्वर मुद्रणालय मुम्बई, 1916 ई० ।

द्व्याश्रयकाव्यम् (द्वौ भागौ) : हेमचन्द्रसूरिः, श्रीमनफरा जैन श्वेताम्बर मूर्तिपूजकसंघ मनफरा (कच्छ) 1983 ई० ।

धातुपाठः : पाणिनिः, रामलाल कपूर ट्रस्ट बहालगढ़ (सोनीपत) 1982 ई० ।

नीतिवाक्यामृतम् : सोमदेवसूरिः, सम्पा०—रामचन्द्र मालवीय, चौखम्बा विद्याभवन, वाराणसी 1972 ई० ।

निरुक्तम् : चन्द्रमणि विद्यालंकार, आर्षकन्यागुरुकुल नरेला, संवत् 2033 वि० ।

नैषधीयचरितम् : सम्पा०–नारायण आचार्य, निर्णयसागर मुद्रणालय, 1952 ई० ।

पञ्चतन्त्रम् : चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1977 ई० ।

प्रक्रिया कौमुदी (पूर्वाध-उत्तरार्ध) : प्रसादव्याख्योपेता, सम्पा0 कमलाशंकर त्रिवेदी संस्कृप्राकृतग्रन्थमाला मुम्बई 1925 ई०, 1931 ई० ।

प्रक्रियाकौमुदी : प्रकाशव्याख्योपेता, सम्पा0–मुरलीधरमिश्र, सम्पूर्णानन्दविश्वविद्यालय, वाराणसी 1980 ई० ।

प्रक्रियाकौमुदीविमर्शः : आद्याप्रसादमिश्र, वाराणसी, 1966 ई० ।

प्रक्रिया सर्वस्वम् (चत्वारो भागाः) : नारायणभट्ट, अनन्तशयनमुद्रणालय, 1973 ई० ।

प्रयोगरत्नमालाव्याकरणम् : पुरुषोत्तमविद्यावागीश भट्टाचार्य, असम संस्कृत बोर्ड, गुवाहाटी, 1973 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रयोगपल्लवः : भवनाथः, सम्पा०–शशिनाथ झा, कामेश्वर दरभङ्गा संस्कृत विश्वविद्यालय बिहार, 1983 ई० ।

पाणिनिकालीन भारतवर्ष : वासुदेवशरण अग्रवाल, चौखम्बा विद्याभवन, वाराणसी-1, 1969 ई० ।

पाणिनिसूत्रव्याख्या (द्वौ भागौ) मणलूर वीरराघवाचार्य, सम्पा०–ति० चन्द्रशेखरनम्, प्राच्य हस्तलेख संग्रहालय मद्रास, 1954-55 ई० ।

पाणिनीयनाटकम् : गोपालशास्त्री दर्शनकेसरी, चौखम्बा विद्याभवन वाराणसी-1, 1964 ई० ।

पाणिनीयमिताक्षरा : अन्नम्भट्ट, बंनारस संस्कृत सीरिज, 1903 ई० ।

पाणिनीयाष्टकम् (पूर्वार्द्धम्) : गङ्गादत्तशास्त्री, गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार, 1962 ई० ।

पारस्करगृह्यसूत्रम् : डा० सुधाकरमालवीयः, चौखम्बा संस्कृत संस्थान बनारस, 1967 ई० ।

बृहच्छब्देन्दुशेखरः (भागत्रयम्) नागेशभट्टः, सम्पा०—डा० सीताराम शास्त्री, वाराणसेय संस्कृत विश्वविद्याल बनारस, 1960 ई० ।

बौधायनधर्मसूत्रम् : उमेशचन्द्र पाण्डेय, चौखम्बा संस्कृत सीरिज वाराणसी, 1972 ई० ।

भट्टिकाव्यम् : (जयमङ्गलया, भरतमल्लकृतया मुग्धबोधिन्या च युतम्) सम्पा०–श्रीत्रिभुवनचन्द्र, सरस्वती यन्त्रालय कलकत्ता, 1885 ई० ।

भट्टिकाव्यम् (1-8 सर्गान्तम्): (सर्वपथीनोपेतम्) सम्पा०—के० पी० त्रिवेदी, बाम्बे संस्कृत सीरिज, 1897 ई० ।

भट्टिकाव्यम् : (जयमङ्गलोपेतम्) सम्पा०–विनायक नारायण शास्त्री जोशी, वासुदेव-लक्ष्मणशास्त्रिपणशीकरः, निर्णयसागर मुद्रणालय मुम्बई, 1960 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भट्टिकाव्यम् : गोपालशास्त्री दर्शनकेसरी, चौखम्बा सुरभारती प्रकाशन, वाराणसी-1976 ई० ।

भागवृत्तिसङ्कलनम् : पं० युधिष्ठिर मीमांसकः, प्राच्यभारती विद्याप्रतिष्ठान अलवर गेट अजमेर, संवत् 2021 वि० ।

भाषावृत्तिः : (पुरुषोत्तमदेवः) सम्पा0-श्रीशचन्द्रचक्रवर्ती, दि वरेन्द्र रसर्च सोसायटी राजशाही-बंगाल, 1918 ई० ।

मङ्खकोशः : सम्पा०-थियोडोर जकारिया, चौखम्बा संस्कृत सीरिज वाराणसी, 1972 ई० ।

मनुस्मृतिः : मनसुखराय मोर, 5 क्लाईव रोड़ कलकत्ता, 1971 ई० ।

मलयगिरिशब्दानुशासनम् : सम्पा०—पं० बेचरदास · जीवराज दोशी, प्रकाशक—लालभाई भारतीय संस्कृति विद्यामन्दिर, अहमदाबाद । 1967 ई० ।

महाभारतम् : सम्पा०—वी. एस. सूक्थांकर आदि, भाण्डारकर प्राच्यविद्या संशोधन मन्दिर पूना, 1933-66 ई० ।

महाभाष्यम् : हरियाणा साहित्य संस्थान, गुरुकुल झज्जर (रोहतक) 1962-66 ई० ।

महाभाष्यम् (प्रथमखण्डः) : कील्हार्न, भाण्डारकर अनुसन्धान संस्थान पूना, 1962 ई० ।

महाभाष्यम् : (नवाह्निकम्) तत्त्वालोकटीकायुतम्, पं० रुद्रधर शर्मा, चौखम्बा संस्कृत सीरिज बनारस, 1954 ई० ।

महाभाष्यप्रदीपव्याख्यानानि (1-4 अध्यायाः) : सम्पा०—एम० एस० नरसिंहाचार्य व्याकरण शिरोमणि, फ्रेंच-भारतीय संस्थान पाण्डिचेरी, 1975-80 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

माधवीया धातुवृत्तिः : सम्पा०–स्वामी द्वारिकादास शास्त्री, प्राच्यभारतीयप्रकाशन वाराणसी, 1964 ई० ।

मानसोल्लासः (द्वितीयभागः) सोमेश्वरभूपतिः, सम्पा0–जी. के. श्रीगोण्डेकर, बरोदा ओरियण्टल इन्स्टीट्यूट बड़ोदा, 1939 ई० ।

मेघदूतम् (सञ्जीवनीयुतम्) : सम्पा०—डा० रामशंकर त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी, 1981 ई० ।

मेदिनीकोशः : सम्पा०–जगन्नाथशास्त्री होशिङ्ग चौखम्बा संस्कृत सीरिज बनारस, 1968 ई० ।

यजुर्वेदसंहिता : वैदिक यन्त्रालय अजमेर, 1984 ई० ।

रघुवंशम् : (सञ्जीवनीटीकोपेतम्) सम्पा०–लक्ष्मीधर पन्त धर्माधिकारी, चौखम्बा संस्कृत सीरिज बनारस, 1938 ई० ।

राजनिघण्टुः : नरहरिपण्डित, सम्पा०–आशुबोध भट्टाचार्य, नित्यबोधभट्टाचार्य, सिद्धेश्वर यन्त्र कलकत्ता, 1899 ई० ।

रामायणम् (द्वितीयभागः) : पी० एल० वैद्य, ओरियन्टल इन्स्टीट्यूट बड़ोदा, 1932 ई० ।

रामायणम् : गीताप्रेस गोरखपुर, संवत् 2020 वि० ।

वाचस्पत्यम् (6 भागाः) तारानाथ तर्कवाचस्पति, चौखम्बा संस्कृत ग्रन्थमाला वाराणसी, 1962 ई० ।

वासुदेवविजयम् (काव्यमाला-दशमगुच्छ) : निर्णयसागर मुद्रणालय मुम्बई, 1912 ई० ।

वैजयन्तीकोशः : सम्पा०–हरगोविन्द शास्त्री, चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1971 ई० ।

वैयाकरणसिद्धान्तकौमुदी : सम्पा०–वासुदेव शर्मा पणशीकर, निर्णयसागर मुद्रणालय, 1929 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैयाकरणसिद्धान्तकौमुदी (तत्वबोधिनीयुता) : सम्पा०–पण्डितशिवदत्तशर्मा, वेङ्कटेश्वर मुद्रणालय बम्बई, संवत् 2015 वि० ।

वैयाकरणसिद्धान्तकौमुदी (बालमनोरमायुता) (4 भागाः) : सम्पा०–गोपालशास्त्री नेने, चौखम्बा संस्कृत संस्थान बनारस, 1982 ई० ।

व्याकरणचन्द्रोदयः (5 खण्डाः) : चारुदेवशास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1969-73 ई० ।

व्याकरणदीपिका : ओरम्भट्टः, सम्पा०—गणपतिशास्त्री, मेडिकल हाल प्रेस वाराणसी 1916 ई० ।

व्याकरणसिद्धान्तसुधानिधिः : विश्वेश्वर सूरि, सम्पा०–माधवशास्त्री, चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1924 ई० ।

शब्दकल्पद्रुमकोषः (5 खण्डाः) : राधाकान्तदेव, चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1961 ई० ।

शब्तकौस्तुभः (1-2 भागौ) : (भट्टोजिदीक्षितः) संम्पा०–गोपालशास्त्री नेने, चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1933, 1929 ई० ।

शब्दकौस्तुभः (तृतीयभागः) (भट्टोजिदीक्षितकृतः) : सम्पा0–विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत ग्रन्थमाला बनारस, 1917 ई० ।

शाकटायनव्याकरणम् (अमोघावृत्तियुतम्) : सम्पा०–शम्भुनाथत्रिपाठी, भारतीय ज्ञानपीठ दुर्गाकुण्डमार्ग वाराणसी, 1971 ई० ।

शाकटायनव्याकरण—चिन्तामणिवृत्तिः : सम्पा०–मुन्नालाल जैन,

शिशुपालवधम् : (सर्वङ्कषोपेतम्) सम्पा०–नारायणराम आचार्य निर्णयसागर मुद्रणालय, मुम्बई-2, 1957 ई० ।

शिशुपालवधम् : सम्पा०–हरगोविन्दशास्त्री, चौखम्बा विद्याभवन वाराणसी, 1979 ई० ।

शृङ्गारप्रकाशः (प्रथमभाग) : भोजदेवः, सम्पा०–यदुगिरि, यतिराज, सम्पत्कुमार, रामानुज कोरोनेषन् मुद्रणालय, मैसूरनगरी, 1956 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीभिक्षुशब्दानुशासनम् : (पण्डितरघुनन्दनकृतवृत्तियुतम्) प्रणेता मुनिः चौथमल्लः, सम्पा०—मुनिः राजेन्द्रकुमारः, आदर्श साहित्यसंघ चुरू (राजस्थान) 1982 ई० ।

सरस्वतीकण्ठाभरणम् (व्याकरणम्) (चतुर्थभागः) : नारायणदण्डनाथप्रणीतया हृदयहारिण्याख्यया व्याख्यया सेमतम्, सम्पा0–वि०ए० रामस्वामिशास्त्री, राजकीय मुद्रणालय अनन्तशयन 1948 ई० ।

संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमभाग) : पण्डितयुधिष्ठिरमीमांसक, रामलालकपूरट्रस्ट बहालगढ़ (सोनीपत) सं० 2030 वि० ।

संस्कृतशब्दार्थकौस्तुभ : द्वारकाप्रसादशर्मा, तारिणीश झा, प्रकाशक रामानारायणलाल बेनीप्रसाद, इलाहाबाद-2, 1967 ई० ।

संस्कृत हिन्दी शब्दकोश : वामनशिवराम आप्टे, मोतीलाल बनारसीदास, दिल्ली 1969 ई० ।

साहित्यदर्पणः : विश्वनाथः, सम्पा0–दुर्गाप्रसादद्विवेदी, प्रकाशक—पाणिनि, स्ट्रीट नं० 1, अंसारी रोड़, दरियागंज, दिल्ली, 1982 ई० ।

सिद्धहेमशब्दानुशासनम् (लघुवृत्तिसंवलितम्) : हेमचन्द्राचार्यः, सम्पा०–मुनि हिमांशुविजय न्यायकाव्यतीर्थ से० आनन्दजी कल्याणजी, जावेरियाबाद, अहमदाबाद, 1934 ई० ।

सिद्धहेमशब्दानुशासनम् (बृहद्वृत्तियुतम्) : (पञ्चाध्यायात्मक) हेमचन्द्राचार्य, श्री अमृतजैन साहित्यवर्धकसभा दौलतनगर, बोरीवाली, मुम्बई, 1969 ई० ।

सिद्धहेमशब्दानुशासनम् (सिद्धहेमसरस्वती वृत्तियुतम्) : (पञ्चाध्यायात्मकम्) श्री विजयनेमिसूरी, जैन साहित्यवर्धक सभा अहमदाबाद, संवत् 2013 वि० ।

सुदर्शनशतकम् (काव्यमाला अष्टमगुच्छ) : कूरनारायणकवि, सम्पा०–दुर्गाप्रसादशर्मा, निर्णयसागर मुम्बई ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभद्राहरणम् (महाकांव्यम्) : ब्रह्मदत्तसूनु नारायणकवि, सम्पा०—प्रो० एम० श्रीधर मेनोन्, कालिकट विश्वविद्यालय, केरल, 1983 ई० ।

स्कन्दमहापुराणम् : नागप्रकाशन, जवाहरनगर दिल्ली, 1982 ई० ।

स्वरसिद्धान्तचन्द्रिका : श्रीनिवासयज्वा, सम्पा०–शिवरामकृष्णशास्त्री, अण्णामलै विश्वविद्यालय, 1936 ई० ।

हरिनामामृत-व्याकरणम् (सवृत्तिकम्) : सम्पा०–भक्तिविलास तीर्थ गोस्वामी, श्रीचैतन्य अनुसन्धान संस्थान, 1982 ई० ।

हर्षचरितम् (मूलमात्र) : बाणभट्ट, सम्पा०–ईश्वरचन्द्र विद्यासागर, प्रकाशक—पीताम्बरदास वन्द्योपाध्याय, संस्कृतयन्त्र कलिकाता, 1883 ई० ।

हलायुधकोशः : सम्पा०–जयशंकर हिन्दी साहित्य समिति सूचना विभाग उत्तरप्रदेश, लखनऊ, 1967 ई० ।

हिन्दीशब्दसागर (भाग 3-4): काशीनागरीप्रचारिणी सभा, 1967-68 ई० ।

हैमप्रकाशमहाव्याकरणम् (पूर्वार्ध) : विनयविजयगणी, सम्पा०—क्षमाविजयगणी, प्रकाशक—शाह हीरालाल खेमचन्द, कोट, मुम्बई 1937 ई० ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ३म्

शोध-प्रबन्धे विवेचितानाम् उदाहरणनाम् अकारादिक्रमेण

अनुक्रमणिका

	पृष्ठसङ्ख्या
अ	
अक्षपरि	57
अच्छगत्य, अच्छगतम्	36
अच्छोद्य, अच्छोदितम्	36
अटायते, अट्टायते	91
अधस्पदम्	222
अनुक्रीडते	13
अन्तर्हत्य, अन्तर्हतम्	30
अपमित्य याचते	131
अपमित्य हरति	132
अवगल्भते, अवगल्भायते	86
अवोदः	213
अश्वस्यति वडवा	217
अष्टापदम्	207
अष्टाबन्धुरः	206
अष्टावक्रः	206
आ	
आक्रीडते	18
आगमयस्व तावन्माणवक !	20
आचार्यभोगीनः	145

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आदिकरः 113
आनुते शृगालः 22
आपृच्छते गुरुम् 27
आप्रपदीनः पटः 161
आस्तेयम् 318

इ

इतिपाणिनि 50

उ

उत्पुच्छयते गौः 95
उपकुम्भम्, उपमणिकम् 49
उपनिषत्कृत्य 45
उदपेषं पिनष्टि 195
उदवासः 195
उदवाहनः 196
उदधिः 197
उदमन्थः 198
उदौदनः 199
उदसक्तुः 200
उदबिन्दुः 206
उदवज्रः 200
उदभारः 201
उदहारः 202
उदवीवधः, उदगाहः 203
उदरेमणि, उरसिलोमा 185
उष्ट्रवामी 178
उष्ट्रसादिः, उष्ट्रसादी 175

ए

एकपरि 57
एंधः 213

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओ

ओजायते 83
ओद्म 213

औ

औरसः 144

क

कणेहत्य पयः पिबति 33
कण्ठेकालः 184
कत्रयः 204
कद्वदः 205
कद्रथः 205
कर्तृकरः 120
कर्मण्यं शरीरम् 153
कल्पनापोढः 72
काम्पिल्यसिद्धः 74
कारकरः 112
कार्मणम् 172
कार्णवेष्टकिकं मुखम् 152
कालेजः 187
काष्ठाध्यापकः 221
किरिकाणः (गिरिकाणः) 64
कुमुदश्येनी 79
कोटायते 92
क्लीबते, क्लीबायते 86
क्षरेजः 189
क्षीरस्यति माणवकः 217
क्षेत्रकरः 122

ग

गलेचोपकः 70

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गविष्ठिरः 223
गिरिकाणः (किरिकाणः) 64
गोसादिः गोसादी 180
गोसारथिः 180
गौरुतल्पिकः 143
ग्रामता 138

च

चतुष्परि 57
चारकीणम् 149

ज

जङ्घाकरः 124
जनता 138
जानपदी वृत्तिः 133
जित्यः (जित्या) 106
जिह्वाकात्यः 10
जीविकाकृत्य 44
जैह्वाकाताः 10

त

तत्पाणिनि 51
त्रिपरि 57

द

दारुणाध्यापकः 221
दिग्धसहशयः 110
दिविजः 187
दुर्दिनायते 89
द्विपरि 57
द्वियमुनम् 60

ध

धनुष्करः 125

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न

नान्दीकरः 114
निबिडम् 168
निबिरीसम् 168
नीहारायते 90
न्यग्रोधपरिमण्डला 81

प

पञ्चनीनम् 146
पञ्चनदम् 60
पत्कांषी 191
पद्घोषः 193
पद्धतिः 192
पद्धिमम् 191
पन्मिश्रः 193
पन्निष्कः 194
परिक्रीडते 17
परिपुच्छयते 97
पाणौकृत्य 38
पादघोषः 193
पादनिष्कः 194
पादमिश्रः 193
पादहारकः 70
पारदारिकः 142
पार्याप्तिकः 141
पितृभोगीणः 145
पोटायते 92
पौरुषेयम् 147
प्रतिष्णिका 223
प्रश्रथः 214

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राभूतिकः 141
प्रावृषिजः 176
प्रुष्टायते 94
प्लुष्टायते 94

फ

फलेग्रहिः 127

ब

बन्धुता 138
बाहुकः 143

भ

भीरुष्ठानम्

म

मनसांज्ञायी 183
मनोहत्य पयः पिबति 33
माणवीनम् 149
मातृभोगीणः 145
माशब्दिकः 139
मोटायते 93

य

यदृच्छगच्छति 37
यदृच्छवदति 37
यदन्तर्हन्ति 30
यथामुखीनः 156

र

रजयति मृगान् 210

ल

लक्षणोरूः 135
लवणस्यति उष्ट्रः 217

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व

वृषस्यति गौः 217
वहंलिहो गौः 129
वर्षेजः 188
वरेजः 190
वामोरूः 136
वास्त्रयुगिकं शरीरम् 152
विकपितः 208
विनीयः 103
विपुच्छयते
विपूयः 102
विलगितः 208
वेष्यो नटः 155

श

शफोरूः 134
शरदिजः 187
शरेजः 189
शलाकापरि 57
शस्त्रीश्यामा 77
शिरस्पदम् 222
शीकायते 81
शीर्षच्छेद्यः 150
श्वनिशम् 81
श्वनिशा 81

स

सकिखि 53
सङ्क्रीडते 14
सञ्चीवरयते भिक्षुः 100
सत्याकरोति वणिग् भाण्डम् 173

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तगङ्गम् 59
सप्तगोदावरम् 62
सम्भाण्डयते 97
सम्मुखीनः 159
सर्वान्नीनो भिक्षुः 164
सहायता 138
सहोरूः 136
सहितोरूः 136
संहितोरूः 134
साङ्काश्यसिद्धः 74
साप्तपदीनं सख्यम् 165
सुदिनायते 89
सोटायते 93
सौखरात्रिकः 142
सौखशयनिकः 142
सौस्नातिकः 142
स्थालीबिलीयास्तण्डुलाः 151

ह

हरितकात्यः 10
हंसगद्गदा 79
हस्तेकृत्य 38
हारितकाताः 10
हिमश्रथः 215
होडते 86
होडायते 86

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 5144

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri